4

अथ चतुर्थ स्कंधः

Shreemad- Bhagavadham
chaturtha skandhah IV

भा० च० श्रीगणेशायनमः ॥ ॐ श्रीपरमहंसास्वादितचरणकमलचिन्मकरंदाय भक्तजनमानसनिवासाय श्रीरामायनमः ॥ अ
१ थैकत्रिंशताध्यायैर्विसर्गस्तुर्य ईर्य्यते ॥ विसर्गस्त्वीश्वराधीनैर्ब्रह्ममन्वादिभिः कृतः ॥१॥ तत्रतुप्रथमेध्यायेमनुन्यान्वयाः
पृथक् ॥ वर्ण्यंतेयत्रयज्ञादिमूर्त्तिभिःप्रभवोहरेः ॥२॥ मनुकन्यान्वयंविस्तरेणवक्तुमाह ॥ मनोस्त्विति ॥ चकाराद्द्वौपुत्रौच ॥१॥

श्रीमैत्रेयउवाच ॥ मनोस्तुशतरूपायांतिस्रःकन्याश्चजज्ञिरे ॥ आकूतिर्देवहूतिश्चप्रसूतिरितिविश्रुताः ॥
त२ १ ॥ आकूतिंरुचयेप्रादादपिभ्रातृमतींनृपः ॥ पुत्रिकाधर्ममाश्रित्यशतरूपानुमोदितः ॥२॥ प्रजापतिःसभग
वान्रुचिस्तस्यामजीजनत् ॥ मिथुनंब्रह्मवर्चस्वीपरमेणसमाधिना ॥३॥ यस्तयोःपुरुषःसाक्षाद्विष्णुर्य
ज्ञस्वरूपधृक् ॥ यास्त्रीसादक्षिणाभूतेरंशभूतानपायिनी ॥४॥ आनिन्येस्वगृहंपुत्र्याःपुत्रंविततरोचि
षं ॥ स्वायंभुवोमुदाउक्तोरुचिर्जग्राहदक्षिणां ॥५॥ तांकामयानांभगवानुवाहयजुषांपतिः ॥ तुष्टायांतोष
मापन्नोऽजनयद्द्वादशात्मजान् ॥६॥

तुशब्दादन्यतोपिपुत्रलाभःसूचितस्तद्दर्शयितुमाह पुत्रिकाधर्ममाश्रित्येति अभ्रातृकांप्रदास्यामितुभ्यंकन्याम
लंकृतां अस्यांयोजायतेपुत्रोसमेपुत्रोभवेदितिभाषाबंधेनकन्यादानंपुत्रिकाधर्मः सचाभ्रातृकायांकन्यायांपुत्रार्थि
नएवप्रसिद्धस्तथाऽपिपुत्रबाहुल्यकामः तथाकृतवानित्याह भ्रातृमतीमपीति २ मिथुनंपुरुषंस्त्रियंचसमाधि
नाईश्वरध्यानेन ३ भूतेर्लक्ष्म्याअंशभूताअतस्तयोर्विवाहोविरुद्धइतिभावः ४ ५ यजुषांयज्ञानांमंत्राणांवापतिर्विष्णुः ६

भा० च०
२

कश्यपस्य वंशं षष्ठे वक्ष्यति द्वितीयस्य वंशमाह पूर्णिमेति देवकुल्यां नामकन्यां च हरेः पादप्रक्षालनाज्जन्मान्तरे या दिवः सरिद्गङ्गा अभूत्सा १४ आत्मेशब्रह्मसंभवान् विष्णुरुद्रब्रह्मणामंशैः संभवान् १५ किंचित्

पूर्णिमासूत विरजं विश्वगं च परंतप देवकुल्यां हरेः पादशौचाद्याभूत्सरिद्दिवः ॥ १४ ॥ अत्रेः पत्न्यनसूया
त्रीन् यज्ञे सुयशसः सुतान् दत्तं दुर्वाससं सोमम् आत्मेशब्रह्मसंभवान् ॥ १५ ॥ विदुर उवाच ॥ अत्रेर्गृहे
सुरश्रेष्ठाः स्थित्युत्पत्त्यन्तहेतवः किंचिच्चिकीर्षवो जाता एतदाख्याहि मे गुरो ॥ १६ ॥ श्रीमैत्रेय उवाच ॥ ब्रह्म
णा चोदितः सृष्टावत्रिर्ब्रह्मविदां वरः सहपत्न्या ययावृक्षं कुलाद्रिं तपसि स्थितः ॥ १७ ॥ तस्मिन्प्रसूनस्तबक
पलाशाशोककानने वार्भिः स्रवद्भिरुद्घुष्टे निर्विन्ध्यायाः समंततः १८ प्राणायामेन संयम्य मनो वर्ष
शतं मुनिः अतिष्ठदेकपादेन निर्द्वन्द्वोऽनिलभोजनः १९ शरणं तं प्रपद्येहं य एव जगदीश्वरः
प्रजामात्मसमां मह्यं प्रयच्छत्विति चिंतयन् २० तप्यमानं त्रिभुवनं प्राणायामैधसाग्निना निर्गतेन मुनेर्मूर्
र्ध्नः समीक्ष्य प्रभवस्त्रयः २१

त्म

किंस्वित् १६ इति वितर्के किंकर्तुमिच्छवः ऋक्षं नाम कुलाद्रिं तपसि स्थि
तः सन् १७ तस्मिन्कुलाद्रौ प्रसूनानां स्तवकाः येषु पलाशाशोके षु तेषां कानने निर्विंध्याना मनदी तस्याः स्रवद्भिर्वा
र्भिः उद्घुष्टे नादिते १८ १९ २० प्राणायाम एधः सदीपको यस्य तेन मुनेर्मूर्ध्नो निर्गतेनाग्निना तप्यमानं समीक्ष्य त्रयः

श्रमपदं यपुरित्युत्तरेणान्वयः २१

२

द्विषट् द्वादश ७ प्रसंगात्स्वायंभुवमन्वंतरगतं षट्कमाह तुषिता इति द्वाभ्यां मन्वंतरं मनुर्देवा मनुपुत्राः सुरेश्वराः
ऋषयोंऽशावताराश्च हरेः षड्विधमुच्यते इति वक्ष्यति तत्र स्वायंभुवो मनुः तुषिताः देवाः मरीचिप्रमुखाः ऋषयः यज्ञो
हरेरवतारः स एव सुरगणेश्वरः इंद्रः ८ प्रियव्रतोत्तानपादौ मनुपुत्रौ पृथ्वीपालकौ तदेव यज्ञस्य द्वैरूप्येण ष

तोषः प्रतोषः संतोषो भद्रः शांतिरिडस्पतिः इध्मः कविर्विभुः स्वह्नः सुदेवो रोचनो द्विषट् ७ तुषिता
नाम ते देवा आसन्स्वायंभुवांतरे मरीचिमिश्रा ऋषयो यज्ञः सुरगणेश्वरः ८ प्रियव्रतोत्तानपादौ मनु
पुत्रौ महौजसौ तत्पुत्रपौत्रनप्तॄणामनुवृत्तं तदंतरं ९ देवहूतिमदात्तात कर्दमायात्मजां मनुः तत्सं
बंधि श्रुतप्रायं भवता गदतो मम १० दक्षाय ब्रह्मपुत्राय प्रसूतिं भगवान्मनुः प्रायच्छद्यत्कृतः सर्गस्त्रिलोक्यां
विततो महान् ११ याः कर्दमसुताः प्रोक्ता नव ब्रह्मर्षिपत्नयः तासां प्रसूतिप्रसवं प्रोच्यमानं निबोध मे १२ प
त्नी मरीचेस्तु कला सुषुवे कर्दमात्मजा कश्यपं पूर्णिमानं च ययोरापूरितं जगत् १३

ड्विधत्वं तयोः पुत्रपौत्रनप्तृणां वंशैरनुवृत्तं व्याप्तं पालितं तत्तन्मन्वंतरं ९ श्रुतप्रायं बाहुल्येन श्रुतं तत्कन्या
वंशानामश्रुतत्वात्प्रायग्रहणम् १० प्रसूतिप्रसवपुत्रपौत्रादिभिर्विस्तारम् ११ १२ ययोर्वंशेनापूरितं १३

भा० च० ३

अस्य प्रपंचः एक इति विविधैः प्रधानैरुपचारैः विबुध प्रधान इति वा पाठः प्रजननाय पुत्रोत्पत्त्यै चित्रीकृतः चित्तेनैकं
नीतः मनसो दूराः अगोचराः संतः कथं नु त्रयोऽप्यत्रागताः २८ २९ ते त्वया यथा कृतः संकल्पस्तेन तथैव भाव्यं नान्य

एको मयेह भगवान्विविधप्रधानैश्चित्रीकृतः प्रजननाय कथं नु यूयं ॥ अत्रागतास्तनुभृतां मनसो
ऽपि दूराद्ब्रूत प्रसीदत महानिह विस्मयो मे ॥ २८ ॥ मैत्रेय उवाच ॥ इति तस्य वचः श्रुत्वा त्रयस्ते विबुधर्षभाः ॥ प्रत्या
हुः श्लक्ष्णया वाचा प्रहस्य तमृषिं प्रभो ॥ २९ ॥ देवा ऊचुः ॥ यथा कृतस्ते संकल्पो भाव्यं तेनैव नान्यथा सत्सं
कल्पस्य ते ब्रह्मन्यद्वै ध्यायति ते वयं ३० अथास्मदंशभूतास्ते आत्मजा लोकविश्रुताः भवितारोंग
भद्रं ते विस्रप्स्यंति च ते यशः ३१ एवं कामवरं दत्वा प्रतिजग्मुः सुरेश्वराः सभाजितास्तयोः सम्यग्दंपत्योर्मिष
तोस्ततः ३२ सोमोऽभूद्ब्रह्मणोंशेन दत्तो विष्णोस्तु योगवित् दुर्वासाः शंकरस्यांशो निबोधांगिरसः प्रजाः
३३ श्रद्धा त्वंगिरसः पत्नी चतस्रोऽसूत कन्यकाः सिनीवाली कुहू राका चतुर्थ्यनुमतिस्तथा ३४

था सत्संकल्पस्य ते संकल्पः न हि किं तु यमेकस्मिन्ध्यायमाने त्रयः प्रतीताः स्थ तत्राह यदेकं जगदीश्वरं त्वं तत्त्वं भवान्
ध्यायति त एते वयं त्रयोऽपि त्वद्दैवैकं तत्त्वं हि नास्माकं भेदोऽस्तीत्यर्थः ३० विस्रप्स्यंति विस्तारयिष्यंति अंतर्भूतणिजर्थस्य
सृप्लृ गतावित्यस्य रूपं ३१ ताभ्यां सम्यक् सभाजिताः संतः स्थानात्प्रतिजग्मुः ३२ निबोध बुध्यस्व ३३ ताः कन्या निर्दिशति

कं

३ [illegible] ४६

अप्सरः प्रमुखैर्वितायमानं विस्तीर्यमाणं यशो येषां ते २२ तेषां प्रादुर्भावः प्राकट्यं तस्य संयोगः संनिधिः तेन विद्योतितं मनो
यस्य उत्तिष्ठन् उत्कर्षेण तिष्ठन् ॥२३॥ अर्हणं पुष्पादिकं मंजलौ यस्य उपतस्थे पूजयामास वृषाद्यारूढान् स्वैः स्वैः चिह्नैः
त्रिशूलकमंडलुचक्रादिभिः ॥२४॥ कृपयावलोको यस्मिन् हसच्चेतद्वदनं च तेन उपलंभितान् प्रसन्नत्वेन ज्ञापितान् तेषां

अप्सरोमुनिगंधर्वसिद्धविद्याधरोरगैः वितायमानयशसस्तदाश्रमपदं ययुः २२ तत्प्रादुर्भावसंयोगविद्यो
तितमना मुनिः उत्तिष्ठन्नेकपादेन ददर्श विबुधर्षभान् २३ प्रणम्य दंडवद्भूमावुपतस्थेर्हणांजलिः वृष
हंससुपर्णस्थान्स्वैः स्वैश्चिह्नैश्च चिह्नितान् २४ कृपावलोकेन हसद्वदनेनोपलंभितान् तद्रोचिषा प्रति
हते निमील्य मुनिरक्षिणी २५ चेतस्तत्प्रवणं युंजन्नस्तावीत्संहतांजलिः श्लक्ष्णया सूक्तया वाचा सर्व
लोकगरीयसः ॥२६॥ अत्रिरुवाच ॥ विश्वोद्भवस्थितिलयेषु विभज्यमानैर्मायागुणैरनुयुगं विगृ
हीतदेहाः ते ब्रह्मविष्णुगिरिशाः प्रणतोस्म्यहं वस्तेभ्यः क एव भवतां म इहोपहूतः २७

रोचिषा दीप्त्या २५ श्लक्ष्णया मधुरया सूक्तया गंभीरार्थया २६ अनुयुगं कल्पे कल्पे विभज्य गृहीतो देहो यैः ते प्र
सिद्धा ब्रह्मविष्णुगिरिशा यूयं वः युष्मान् प्रणतोस्मि तेभ्यः सकाशादेक एव मे मया उपहूतः शरणं तं प्रपद्य इत्ये
कस्यैव निर्दिष्टत्वात् स च युष्मासु कः इति युष्माभिरेव कथ्यतामित्यर्थः २७

भा० च० तानेवाहधातामिति ४४ तयोः धातृविधात्रेः कविश्च भार्गवः भृगोः पुत्रः ४५ ४६ अजात्मजः ब्रह्मपुत्रः ४७ यु
४
आयतिं नियतिं चैव सुते मेरुस्तयोरदात् ताभ्यां तयोरभवतां मृकण्डः प्राण एव च ४४ मार्कंडेयो मृकंडस्य प्राणाद्वेदशिरा मुनिः कविश्च भार्गवो यस्य भगवानुशना सुतः ४५ सर्वे ते मुनयः क्षत्तर्लोकान्सर्गैरभावयन् एष कर्दमदौहित्रसंतानः कथितस्तव। शृण्वतः श्रद्दधानस्य सद्यः पापहरः परः ४६ प्रसूतिं मानवीं दक्ष उपयेमे ह्यजात्मजः तस्यां ससर्ज दुहितॄः षोडशामललोचनाः ४७ त्रयोदशादाद्धर्माय तथैकामग्नये विभुः पितृभ्य एकां युक्तेभ्यो भवायैकां भवच्छिदे ४८ श्रद्धा मैत्री दया शांतिस्तुष्टिः पुष्टिः क्रियोन्नतिः बुद्धिर्मेधा तितिक्षा ह्रीर्मूर्तिर्धर्मस्य पत्नयः ४९ श्रद्धासूत शुभं मैत्री प्रसादमभयं दया शांतिः सुखं मुदं तुष्टिः स्मयं पुष्टिरसूयत ५० योगं क्रियोन्नतिर्दर्पमर्थं बुद्धिरसूयत २७
मेधा स्मृतिं तितिक्षा तु क्षेमं ह्रीः प्रश्रयं सुतं ५१ मूर्तिः सर्वगुणोत्पत्तिर्नरनारायणावृषी ययोर्जन्मन्यदो विश्वमभ्यनंदत्सुनिर्वृतम् ५२ मनांसि ककुभो वाताः प्रसेदुः सरितोऽद्रयः दिव्यवाद्यंत तूर्याणि पेतुः कुसुमवृष्टयः ५३
क्तेभ्यः संयतेभ्यः मिलितेभ्यो वा ४८ ४९ ५० ५१ सर्वेषां गुणानामुत्पत्तिर्यस्यां सा ५२ ५३ रामराम ४

३५ पुलस्त्यश्चहविर्भूपत्न्यामित्यन्वयः सोगस्त्यः दह्राग्निर्जाठरोऽग्निः विश्रवाश्च पुलस्त्यस्यसुत इतिशेषः ३६
तस्यविश्रवसः इलविलायांजातःसुतःकुवेरः अन्यस्यांभार्य्यायांकेशिन्यांरावणादयस्त्रयःसुताः ३७ ३८ ज्वलतःप्रका

तत्पुत्रावपरावास्तांख्यातौस्वारोचिषेंतरे उतथ्योभगवान्साक्षाद्ब्रह्मिष्ठश्चबृहस्पतिः ३५ पुलस्त्यो
जनयत्पत्न्यामगस्त्यंचहविर्भुवि सोऽन्यजन्मनिदह्राग्निर्विश्रवाश्चमहातपाः ३६ तस्ययक्षपतिर्देवःकुवेर
स्त्विलविलासुतः रावणःकुंभकर्णश्चतथान्यस्यांविभीषणः ३७ पुलहस्यगतिर्भार्य्यात्रीनसूतसतीसु
तान् कर्मश्रेष्ठंवरीयांसंसहिष्णुंचमहामते ३८ क्रतोरपिक्रियाभार्य्यावालखिल्यानसूयत ऋषीन्षष्ठि
सहस्राणिज्वलतोब्रह्मतेजसा ३९ ऊर्ज्जायांजज्ञिरेपुत्रावशिष्ठस्यपरंतप चित्रकेतुप्रधानास्तेसप्तब्रह्मर्ष
योमलाः ४० चित्रकेतुःसुरोचिश्चविरजामित्रएवच उल्वणोवसुभृद्यानोद्युमान्शक्त्यादयोऽपरे ४१ चि
त्तिस्त्वथर्वणःपत्नीलेभेपुत्रंधृतव्रतं दध्यंचमश्वशिरसंभृगोर्वंशंनिबोधमे ४२ भृगुःख्यात्यांमहाभा
गःपत्न्यांपुत्रानजीजनत् धातारंचविधातारंश्रियंचभगवत्परां ४३

शमानान् ३९ चित्रकेतुप्रमुखाजज्ञिरे तेचसप्तर्षयोजाताः ४० तानेवाहचित्रकेतुरिति वसुभृद्यानोनामै
कः शक्त्यादयोऽपरेऽन्यस्याःपुत्राः ४१ ४२ ख्यात्यांपत्न्यांपुत्रान्पुत्रौपुत्रींच ४३

भा० द०
५

अग्न्यभिमानिनोदेवान् स्वाहानामतस्यभार्य्या हुतभोजनमितित्रयाणांविशेषणं ५९ पितरस्त्रयः पितामहाएकः
तैःसाकंसह ६० वैतानिकेवैदिकेकर्म्मणियन्नेयेषांनामभिरग्निदेवताकाइष्टयोनिरूप्यन्ते क्रियन्तेऽनग्नयोनलौकि
काः अतोवह्नीनांनवैयर्थ्यमितिभावः ६१ सौम्याःसोमपाः येषामग्नौकरणमस्ति तेसाग्नयः तद्रहितास्त्वनग्नयः ६२

स्वाहाभिमानिनश्चाग्निरात्मजांस्त्रीनजीजनत् पावकंपवमानंचशुचिंचहुतभोजनं ५९ तेभ्योग्नयः
समभवन्चत्वारिंशच्चपंचच तएवैकोनपंचाशत्साकंपितृपितामहैः ६० वैतानिकेकर्मणियन्नामभिर्ब्रह्म
वादिभिः आग्नेय्यइष्टयोयज्ञेनिरूप्यंतेग्नयस्तुते ६१ अग्निष्वात्ताबर्हिषदःसौम्याःपितरआज्यपाः
साग्नयोऽनग्नयस्तेषांपत्नीदाक्षायणीस्वधा ६२ तेभ्योदधारकन्येद्वेवयुनांधारिणींस्वधा उभेतेब्रह्म
वादिन्यौज्ञानपारगे ६३ भवस्यपत्नीतुसतीभवंदेवमनुव्रता आत्मनःसदृशंपुत्रंनलेभेगुणशीलतः ६४
ज्ञानवि३
भवस्यपत्नीतुसतीभवंदेवमनुव्रता आत्मनःसदृशंपुत्रंनलेभेगुणशीलतः ६४ पितर्य्यप्रतिरूपेस्वे
भवायानागसेरुषा अप्रौढैवात्मनात्मानमजहाद्योगसंयुता ॥ ६५ ॥ इतिश्रीमद्भागवतेमहापुराणेचतु
र्थस्कंधेप्रथमोध्यायः ॥ १ ॥
तयोस्तुसंततिर्नाभवत् जीवन्मुक्तत्वादित्याह उभेइति ६३ गुणशीलतःआत्मनः सदृशंदेवमनुव्रताऽपिसती
पुत्रंनलेभे ६४ तत्रहेतुः स्वेपितरिदक्षेअप्रतिरूपे असदृशेप्रतिकूलेसतीत्यर्थः आत्मनास्वयमेवात्मानंदेहम
जहात् त्यक्तवती योगसंयुतायोगमाश्रितेति ॥ ६५ ॥ इति चतुर्थेप्रथमोध्यायः ॥ १ ॥ रामरामरामरामरामरामराम ॥

उपतस्थुः भेजुः ५४ निजमाययायस्मिन्नात्मनि खे गगने रूपभेदं गंधर्वनगरमिवेदं विश्वं रचितं तस्यात्मनः प्रतिचक्ष
णाय प्रकाशनाय आत्मानं यो ऽद्य आविश्चकार प्रकटितवान् तस्मै पुरुषाय नमः केन रूपेण प्रादुश्चकार ऋषेर्मूर्त्तिराकारो य
स्मिन् तेन रूपेण ५५ सायं नो ऽस्मान् सुरगणान् अनल्पकरुणायुक्तेन विलोकनेन विशिष्टेन नेत्रेण दृश्यात् पश्यतु कथं

मुनयस्तुष्टुवुस्तुष्टा जगुर्गंधर्वकिन्नराः नृत्यंति स्म स्त्रियो देव्य आसीत्परममंगलम् देवा ब्रह्मादयः स
र्वे उपतस्थुरभिष्टवैः ५४ यो मायया विरचितं निजयात्मनीदं खे रूपभेदमिव तत्प्रतिचक्षणाय एतेन
धर्मसदने ऋषिमूर्त्तिनाद्य प्रादुश्चकार पुरुषाय नमः परस्मै ५५ सोयं स्थितिव्यतिकरोपशमाय
सृष्टान्सत्वेन नः सुरगणाननुमेयतत्वः दृश्याददभ्रकरुणेन विलोकनेन यच्छ्रीनिकेतममलं क्षिपता
रविंदं ५६ एवं सुरगणैस्तात भगवंतावभिष्टुतौ लब्धावलोकैर्ययतुरर्च्चितौ गंधमादनम् ५७
ताविमौ वै भगवतो हरेरंशाविहागतौ भारव्ययाय च भुवः कृष्णौ यदुकुरूद्वहौ ५८

भूतेन यच्छ्रीनिकेतममलमरविंदं तत् क्षिप
तातिरस्कुर्वता कथंभूतः अनुमेयं शास्त्रतो विचार्य्य न त्वस्माकं प्रत्यक्षं तत्वं यस्य किंभूतान् अस्मान् स्थितिर्जगन्मर्या
दा या व्यतिकरो ऽन्यथात्वं तस्योपशमाय सत्वेन गुणेन सृष्टान् ५६ लब्धो अवलोको यैः सुरगणैः तैरभिष्टुतौ ययतुः ५७
भुवो भारस्य व्ययाय नाशाय चकार एकवाक्यत्वार्थः तौ सांप्रतमिहागतावित्यर्थः तदुक्तं तंत्रे अर्ज्जुने तु नरावेशः कृष्णो ना
रायणः स्वयमिति यदूद्वहः श्रीकृष्णः कुरूद्वहो ऽर्ज्जुनः उभावपि कृष्णनामानौ ५८

भा ३

भो०च०
६

मेवचनंश्रूयतां अज्ञानामत्सरपूर्वकं ब्रुवतः ९ त्वद्वचनेनउचितक्रियाभ्रष्टेन ध्वस्तेनेतिपाठे भ्रष्टेन १० तदेवाह एष
इति यद्यस्मात् विप्राग्निसमक्षं सावित्रीतुल्यायाः मेदुहितुः पाणिमग्रहीत् ११ मृगशावस्यहरिणस्यबालस्याक्षिणी

श्रूयतांब्रह्मर्षयोमेसहदेवाःसहाग्नयः साधूनांब्रुवतोऽनेनाज्ञानान्नचमत्सरात् ९ अयंतुलोकपाला
नांयशोघ्नोनिरपत्रपः सद्भिराचरितःपंथाएनन्तेच्छेनदूषितः १० एषमेशिष्यतांप्राप्तोयन्मेदुहितुर
ग्रहीत् पाणिंविप्राग्निमुखतःसावित्र्याइवसाधुवत् ११ गृहीत्वामृगशावाक्ष्याःपाणिंमर्कटलोचनः
प्रत्युत्थानाभिवादार्हेवाचाप्यकृतनोचितं १२ लुप्तक्रियायाश्शुचयेमानिनेभिन्नसेतवे अनिच्छन्न
प्यदांबालांशूद्रायेवोशतींगिरं १३ प्रेतावासेषुघोरेषुप्रेतैर्भूतगणैर्वृतः अटत्युन्मत्तवन्न
ग्नोव्युप्तकेशोहसन्रुदन् १४ चिताभस्मकृतस्नानःप्रेतस्रक्नृत्रस्थिभूषणः शिवापदे
शोह्यशिवोमत्तोमत्तजनप्रियः पतिःप्रमथभूतानांतमोमात्रात्मकात्मनाम् १५

वाक्षिणीयस्याः प्रत्युत्थानाभिवादार्हे मयिउचितंसन्मानंवाचापिनाकरोत् १२ अनर्हायकन्यादत्तेत्यतप्यमा
नआह लुप्तक्रियायेति सार्द्धंश्लोकैस्त्रिभिः उशतींवेदलक्षणांगिरं १३ प्रेतावासेषु व्युप्ताविकीर्णाकेशायस्य १४ चिताभ
स्मना कृतंस्नानंयेन प्रेतानांस्रजोमाल्यानियस्यसःप्रेतस्रक् नराणामस्थीनिभूषणानियस्य शिवइत्यपदेशोनाममात्रंय
स्य तमोमात्रात्मकः केवलंतमोरूपआत्मास्वभावोयस्य १५

६

जगतो दैवतं ३

चतुर्थे द्वितीयाध्याये पक्षभेभवदक्षयोः विद्वेषवर्ण्यते हेतुर्विश्वसृज्यज्ञसंभवः सतीसतीनाम्नी १ नचासीक
स्यचिद्वेषार्ह इत्याह क इति चराचरगुरुं को द्वेष्टि कथं च निर्वैरत्वे हेतुः भावे क्तः शांतिरेव विग्रहो यस्य कुतः आ
त्मन्येवाराम आरामो निर्वैरस्य तं यद्वा कः प्रजापतिर्दक्षः कथं द्वेष्टि एवंभूते तस्मिन्द्वेषोऽयुक्तोऽशक्यश्चेत्यर्थः २ यतो द्वे

विदुर उवाच ॥ भवे शीलवतां श्रेष्ठे दक्षो दुहितृवत्सलः विद्वेषमकरोत्कस्मादनादृत्यात्मजां सतीं
१ कस्तं चराचरगुरुं निर्वैरं शांतविग्रहं आत्मारामं कथं द्वेष्टि जगतो दैवतं महत् ॥ २ ॥ एतदाख्याहि मे
ब्रह्मन् जामातुः श्वसुरस्य च विद्वेषस्तु यतः प्राणांस्तत्यजे दुस्त्यजान्सती ॥ ३ ॥ श्रीमैत्रेय उवाच ॥ पुरा विश्व
सृजां सत्रे समेताः परमर्षयः तथामरगणाः सर्वे सानुगा मुनयोऽग्नयः ४ तत्र प्रविष्टमृषयो दृष्ट्वार्कमि
व रोचिषा भ्राजमानं वितिमिरं कुर्वंतं तन्महत्सदः ५ उदतिष्ठन्सदस्यास्ते स्वधिष्ण्येभ्यः सहाग्नयः ऋ
ते विरिंचिं शर्वं च तद्भासाक्षिप्तचेतसः ६ सदसस्पतिभिर्दक्षो भगवान्साधु सत्कृतः अजं लोकगुरुं न
त्वा निषसाद तदाज्ञया ७ प्राङ्निषण्णं मृडं दृष्ट्वा नामृष्यत्तदनादृतः उवाच वामं चक्षुर्भ्यामभिवीक्ष्य द
हन्निव ८

षो विद्वेषः यतो विद्वेषात्प्राणांस्तत्याज एतदाख्याहि ३ तदेवाख्यातुमितिहासं प्रस्तौति पुरेति समे
ता आसन् ४ प्रविष्टं दक्षमिति शेषः महत्सदः महतीं सभां स्वधिष्ण्येभ्यः स्वासनेभ्यः ६ ७ प्राक् स्वोपवेशनात् पूर्वमेव
निषण्णमुपविष्टं मृडं शिवं तदनादृतः तेनाभ्युत्थानादिभिरकृतादरः नामृष्यत न असहत वामं वक्रं यथा भवति तथाभि

गिरिशस्यानुगानामग्रणीर्मुख्यः सेषएवकषायस्तेनदूषितः आरक्तनेत्रइत्यर्थः तस्यगिरिशस्यवाच्यतां वचनार्ह
तांनिंद्यतामित्यर्थः तेभ्यः शापंविससर्ज २० द्वादशपंक्तिसार्द्धैस्त्रिभिः एतन्मर्त्यंदक्षशरीरं उद्दिश्यश्रेष्ठंमत्वा अ
प्रतिद्रुहिस्वप्रतिद्रोहकुर्वति पृथग्दृष्टिः भेददर्शीनतत्त्वतः परमार्थात् २१ अन्यत्वमेवाह गृहेष्विति कर्मतंत्रंकर्मप
रिकरं वेदेयेवादाअर्थवादा अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवतीत्यादयस्तैर्विनष्टाधीर्यस्य २२ परोदेहादिः

विज्ञायशापंगिरिशानुगाग्रणीर्नंदीश्वरोरोषकषायदूषितः दक्षायशापंविससर्जदारुणंयेचान्वमोदं
स्तदवाच्यतांद्विजाः २० यएतन्मर्त्यमुद्दिश्यभगवत्यप्रतिद्रुहि द्रुह्यत्यज्ञःपृथग्दृष्टिस्तत्त्वतोविमु
खोभवेत् २१ गृहेषुकूटधर्मेषुसक्तोग्राम्यसुखेच्छयाकर्मतंत्रंवितनुतेवेदवादविपन्नधीः बुद्ध्या
पराभिध्यायिन्याविस्मृतात्मगतिःपशुःस्त्रीकामःसोऽस्त्वतितरांदक्षोबस्तमुखोऽचिरात् २३ विद्याबुद्धिर
विद्यायांकर्ममय्यामसौजडः संसरंत्विहयेचामुमनुसर्वावमानिनः २४

तमेवात्मत्वेनाभितोध्यातुंशीलंयस्यास्तयाबुद्ध्याविस्मृताआत्मनोगतिस्तत्त्वंयेन अतःपशुतुल्यः अतितरांस्त्रीकामो
ऽस्त्विति द्वितीयःशापः २३ अयंचशापोऽस्यानुरूपएवेत्याह विद्याबुद्धिः इयमेवतत्त्वविद्येतिबुद्धिर्यस्य अतोसो
जडएवद्विजान्पश्यति संसरंत्विति सार्द्धद्वाभ्यां अर्चमेवमन्यंतइति तथातत्तमसुंदक्षंयेचानुवर्तंते तेसंसरंतु
जन्ममरणाद्यनुभवंत्वित्येकःशापः २४

उन्मादा भूतविशेषास्तेषां नाथाय दुर्हृदे दुष्टचित्ताय वतेति खेदे वास्तवस्त्वयमर्थः त्वुन्माः क्रिया यस्मिन् परब्रह्मरूपत्वात्
अत एव नास्ति शुचिर्यस्मात् अमानिने अभिन्नसेतव इति वा छेदः तस्य परमेश्वरस्य मदीया मानुषी कन्या कथं योग्या स्यादि
ति लज्जादिना दातुमनिच्छन्नपि तत्संबंधलोभेन दत्तवान् अरुद्राय इत्यनर्हत्वमात्रे दृष्टांतः नहीनत्वे पूर्वापरस्ववचनविरो
धापत्तेः एतदुक्तं भवति यथा कश्चिच्छूद्राय वेदमर्थलोभेन ददाति प्रेतावासाय साध्वीत्यादि सर्वं विडंबनमात्रमिति स्व
यमेवाह उन्मत्तवदिति अन्यथा उन्मत्ते इत्येषा वद्यत् अशिवः नास्ति शिवो यस्मात् अप्रमत्ते अप्रमत्तजनप्रिय इतिष्ठ

तस्मादुन्मादनाथायनष्टशौचायदुर्हृदे दत्तावतमयासाध्वीचोदितेपरमेष्ठिना ॥१६॥ श्रीमैत्रेय उवाच ॥
विनिंद्यैवंसगिरिशमप्रतीपमवस्थितं दक्षोथापउपस्पृश्यक्रुद्धःशप्तुंप्रचक्रमे ॥१७॥ अयंतुदेवयज
नइंद्रोपेंद्रादिभिर्भवः सहभागंनलभतांदेवैर्देवगणाधमः ॥१८॥ निषिध्यमानःसंसदस्यमुख्यैर्दक्षोगि
रित्रायविसृज्यशापं तस्माद्विनिष्क्रम्यविवृद्धमन्युर्जगामकौरव्यनिजंनिकेतनं १९

दःपतिः प्रमथभूतानामिति भक्तवात्सल्यमाह नामसा नामपि दोषमपनीय यानीति नष्टानामपि शौचं सिद्धिर्यस्मात्
दुष्टेष्वपि एते मयानुकंप्या इति हृन्मनो यस्य स दुर्हृत् तस्मै वतेति हर्षे ब्रह्मणो वाक्याल्लोभयादिके परित्यज्य दत्तेत्य
र्थः १६ अप्रतीपं अप्रतिकूलं यथा भवत्येवमवस्थितमपि विनिंद्य १७ देवानां यजनसमये देवैः सह भागं न लभतां किं
तु तेभ्यः पूर्वमेव लभतां अग्रे भोजित्वात् यद्वा तेषु भक्तवत्सलभक्तं सर्वपोषकत्वात् तत्र हेतुः देवगणोऽधमो यस्मात् सः

भा० च०
८

सेतुत्वं प्रपंचयति द्वाभ्यां ॥ एष वेददलद्धराणा एव शिवः पंथाः यं पूर्वे ऋषयः ॥ अनुसंतस्थुः आश्रितवंतः ॥ यस्मिन् जनार्दनः
प्रमाणं मूलं ॥ ३१ ॥ भूतराट् ॥ भूतानां तामसानां पतिः ॥ भ्रान्त्यान्य शापेनोभयोनाद्धिमनाः ॥ ३२ ॥ वेतित्तथापि भगवदनुग्रहीतो
नां नाशो न स्यादिति भावः ॥ ३३ ॥ ऋषभः सर्वश्रेष्ठो हरिर्यत्र इज्यः तस्तत्र सम्यग्व्यधाय ॥ हेमहेष्वास विदुर ॥ ३४ ॥ यत्र

एष एव हि लोकानां शिवः पंथाः सनातनः ॥ यं पूर्वे चानुसंतस्थुर्यत्प्रमाणं जनार्दनः ॥ ३१ ॥ तद्ब्रह्म परमं शु
द्धं सतां वर्त्म सनातनं ॥ विगर्ह्य यात पाषंडं दैवं वो यत्र भूतराट् ॥ ३२ ॥ श्री मैत्रेय उवाच ॥ तस्यैवं वदतः शा
पं भृगोः स भगवान्भवः ॥ निश्चक्राम ततः किंचिद्विमना इव सानुगः ॥ ३३ ॥ तेपि विश्वसृजः सत्रं सहस्र
परिवत्सरान् ॥ संविधाय महेष्वास यत्रेज्य ऋषभो हरिः ॥ ३४ ॥ आप्लुत्यावभृथं यत्र गंगा यमुनयान्विता
विरजेनात्मना सर्वे स्वं स्वं धाम ययुस्ततः ॥ ३५ ॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे दक्षशापो द्वितीयोध्यायः ॥ २ ॥ श्री मैत्रेय उवाच ॥ सदा विद्विषतोरेवं कालो वै ध्रियमाणयोः जामातुः श्वशुरस्यापि सुमहा
नतिचक्रमे १ यदाभिषिक्तो दक्षस्तु ब्रह्मणा परमेष्ठिना प्रजापतीनां सर्वेषामाधिपत्ये स्मयोभवत् २

यागेश्वान्विता तत्रावभृथस्नानं कृत्वा ततः स्थानात् ययुः ॥ ३५ ॥ इति चतुर्थे द्वितीयः ॥ २ ॥ तृतीये तु सतीं तातयज्ञोत्सव
दिदृक्षया गमिष्यंतीं महेशेन वारितानी तिहेतुभिः ध्रियमाणयोः अवतिष्ठमानयोः द्वंद्वस्यानेहस्त्यस्मात् १ ॥
द्विविही नोयज्ञो नास्त्येव तथापि दक्षस्य रुद्रपरित्यागाद्वेषाग्रवीच्च तत्र द्वेषे हेतुरुक्तः गर्वहेतुमाह यदा तु प्रजापतीनामा

श्रीधरस्वामिकृतः [illegible] ४

८

श्रुतायावेदरूपायाःपुष्पिण्याःपुष्पाणीवार्थवादामनःक्षोभकत्वात् अर्थवादवाहुल्यायाइत्यर्थः मधुगंधतुल्ये
नप्ररोचनेनमध्वामनःक्षोभकेनतन्मथितआत्मामनोयेषांतेसंमुह्यंतुकर्मस्वासक्ताभवंत्वितिद्वितीयशापः २५
सर्वभक्ष्याः भक्ष्याभक्ष्यविचारशून्याः वृत्त्यैदेहादि[illegible]पोषणायधृतानिविद्यातपोव्रतानियैः वित्तादिष्वेवारामोर
तिर्येषांतेयाचकाःसंतोविचरंतुइतिशापचतुष्टयं २६ प्रत्यसृजत् प्रत्यस्त्रंअभेदात् शापरूपंब्रह्मदंडं २७ सच्छास्त्रस्य

गिरःश्रुतायाःपुष्पिण्यामधुगंधेनभूरिणा मथ्नाचोन्मथितात्मानःसंमुह्यंतुहरद्विषः २५ सर्वभक्षा
द्विजावृत्त्यैधृतविद्यातपोव्रताः वित्तदेहेंद्रियारामायाचकाविचरंत्विह २६ तस्यैवंवदतःशापंश्रुत्वाद्वि
जकुलायवै भृगुःप्रत्यसृजच्छापंब्रह्मदंडंदुरत्ययं २७ भवव्रतधरायेचयेचतान्समनुव्रताः पाष
डिनस्तेभवंतुसच्छास्त्रपरिपंथिनः २८ नष्टशौचामूढधियोजटाभस्मास्थिधारिणः विशंतुशिव
दीक्षायांयत्रदैवंसुरासवं २९ ब्रह्मचब्राह्मणांश्चैवयद्यूयंपरिनिंदथ सेतुंविधारणंपुंसामतःपाषं
डमाश्रिताः ३०

परंपंथिनःप्रतिकूलाः २८ सुरागौडीपैष्टीमाध्वीच आसवस्तालादिसंभवं मद्यंतद्दैवत्वात्
पंडत्वं यत्रदैवंयुज्यं देवतावदादरणीयमितिवा २९ ब्रह्मवेदं कथंभूतंसेतुं मर्यादारूपं तद्देवाह पुं
साम् वर्णाश्रमाचारवतांविधारकम् ३०

औत्सुक्यं प्रकटयंत्याह॥ तस्मिन्निति षड्भिः पितृभ्यामुपनीतं दत्तं परिवर्हमलंकारादिद्रव्यं भवता सह अर्हितुं स्वीक
र्तुं कामये अर्हितमिति पाठे सत्कृतं पारिवर्हमिच्छामि इति ९ स्वसॄर्भगिनीः भर्तृभिः संमिताः सदृशीः क्लिन्नधियं
स्नेहार्द्रचित्तां चिरमुत्कंठमुत्सुकं मनो यस्याः साहं द्रक्ष्यामि हे मृड उन्नीयमानं प्रवर्त्यमानं अध्वरे ध्वजमिव हर्षं श्रेष्ठ
मध्वरं यद्वा उत्क्षिप्यमानं यज्ञकेतुयूपं वा १० अहो तत्र किमाश्चर्यं येन त्वं वैतदौत्सुक्यमिति चेत् अत आह त्वयी

तस्मिन्भगिन्यो मम भर्तृभिः स्वकैर्ध्रुवं गमिष्यंति सुहृद्दिदृक्षवः अहं च तस्मिन्भवताच कामये सहोप
नीतं परिवर्हमर्हितुं ९ तत्र स्वसॄर्मेननु भर्तृसंमिता मातृस्वसॄः क्लिन्नधियं च मातरं द्रक्ष्ये चिरो
त्कंठमना महर्षिभिरुन्नीयमानं च मृडाध्वरध्वजं १० त्वय्येतदाश्चर्यमजात्ममायया विनिर्मितं भा
ति गुणत्रयात्मकं अथाप्यहं योषिदतत्त्वविच्च ते दीना दिदृक्षे भव मे भवक्षितिं ११ पश्य प्रयांतीरभवान्य
योषितोप्यलंकृताः कांतसखा वरूथशः यासां व्रजद्भिः शितिकंठ मंडितं नभो विमानैः कलहंसपांडुभिः १२

ति हे अज एतद्विश्वमाश्चर्यं रूपं त्वय्येव त्वन्मायया रचितं विभाति अतो यद्यपि तवानाश्चर्यबुद्धिः यथाप्यहं योषित् उत्सुक
स्वभावात् तत्त्वं न जानामि अतो दीना कृपणा सती हे भव मे भवक्षितिं जन्मभूमिं दिदृक्षे द्रष्टुमिच्छामि ११ दिदृक्षामेवं के
मुत्यन्यायेनाह पश्येति द्वाभ्यां हे अभवेति सुहृद्विप्रयोगदुःखं त्वया न स्वादितमिति भावः अन्या योषितः संबन्धरहिताः
पश्य कांतसखा भर्तृसहिताः वरूथशः संघशः कथंभूताः यासां विमानैर्नभो मंडितं ताः हे शितिकंठ नीलकंठेति परा

र्वीदेवब्रह्मविशिष्टान्सेश्वरानभिभूय तिरस्कृत्य वाजपेयेनेष्ट्वा बृहस्पतिसवेनेति श्रुतेर्वाजपेयेनेष्ट्वा समारेभे ३ कृतस्व
स्त्ययनाः कृतमंगलाः सभर्तृकाइति दक्षादिभिः प्रथमं सत्कृतानामपि तत्पत्न्यर्हीणपुनर्हीणमुक्तं ४ तत्र दाक्षे-यरा
णांप्रजल्पतां सतीं पितृयज्ञमहोत्सवं श्रुत्वा ५ तत्र व्रजंतीरुपदेवानां वरस्त्रियश्च स्वस्य निलयस्याभ्यासे समीपे दृष्ट्वात्रे

दृष्ट्वा स वाजपेयेन ब्रह्मिष्ठानभिभूय च बृहस्पतिसवं नाम समारेभे क्रतूत्तमं ३ तस्मिन्ब्रह्मर्षयः सर्वे
देवर्षिपितृदेवताः आसन्कृतस्वस्त्ययनास्तत्पत्न्यश्च सभर्तृकाः ४ तदुपश्रुत्य नभसि खेचराणां प्रज
ल्पतां सती दाक्षायणी देवी पितुर्यज्ञमहोत्सवं ५ व्रजंतीः सर्वतो दिग्भ्य उपदेववरस्त्रियः विमानयानाः
सप्रेष्ठा निष्ककंठीः सुवाससः ६ दृष्ट्वा स्वनिलयाभ्यासे लोलाक्षीर्मृष्टकुंडलाः पतिं भूतपतिं देवमौत्सुक्या
दभ्यभाषत ७ सत्युवाच प्रजापतेस्ते श्वशुरस्य सांप्रतं निर्यापितो यज्ञमहोत्सवः किल वयं च तत्राभि
सराम वाम ते यद्यर्थितामी विबुधा व्रजंति हि ८

त्सुक्यात्पतिमभ्यभाषसेति त्रयाणामन्वयः कथंभूतास्त्रियो दृष्ट्वा विमानानि यानानि यासां ताः निष्कानि पदकानि
कंठेषु यासां शोभनानि वासांसि यासां ६ लोलानि चंचलानि अक्षीणि यासां मृष्टानि उज्ज्वलानि कुंडलानि यासां ताः
७ निर्यापितः प्रवर्तितः हे वाम शिव यद्यर्थिता इच्छा न हि वयं च तत्राभिसराम गच्छाम न चाद्यापि योगो निरंतरं यतो

कं

२

ननु विद्यादिगुणयुक्तो दक्षस्त्वाहशेषु महत्सु कथं दोषदृष्टिर्भवेत्तत्राह विद्यादिभिरेव स्मृतौ हतायां विवेकज्ञा
नेन ष्टे सति भूयसां महत्तमानां धाम तेजो न पश्यंतीति हि ननु गुणैः कथं विवेकनाशस्तत्राह सतां गुणैः विवेक
हेतुभिरपि असत्तमानामितरैः दोषभूतैः अत एव तैर्भृतः धृतः पुष्टो वा अहं विद्वान् तापस इत्यादि मानो गर्व
स्तेन दुष्टा दृष्टिर्येषां ते १७ स्वजनव्यपेक्षया बंधुदृष्ट्या गृहान्न प्रतीयात् नावलोकयेत् अनवस्थितचित्तत्वमेवाह

विद्यातपोवित्तवपुर्वयःकुलैः सतां गुणैः षड्भिरसत्तमेतरैः स्मृतौ हतायां भृतमानदुर्दृशः स्तब्धा
न पश्यंति हि धाम भूयसां १७ नैतादृशानां स्वजनव्यपेक्षया गृहान्प्रतीयादनवस्थितात्मनां येऽभ्याग
तान्वक्रधियाभिचक्षते आरोपितभ्रूभिरमर्षणाक्षिभिः १८ तथारिभिर्न व्यथते शिलीमुखैः शेतेऽर्दितां
गो हृदयेन दूयता स्वानां यथा वक्रधियां दुरुक्तिभिर्दिवानिशं तप्यति मर्मताडितः १९ व्यक्तं त्वमुत्कृष्टग
तेः प्रजापतेः प्रियात्मजानामसि सुभ्रु संमता अथापि मानं न पितुः प्रपत्स्यसे मदाश्रयात्कः परितप्यते यतः २०

ये वक्रधिया कुटिलया बुद्ध्या पश्यंति आरोपितं ताडितं भिन्नाभ्रूर्येषु तान्यारोपितभ्रूणि तैः आरोपिताभिर्भ्रूभिरिति
वा १८ ननु स्वजनानां गृहे सुहृद्भिर्गंतव्यं तेषां दुश्चेष्टितं च सोढव्यं न तत्स्यदुःसहत्वादित्याह तथेति अरिभिः शिली
मुखैर्बाणैरर्दितांगः खंडितगात्रोपि तमव्यथने शेते स्वपिति स्वानां दुरुक्तिभिर्मर्मसु ताडितो पियथा दूयता व्यथमा
नेन हृदादिना वा निशं तप्यति १९ मयि तत्र गतायां नेयं शंकेति चेत्तत्राह व्यक्तं निश्चितं उत्कृष्टा गतिः स्थितिर्यस्य तस्य

[त्मजानां कन्यानां मध्ये त्वं प्रियेति संमतासि पितुः
सकाशात् मानं न लप्स्यसे मदाश्रयात् मत्संबंधात् २०]

तदाहेसुरम्यस्वपितृगेहोत्सवं निशाम्य सुतायादेहं कथं नेंगन्ते द्रष्टुं न प्रचलति तथाप्यनादृताः संततः कथं गच्छाम
स्तत्राह सोहृदं सुहृदः केतनं च गृहं तथा भर्त्रादीनां च गृहं अनादृता अप्यभियंति संततः सुहृत्स्वभार्या १३ हे अमर्त्यैत
त्तस्मात्प्रसीद इदं मे वांछितं कर्तुं भवान्नार्हति कारुणिकत्वमेवाह अदभ्रचक्षुषा अनल्पज्ञानिनापि त्वया आत्मनो
देहस्यार्द्धे ऽहं निरूपिता धन्ता यतो ऽर्द्धनारीश्वर इति विख्यातोसि अतो मां मा अनुगृहाण याचितः सन् १४ अभिभाषितो
ऽभियाचितः कः दत्तः यानाहृ मर्मभिदं तियेतान् कुवागिषून् दुरुक्तिवाणान् संस्मारितः सन् १५ अनादृतो अपीति त्वया यदुदि
कथं सुतायाः पितृगेहकौतुकं निशम्य देहः सुरवर्य नेंगते । अनादृता अप्यभियंति सोहृदं भर्तुर्गुरोर्देहकृतश्च केतनं १३
तन्मे प्रसीदेदममर्त्य वांछितं कर्तुं भवान्कारुणिको वनार्हति । त्वयात्मनोऽर्द्धेहमदभ्रचक्षुषा निरूपिता मानुगृहाण
याचितः १४ ॥ ऋषिरुवाच ॥ एवं गिरित्रः प्रियया ऽभिभाषितः प्रत्यभ्यधत्त प्रहसन्सुहृत्प्रियः ॥ संस्मारितो मर्मभिदः कुवा
गिषून्यानाह को विश्वसृजां समक्षतः ॥ १५ ॥ श्रीभगवानुवाच ॥ त्वयोदितं शोभनमेव शोभने अनादृता
अप्यभियंति बंधुषु ते यद्यनुत्पादितदोषदृष्टयो बलीयसाऽनात्म्यमदेन मन्युना १६ नम १
नम उक्तं तच्छोभनमेव किंतु अनात्म्यं देहादावहंकारः तत्कृतेन मदेन मन्युना च ते वंधवो यद्य
नुत्पादितदोषदृष्टयो भवंति तर्हि तदुत्पादितेन आरोपिते दोषे दृष्टिर्येषां ते १६ रामरामरामरामराम
रामरामरामरामरामरारामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरामरम

तस्मात्त्वया न निरीक्षणीयाः देहकृदपीति पोषकत्वादिभिः शेषं चारि कपितृत्यावत्यर्थे द्विदृक्षुः तदेवाह हे वरोरु योदक्षः विश्व
सृजां पत्युर्गणं मां विरापरा धं तिरोऽकरोत् तिरस्कृतवान् २४ विपक्षे दोषमाह यदीति मद्वचोऽतिहाय॥ अतिक्रम्य यतः सं
भावितस्य सुप्रतिष्ठितस्य पराभवो भवति तदा स पराभवः तस्य मरणाय कल्पते॥२५॥ इति चतुर्थे तृतीयः॥३॥ चतुर्थे तप

ते तेनिरीक्ष्यो न पितापि देहकृद्दक्षो मम द्विट् तदनुव्रताश्च ये॥ यो विश्वसृक् यज्ञगतं वरोरु मामनागसं दुर्वचसाकरोत्तिरः २४ यदि व्रजिष्यस्यतिहाय मद्वचो भद्रं भवत्या न ततो भविष्यति॥ संभावितस्य स्वजनात्पराभवो यदा स सद्यो मरणाय कल्पते॥२५॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे उमारुद्रसंवादे तृतीयोध्यायः॥३॥ श्रीमैत्रेय उवाच॥ एतावदुक्त्वा विरराम शंकरः पत्न्यंगनाशं ह्युभयत्र चिंतयन्॥ सुहृद्दिदृक्षुः परिशंकिता भवान्निष्क्रामती निर्विशती द्विधास सा १ सुहृद्दिदृक्षाप्रतिघातदुर्मनाः स्नेहाद्रुदत्यश्रुकलातिविह्वला भवं भवान्यप्रतिपूरुषं रुषा प्रधक्ष्यतीवैक्षत जातवेपथुः २॥ ॐ

तिं हित्वा गता पित्रावमानिता रुषा निर्भर्त्स्य तं यज्ञे जहौ देहमिति नीयते उभयत्र अनुज्ञानेवलात्निवारणं च सु
हृद्दिदृक्षुः निष्क्रामती भवात्परिशंकिता पुनर्निविशती च तदा सा सती द्विधा आस बभूव १ सुहृदां दिदृक्षायाः प्रति
घातेन दुर्मनाः अश्रूणां कलाभिः लेशैः अतिविह्वला श्रोकुला अप्रतिपूरुषं स्वसमानपुरुषांतररहितं प्रधक्ष्यतीव॥
रुषा जातो वेपथुः कंपो यस्याः २

ननु भगवन्त्वया किमिति दक्षः तिरस्कृतः यतोऽसौ त्वां द्वेष्टि अत आह पापच्यमानेन हृदा अलं दह्यमानेन हृदा दुःखितेंद्रियः
पुरुषा जीवास्तस्य बुद्धिभिः तैर्न स्तोत्रिणं निरहंकारिणमित्यर्थः समृद्धिभिः पुण्यकीर्त्यादिभिः एषां पदे स्थाने मे ऐश्वर्यं प्राप्तुम
कल्पः अशक्तः सन् परं द्वेष्टि असूयया हरिं केवलं द्विषंति २१ ननु त्वया प्रत्युत्थानादिना न यादृक्कारणाद्वज्ञातस्तेनासौ
तत्राह हे सुमध्यमे प्रत्युद्गमादिकं मिथो जनैः यद्विधीयते तद्वाज्ञैः साधुत्वमेवाह परस्मै श्रीवासुदेवाय गुहाशयाय अंत
र्यामिण एव तत्त्वं तत्ते सम्यक् परिपूर्णे तस्मिन् कायिकव्यापारायोगात् अतोऽन्तर्यामिणं दृष्ट्वा मनसा सर्वैः कृतमिति भावः २२

द्वि १ पापच्यमानेन हृदातुरेंद्रियः समृद्धिभिः पुरुषबुद्धिसाक्षिणां अकल्प एषामधिरोढुमंजसा परं पदं द्वेष्टि यथा
सुरा हरिं २१ प्रत्युद्गमप्रश्रयणाभिवादनं विधीयते साधु मिथः सुमध्यमे प्राज्ञैः परस्मै पुरुषाय चेतसा गुहा
शयायैव न देहमानिने २२ सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः सत्वे च तस्मिन् भगवान् वासु
देवो ह्यधोक्षजो मे मनसा विधीयते २३

किंच केवलं अभ्यासयतेव वासुदेव दृष्ट्वा नमनं क्रियते
किंतु नित्यमेव मनसि वासुदेवश्चित्यत इत्याहुः विशुद्धसत्त्वमंतःकरणं सत्वगुणो वा वसुदेवशब्दितं वसुदेवशब्देनोक्तं कु
तः यद्यस्मात्तत्र तस्मिन्सत्त्वे पुमान् वासुदेव ईयते प्रकाशते अपगतमावृतमावरणं यस्मात्सः अयमर्थः वसुदेवे भ
वति प्रतीयत इति वासुदेवः परमेश्वरः प्रसिद्धः स च विशुद्धे सत्त्वे प्रतीयते अतः प्रत्ययार्थेन प्रसिद्धेन प्रकृत्यर्थो निरू
प्यते तत्र आवासयति व्युत्पत्त्या वा वसत्यस्मिन्निति वा वसुदेव दीव्यते द्योतत इति वा वसुभिः पुण्यैः प्रकाशत इति वा वसुदेव
सद्वा विशुद्धसत्त्वं ततः किमत आह सत्वे च तस्मि[illegible]न्मे मया नमसा नमस्कारेणानु विधीयते सेव्यत इत्यर्थः मन

सेति पाठे मनसा विशेषेण धीयते ध्यायते चिंत्यत इत्यर्थः य
तत्र अधोभूतेषु प्रत्याहृतेषु अक्षेषु जायते प्रकाशत इंद्रिया
गोचर इत्यर्थः २३

कश्चन नाद्रियत नाहृतवान् यज्ञकृतो दक्षात् यद्भयं तस्मात् तत्र हेतु तेन विमानितां स्वस्रजनीं च ऋते विना ता स्तुसा
दराः परिषस्वजुः आलिंगनं चक्रुः प्रेमाश्रुभिर्निरुद्धः कंठो यासां ७ अप्रतिनंदिता अनादृता सती नादृतेन गृहीतव
ती कथं सौंदर्य्येण सोदरत्वेन भगिनीनां यः प्रश्नः तत्र समर्घायोग्यावावार्त्तातयासहवां च भ्रष्टेणादित्यर्थः ८ तं विद्ध

तामागतां तत्र न कश्चनाद्रियद्विमानितां यज्ञकृतो भयाज्जनः ऋते स्वसॄर्वै जननीं च सादराः प्रेमाश्रुकंठ्यः
परिषस्वजुर्मुदा ७ सौदर्य्यसंप्रश्नसमर्थवार्त्तया मात्रा च मातृष्वसृभिश्च सादरं दत्तां सपर्यां वरमासनं च सा
नादत्त पित्राप्रतिनंदिता सती ८ अरुद्रभागं तमवेक्ष्य चाध्वरं पित्रा च देवे कृतहेलनं विभौ अनादृता यज्ञसदस्य
धीश्वरी चुकोप लोकानिव धक्ष्यती रुषा ९ जगर्ह सामर्षविपन्नया गिरा शिवद्विषं धूमपथश्रमस्मयं स्वतेजसा भू
तगणान्समुत्थितान्निगृह्य देवी जगतोऽभिशृण्वतः १० देव्युवाच ॥ न यस्य लोकेस्त्यतिशायिनः प्रियस्तथाप्रियो देहभृतां
प्रियात्मनः तस्मिन्समस्तात्मनि मुक्तवैरके ऋते भवं तं कतमः प्रतीपयेत् ११

तेरुद्रस्य भागो यस्मिंस्तं देवे रुद्रे कृतं हेलनं अवज्ञानं माढीनाद्यकरणात् ९ जगर्हे निंदितवती अमर्षेण कोपेन विपन्ना अव्य
क्ता तया शिवं द्वेष्टि शिवद्विट् तं धूमपथः कर्ममार्गस्तत्र श्रमोऽभ्यासस्तेन स्मयो गर्वो यस्य दक्षवधाय समुत्थितान्स्वान् निगृ
ह्य निवार्य १० निंदामेवाह यस्येति त्रयोदशभिः मुक्तवैरके त्यक्तविरोधे तस्मिन् शिवे भवं त्वं ऋते विना कतमः प्रतिपयेत् प्रतिकूल
माचरेत् वैराभावे हेतवः यस्य लोके अतिशायनः अतिशयितो नास्ति तथा प्रियश्च नास्ति समासपाठे अतिशयेन प्रियो नास्ति देहभृतां

प्रियोऽयमात्मा तस्य समस्तस्यात्मनि कारणभूते समस्त
स्वरूप इति वा ११

ततस्तं विहाय पित्रोर्गृहानगात्‌ कथंभूतं यः प्रीत्या तस्यै आत्मनो देहस्यार्द्धमदात्‌ त्यागे हेतुमाह स्त्रैणं स्त्रीस्व
भावः तेन विमूढा धीर्यस्याः सा ३ द्रुतविक्रमां शीघ्रगच्छंती सहपार्षदैश्च वर्तमानाः मणिमान्मदश्च आदिर्येषां
ते पुरः पुरतो वृषेंद्रो येषां ते गतव्यथा निर्भयाः रुद्रानतिक्रमेण तस्या गमनादागतव्यथा इति वा ४ तां वृषेंद्रमारोप्य
सारिकादिभिः क्रीडोपकरणैः श्वेतातपत्रादिभिश्च महाराजविभूतिभिः सह विटंकिता शोभिता ययुः सारिकाप

ततो विनिःश्वस्य सती विहाय तं शोकेन रोषेण च दूयता हृदा पित्रोरगात्स्त्रैण्यविमूढधीर्गृहान्प्रेम्णा
त्मनो योऽर्द्धमदात्सतां प्रियः ३ तामन्वगच्छन्द्रुतविक्रमां सतीमेकां त्रिनेत्रानुचराः सहस्रशः स
पार्षदयक्षा मणिमन्मदादयः पुरो वृषेंद्रास्तरसा गतव्यथाः ४ तां सारिकाकंदुकदर्पणांबुजैः
श्वेतातपत्रव्यजनस्रगादिभिः गीतायनैर्दुंदुभिशंखवेणुभिर्वृषेंद्रमारोप्य विटंकिता ययुः ५
आब्रह्मघोषोर्जितयज्ञवैशसं विप्रर्षिजुष्टं विबुधैश्च सर्वशः मृद्दार्वयःकांचनदर्भचर्मभिर्निसृ ३७
ष्टभांडं यजनं समाविशत्‌ ६

तेन निरूपितापद्धतिः गीतायनैः गीताश्रयैः ५ आसमंताद्घोषो वेदघोष
स्तेनोर्जितम्‌ शोभमानं यज्ञसंबंधिपशुविशसनं यस्मिन्‌ यद्वा तेनोर्जितं अतिशयितं यज्ञे वैशसं पर
स्परं स्पर्द्धा यस्मिन्‌ तद्यजनं यज्ञस्थानं समाविशद्देवी विबुधैश्च जुष्टं मृदादिभिर्निसृष्टानि निर्मितानि भांडानि पा

भा० च० पापहरत्वमुक्तं भुक्तिमुक्तिप्रदत्वेन शिवं वर्ण्ययंत्याह यस्य पादपद्मं मनांस्येवालयस्तैः ब्रह्मरसो ब्रह्मानंदः स एवास
१३ वो मकरंदः तदर्थिभिः यच्चार्थिनः सकामस्य लोकस्य तास्ता आशिषो वर्षति १५ यदुक्तं शिवापदेशो ह्यशिव इति
यच्चोक्तं प्रेतावासेषु इत्यादि तदाक्षिपंत्याह किं वेति ये जटा अवकीर्य्य श्मसाने अवसत् वसति स्म तस्य श्मसानमाल्यानि
ति४ भस्मानि नृकपालानि च भूषणत्वेन सं यस्य तत्त्वतो ऽन्ये न विदुः किं तु विदंत्येवेति चेत्तद्या सति तेषां तद्धास्यानुपपत्ते

यत्पादपद्मं महतां मनोलिभिर्निषेवितं ब्रह्मरसासवार्थिभिः लोकस्य यद्वर्षति चाशिषोर्थिनस्त
स्मै भवान्द्रुह्यति विश्वबंधवे १५ किं वा शिवाख्यमशिवं न विदुस्त्वदन्ये ब्रह्मादयस्तमवकीर्य्य ज
टाः श्मसाने तन्माल्यभस्मनृकपाल्यवसत्पिशाचैर्ये मूर्द्धभिर्दधति तच्चरणावसृष्टं १६ कर्णौ
पिधाय निरयाद्यदकल्प ईशे धर्मावितर्य्यसृणिभिर्नृभिरस्यमाने छिंद्यात्प्रसह्य रुशतीम
सतीं प्रभुश्चेज्जिह्वामसूनपि ततो विसृजेत्स धर्मः १७

रित्याह तच्चरणादवसृष्टं गलितं निर्माल्यं ये मूर्द्धभिर्धारयंतितेः १६ इदानीं देहं त्यक्तुमाधर्मतत्त्वमाह कर्णा
वाच्छाद्य निर्गच्छेत् यद्यदि मंत्तुं मारयितुं कल्पो न भवति तदा धर्मावितरि धर्मरक्षके ईशे स्वामिनि असृणि
भिर्निरंकुशैर्नृभिरस्यमाने अधिक्षिप्यमाणे प्रभुः शक्तश्चेत् उशतीं कल्याणवादिनीं प्रसह्य बलात् छिंद्यात्
ततो पि स्वयं प्राणान् विसृजेदिति स धर्मः १७

तस्यच्चप्रतिकूलकरणं द्वेधा महत्तमद्रोहेणसाक्षात्तद्द्रोहेणच तत्रपुंसांचातुर्विध्यंवदंतीमहत्तमद्रोहमाह दोषानिति
द्वाभ्यां हे द्विजेत्यधिक्षेपः भवादृशाःत्वद्विधाः अस्मदीयकाः परेषांगुणेषुदोषानेवगृह्णंति नतुगुणान् केचिन्मध्यस्था
गुणेषुदोषान्नगृह्णंति किंतुयथास्थितान्गुणदोषान्विवेकेनगृह्णंति (किंतुयथास्थितान्गुणदोषान्) तेतुमहांतउ
च्यंते साधवस्तुकेवलंगुणानेवगृह्णंतिनदोषान् तेतुमहत्तराउच्यंते महत्तमास्तुदोषान्नगृह्णंति प्रत्युतफल्गून्स्वउ

दोषान्परेषांहिगुणेषुसाधवोगृह्णंतिकेचिन्नभवादृशाद्विज गुणांश्चफल्गून्बहुलीकरिष्णवो
महत्तमास्तेष्वविदद्भवानघं १२ नाश्चर्यमेतद्यदसत्सुसर्वदा महद्विनिंदाकुणपात्मवादिषु ॥
सेर्ष्यंमहापुरुषपादपांसुभिर्निरस्ततेजस्सुतदेवशोभनं १३ यद्व्यक्षरंनामगिरेरितंनृणांसकृत्प्रसंगा
दघमाशुहंतितत् पवित्रकीर्तिंतमलंघ्यशासनंभवानहोद्वेष्टिशिवंशिवेतरः १४

ल्पानपिगुणान्बहुलीकुर्वंति करिष्णवोभवंति तेषुभवान् अघमविदत् विदितवान्कल्पितवानित्यर्थः तच्चब्रह्मनिष्ठानमि
ध्ययकल्पितवानित्यनेनसूचितं १२ एतच्चदुर्जनेषुयुक्तमेवेत्याह नेतिकुणपंजडंशरीरं तदेवात्मेतिवदंतिवदंतियेतेषु
ईर्ष्या अस्तीति सेर्ष्यंयथाभवत्येवंमहतांविनिंदेति यत् एतन्नाश्चर्यंभवति सेर्ष्यंनिरस्ततेजःप्रभावोयेषामितिवा य
द्यपिमहापुरुषाःस्वनिंदांसहंते तथापितत्पादरेणवस्तदसहमानाः तेषांतेजोविध्वंसयंति अतोऽस्माकेषुमहत्सुनिंद
नमेवोचितमित्यर्थः १३ तदेवंमहद्द्रोहमुक्त्वा तस्मिन्नेवकृतंद्रोहमाह यदितिद्वाभ्यां यत्यस्यद्व्यक्षरमात्रंगिराई
तिनत्प्रसिद्धम् नामनृणांसर्वेषामाद्यंसर्वंहंति केवलंगिरैवेरितंउच्चारितंनतुमनःपूर्वकृतं तत्रसकृदपिप्रसंगादपि

हर हर त्यार

तं शिवं द्वेष्टि न लंघ्यं शासनमाज्ञा यस्य अहो शिवेतर अमंगलरूपः १४

भा॰ चं॰
१४
मा

चिताभस्मकृतास्नानः तथा नग्नत्वादिना यो भोगाद्यभाव उक्तस्तत्राह हे पितः अस्माभिरास्थिताः आश्रिता पदव्यः अपि
मादिसमृद्धयः वो युष्माकं मा न संतीत्यर्थः यतो वः पदव्यो यज्ञशालास्वेव भवंति तास्ततदन्नेन यज्ञगतेनान्नेन तृप्तैः केव
लमीडिता धूमवर्त्मभिश्च युज्यंते या अस्मत्पदव्यस्तास्तु नैवंभूताः किंत्वव्यक्तलिंगा अव्यक्तं लिंगं देहे तुर्यासां इच्छामात्रप्रभव
त्वात् अवधूतैर्ब्रह्मविद्भिः सेविताः अतो हे अहो हद्रो दरिद्र इति गर्वं मा कृथा इति भावः २१ किंच बहुनोक्तेन इदं देहं त्यक्ष्याम्येवे
त्याह द्वाभ्यां एतेन नालं न स्पृश्यते किं अपि त्वलमेव कथंभूतेन कुजन्मना तदेवाह हरे कृतापराधस्य तव देहादुद्भवेन मनुश्चा

मावः पदव्यः पितरस्मदास्थिता या यज्ञशालासु न धूमवर्त्मभिः तदन्नतृप्तैरसुभृद्भिरीडिता अव्यक्तलिं
गा अवधूतसेविताः २१ नैतेन देहेन हरे कृतागसो देहोद्भवेनालमलं कुजन्मना व्रीडा ममाभूत्कुजनप्र
संगतस्तज्जन्म धिग्यो महतामवद्यकृत् २२ गोत्रं त्वदीयं भगवान्वृषध्वजो दाक्षायणीत्याह यदा सुदुर्म
नाः व्यपेतनर्मस्मितमाशु तद्यहं व्युत्स्रक्ष्य एतत्कुणपं त्वदंगजं २३

प॰

श्चायं देहं कंपयत्यात्ययस्तत्राह कुजनस्य तव प्रसंगतः संबंधात् मम लज्जा अभूत् अतः यो महतां अप्रियकृ
त् तस्माज्जन्मतद्धिक् त्वत्संबंधादश्लाघ्यमित्यर्थः २२ किंच परिहासादिषु विनोदेनापि दाक्षायणीति संबो
धयत् त्वदीयं त्वत्संबंधवाचकं गोत्रं नाम यदा वृषध्वज आह गृणाति तदाहं व्यपेत नर्मस्मितं यथा भवत्येवं
सुदुर्मना अतिदुःखितचित्ता भवामि ततस्मात् त्वन्निमित्तं एतत्कुणपप्रायं व्युत्स्रक्ष्ये त्यक्ष्यामि २३ राम राम राम राम

१४

नवत्वतः उत्पन्नं शितिकंठो नीलकंठः तन्निंदकात् प्रमादापन्नस्यापवित्रस्य त्यागं विनानशुद्धिरितिदृष्टांतेनाह ज
गधस्य भक्षितस्यान्नस्योद्धरणं वमनमेव पुंसः शुद्धं प्रचक्षते १८ यदुक्तं लुप्तक्रियायाश्च यइतितत्रत्याह नेति वदेषा
द्वान् विविधनिषेधरूपान् स एव लोके स्वात्मनो रममाणस्य महत्तो मुनेः सम्यग्विरक्तस्य मतिर्नानुवर्तते निवृत्ताधि
कारत्वात् अधिकारभेदे दृष्टांतः यथा देवानां गतिराकाश एव मनुष्याणां पृथिव्यामेव अतः स्वधर्म एव प्रवृत्तिलक्षणे निवृ
त्तिलक्षणे वास्थितः सन्परमन्यधर्मं पुरुषं वा न क्षिपेत् न निंदेत् व्यवस्थिताधिकारत्वेनोभयोः सत्यत्वात् न क्षिपेद्देवेति वान्च

अतस्तवोत्पन्नमिदं कलेवरं न धारयिष्ये शितिकंठगर्हिणः जग्धस्य मोहाद्धि विशुद्धिमंधसो जुगुप्सितस्यो
द्धरणं प्रचक्षते १८ न वेदवादाननुवर्तते मतिः स्व एव लोके रमतो महामुनेः यथा गतिर्देवमनुष्ययोः पृथक्
स्व एव धर्मे न परं क्षिपेत् स्थितः १९ कर्म प्रवृत्तं च निवृत्तमप्यृतं वेदे विविच्योभयलिंगमाश्रितं विरोधि तद्यौग
त्स्य२ पद्यैककर्तरि द्वयं तथा ब्रह्मणि कर्म नर्छति २०

यः १९ एतदेवोपपादयंत्याह प्रवृत्तमग्निहोत्रादि निवृत्तं शमदमादि ऋतं सत्यमेव यतः वेदे आश्रितं विहितं तच्च विविच्य व्यवस्था
याश्रितं न त्वविशेषेण व्यवस्थामेवाह उभयं रागवैराग्यलक्षणं लिंगं चिह्नमधिकारिविशेषणं यस्मिंस्तत् ननु याज्जीवमग्निहोत्रं जुहोति
शांतो दांत इत्यादिषु नैवं व्यवस्था प्रतीयते सत्यं तथापि उभयोरेकाधिकारविरोधात् तथा पर्यवस्यतीत्याह युगपद्भावो यौगप
द्यं यौगपद्येनैकस्मिन्कर्तरि तत्कर्मद्वयं विरोधि ननु तर्हि निवृत्तं कर्म शिवेनापि कर्तव्यमेव नेत्याह ब्रह्मणि सदाशिवे किंचिद ४
पि कर्म नर्छति न प्राप्नोति अतो यथा प्रवृत्तिनिवृत्तयोः परस्परधर्मीकरणेन दोषः तथेश्वरे तदुभयधर्मीकरणेऽपीति भावः

महदनात्म्यं द्रोहजन्यं॥ अस्य सर्वेष्वस्नेहमप्यन्याय्यइत्याहुः॥ यस्येति येन विमता अज्ञता॥२९॥ दुर्मर्षमत्यसहनं हृदयं यस्य
लोके जनमध्ये॥ च अग्राह्यन्नरकं च॥ यद्यतः स्वीयामंगजां सतीं अपराधतः॥ स्वावज्ञया मृते मरणायोद्यतानन्निवारितवान्
पुरुषद्विट्शिवद्वेषी॥३०॥ अद्भुतं दृष्ट्वा च॥३१॥ यज्ञघ्नान्हंतीति यज्ञघ्नघ्नस्तेन अघंहंतं रक्षइत्यादिना॥३२॥ अध्वर्युणा

अहोत्वनात्म्यं महदस्य पश्यत प्रजापतेर्यस्य चराचरं प्रजाः॥ जहावसून्यद्विमतात्मजा सती मनस्वि
नीमानमभीक्ष्णमर्हति॥२९॥ सोयं दुर्मर्षहृदयो ब्रह्मध्रुक्च लोकेऽपकीर्तिं महतीमवाप्स्यति॥ यदंगजां
स्वां पुरुषद्विडुद्यतां न प्रत्यषेधन्मृतयेऽपराधतः॥३०॥ वदत्येवं जने सत्या दृष्ट्वासुत्यागमद्भुतं॥ दक्षं तत्
पार्षदा हंतुमुदतिष्ठन्नुदायुधाः॥३१॥ तेषामापततां वेगं निशाम्य भगवान्भृगुः॥ यज्ञघ्नघ्नेन यजुषा द
क्षिणाग्नौ जुहाव ह॥३२॥ अध्वर्युणा हूयमाने देवा उत्पेतुरोजसा॥ ऋभवो नाम तपसा सोमं प्राप्ताः स
हस्रशः॥३३॥ तैरलातायुधैः सर्वे प्रमथाः सहगुह्यकाः॥ हन्यमाना दिशो भेजुरुशद्भिर्ब्रह्मतेजसा॥३४॥ इ
ति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे सतीदेहोत्सर्गो नाम चतुर्थोध्यायः॥४॥ श्रीमैत्रेय उवाच॥ भवो भवान्या
निधनं प्रजापतेरसत्कृताया अवगम्य नारदात्॥ स्वपार्षदसैन्यं तदध्वरर्भुभिर्विद्रावितं क्रोधमपारमादधे॥१

भृगुणा एते तपसा सोमं प्राप्ता ऋभवो नाम देवा उत्पेतुः॥३३॥ ब्रह्मतेजसा उशद्भिर्विद्राव्यमानैः॥३४॥ इति चतुर्थे चतुर्थः॥४॥
पंचमे तु सतीदेहत्यागमाकर्ण्य शंकरः॥ वीरभद्रं समुत्पाद्य तेन दक्षं घातयत्॥ प्रजापतेर्हेतोर्निधनं कुतः तेनासत्कृता

न

[illegible]

उदीची उदीच्यां दिशि पांगंतरे उ दक्षमुखी शांतवाक् गृहीतमौना
दक्षं प्रत्यनुवादं कृत्वा शत्रुहन् क्रोधादिरिपुघातिन् उदीची उदीच्यां दिशि पागंतरे उ दक्ष्मुखी शांतवाक् गृहीतमौना
दक्षंप्रत्यनुवादं कृत्वा शत्रुहन् क्रोधादिरिपुघातिन् अनिलौ प्राणापानौ ऊर्ध्वाधोवृत्तिकरौ निरोधेन समानौ एकरू
जलंस्पृष्ट्वा आचम्य दृक् दृशं २४ योगमार्गमेवाह कृत्वेति अनिलौ प्राणापानौ ऊर्ध्वाधोवृत्तिकरौ निरोधेन समानौ एकरू
पौ नाभिचक्रे कृत्वा ततउदानमुत्थाप्य धियासह हृदि स्थापयित्वा कंठमार्गेण भ्रुवोर्मध्यमनयत् २५ महतां पूज्यतमेन रु

श्रीमैत्रेय उवाच ॥ इत्यध्वरे दक्षमनूद्य शत्रुहन् क्षिताउदीचीं निषसाद शांतवाक् स्पृष्ट्वा जलं पीतदुकूल
संवृता निमील्य दृग्योगपथं समाविशत् २४ कृत्वा समानावनिलौ जितासना सोदानमुत्थाप्य च नाभिच
क्रतः शनैर्हृदिस्थाप्य धियोरसि स्थितं कंठाद्भ्रुवोर्मध्यमनिंदितानयत् २५ एवं स्वदेहं महतां महीयसा मु
हुः समारोपितमंकमादरात् जिहासती दक्षरुषा मनस्विनी दधार गात्रेष्वनिलाग्निधारणा २६ ततः स्व
भर्तुश्चरणांबुजासवं जगद्गुरोश्चिंतयती न चापरं ददर्श देहो हतकल्मषः सती सद्यः प्रजज्वाल समाधिजाग्नि
ना २७ तत्पश्यतां खे भुवि चाद्भुतं महद्धा हेति वादः सुमहानजायत हंत प्रिया दैवतमस्य देवी जहावसू
न्केन सती प्रकोपिता २८

द्रेण आदरात् अंकं आरोपितम् स्वकं देहं त्यक्तुमिच्छती २६ चरणांबुजे आसवं
भजनानंदं भर्तुरपरं न ददर्श देहश्च सद्यः प्रज्वालितोऽभूत् समाधिना योऽग्निस्तेन २७ खे भुवि च हा हेति वादः
तमेवाह हंतेति विषादे दैवतमस्य पूज्यतमस्य प्रिया केन दक्षेण प्रकोपिता सती २८ रामराम रामराम राम

ककुभि दिशि तमो न भवति किंतु रज इति ज्ञात्वाह रज एतत्कुतो [ ]भूत् दध्युः चिंतयामासुः ७ हेतुं तत एव संभवेनोत्या
तिकल्पं कल्पयंति वाता इति दस्यूनामभावे हेतुः प्राचीनबर्हिर्विद्यानीतनो राजा जीवतीति न कल्पते न शीघ्रानीयंते च
नितस्मादुःखाधिक्ये हेतुः अवदध्यौ अवज्ञा[त]वान् अनागा अनागसं ९ न चेदं सुतावज्ञामात्रं किंतु रुद्रावज्ञानं च

अथर्त्विजो यजमानः सदस्याः ककुभ्युदीच्यां प्रसमीक्ष्य रेणुं तमः किमेतत्कुत एतद्रजोऽभूदिति द्विजा
द्विजपत्न्यश्च दध्युः ७ वातान्न वांति न हि संति दस्यवः प्राचीनबर्हिर्जीवति होग्रदंडः गावो न काल्यं
त इदं कुतो रजो लोकोधुना किं प्रलयाय कल्पते ८ प्रसूतिमिश्राः स्त्रिय उद्विग्नचित्ता ऊचुर्विपाको
वृजिनस्यैष तस्य यत्पश्यतीनां दुहितॄणां प्रजेशः सुतां सतीमवदध्यावनागाम् ९ यस्त्वंतकाले
व्युप्तजटाकलापः स्वशूलसूच्यर्पितदिग्गजेंद्रः वितत्य नृत्यत्युदितास्त्रदोर्ध्वजानुच्चाट्टहासस्तन
यित्नुभिन्नदिक् १० अमर्षयित्वा तमसह्यतेजसं मन्युप्लुतं दुर्विषहं भ्रुकुट्या करालदंष्ट्राभिरुदस्तभा
गणं स्यात्स्वस्ति किं कोपयतो विधातुः ११

अतो नास्य भद्रं भविष्यतीत्याहुः यस्त्विति द्वाभ्यां व्युप्तो विकीर्णो
जटाकलापो यस्य स्वस्य शूलस्य सूच्यग्रे अर्पिताः प्रोता दिग्गजेन्द्रा यस्य उदितान्युत्तंभितानि अस्त्राणि ये स्ते दोषो बाह
वो ध्वजानि अत्यंतहर्षेण नृत्यति उच्चैः अट्टहासः कठोरो हासः स एव स्तनयित्नुर्गर्जितं तेन भिन्ना विदीर्णा दिशो
येन सः १० अमर्षयित्वा असहनयुक्तं कृत्वा मन्युप्लुतं क्रोधव्याप्तं उदस्त उत्क्षिप्तो भगणो नक्षत्रसंघो येन पुनश्च तं

सधूर्जटिः रुद्रः घोरः सन् जटामुत्कृत्योत्पाट्योत्थितः सन् तां भुवि विससर्ज्ज स्फुरदृष्टश्चौष्ठपुटौ येन तडित्तां वह्नी
नां च षट्ज्वालास्ता इव उग्रे ये अर्चिषी यस्यासौ २ ततो जटायाः सकाशात् अतिकायो वीरभद्रो जात इति शेषः तनुवातं च्या
देहेन दिवं स्पृशन् अत्युच्च इत्यर्थः घनरुक् कृष्णवर्णः त्रयः सूर्या इव दृशो यस्य करालात्तुंगा दंष्ट्रा यस्य ज्वल
तः अग्नेरिव मूर्द्धजा यस्य कपालमालाभुक् सः विविधान्युद्यतान्यायुधानि यस्य ३ हे रुद्र भट हे युद्धकुशल मद्गणानां

क्रुद्धः स्फुरदृष्टौष्ठपुटः स धूर्जटिर्जटां तडिद्वह्निसटोग्ररोचिषं उत्कृत्य रुद्रः सहसोत्थितो हसन् गंभीर
नादो विससर्ज तां भुवि २ ततोतिकायस्तनुवा स्पृशन् दिवं सहस्रबाहुर्घनरुक् त्रिसूर्यदृक् करालदं
ष्ट्रो ज्वलदग्निमूर्द्धजः कपालमाली विविधोद्यतायुधः ३ तं किं करोमीति गृणन्तमाह बद्धांजलिं भग
वान्भूतनाथः दक्षं सयज्ञं जहि मद्भटानां त्वमग्रणी रुद्र भटांशको मे ४ आज्ञप्त एवं कुपितेन मन्यु
ना स देवदेवं परिचक्रमे विभुं मेने तदात्मानमसंगरंहसा महीयसां तात सहः सहिष्णुं ५ अन्वीयमा
नः स तु रुद्रपार्षदैर्भृशं नदद्भिर्व्यनदत्सुभैरवं उद्यम्य शूलं जगदंतकांतकं संप्राद्रवद्घोषणभूषणांघ्रिः ६

त्वमग्रणीः सन् यज्ञं सदक्षं जहि ब्रह्मतेजो दुर्जयमिति मा मंस्थाः यतस्त्वं मेंऽशकः ४ मन्युना रुद्रेण परिचक्रमे प्र
दक्षिणीचकार असंगमप्रतिघातं यद्रंहो वेगः तेन महीतानां महीयसां बलीयसामपि सहः सहिष्णुं बलं सोढुं क्षमं
मेने ५ जगदंतको मृत्युस्तस्याप्यंतकं अभूत घोषयंति शब्दं कुर्वंती घोषणानि नूपुरादीनि ययोः तावंघ्री यस्य ६ ॥ ३

भा० च० ग्रावभिरर्द्यमानाः नैकधा अनेकधा दुद्रुवुः १८ स्रुवो हस्तेयस्य भवो वीरभद्रः लुलुंचे उत्पादितवान् १९ उज्जहार उद्धृ
१७ तवान् सदस्यः सभायां स्थितः सन् शपंतं शिवनिंदां कुर्वंतं दक्षं अचिनि कौ चेत्ससुचत् प्रेरितवान् २० कलिंगदेश
राजस्याग्निरुद्धो ह्यादेव तन्मंत्रोऽयया च्युते दंतान् पातितवान् गिरिमहिम्नुकंतरे रुद्रे निंद्यमाने दत्तः दंतान् दर्शयन् जहा
स पुस्नोरिति पाठे द्विवचनमेद्राणोऽस्मेत्रे रुर्भवतिरत्यत्र तत्साहित्तस्यापि पुस्नोर्दंतपाशार्थं स्तूचितवान् तथा हि

सर्वएवर्त्विजो दृष्ट्वा सदस्याः सदिवौकसः तैरर्द्यमानाः सुभृशं ग्रावभिर्नैकधाद्रवन् १८ जुह्वतः
स्रुवहस्तस्य श्मश्रूणि भगवान्भवः भृगोर्लुलुंचे सदसि योहसन् १९ भगस्य नेत्रे भगवान्पाति
तस्य रुषा भुवि उज्जहार सदस्थोऽक्ष्णा यः शपंतमसूसुचत् २० पूष्णश्चापातयद्दंतान्कलिंगस्यय
थाबलः शप्यमाने गरिमणि योहसद्दर्शयन्दतः २१ आक्रम्योरसि दक्षस्य शितधारेण हेतिना ॥
छिंदन्नपि तदुद्धर्तुं नाशक्नोत्त्र्यंबकस्तदा २२
पूषा प्रपिष्टभोगो दंतको हि नं देवा अब्रुवन्निति विहितस्य पेषणस्य हि देवत्याभावतत्तनुत्तस्य दंताः संतीति वक्तव्यं
स्यात् नचेत्संगच्छत इत्याशंक्य तत्रापि तस्य दंतमात्रोऽवस्याभेदप्रवृत्तेन द्विवचनेऽन्नायत्ते अत एव पूष्णोनुग्रहं दे
धावच्मति पूषा तु यजमानस्य दद्भिर्भक्षयतु पिष्टभुगिति केवलश्चेत्पिष्टभुगिति अन्यस्तहि तस्य यजमानस्य द
द्भिर्भक्षयिष्यतीत्यर्थः २१ छिंदन्नपीत्यत्र शिरइत्युपरिव्यक्तीभविष्यति त्र्यंबको वीरभद्रः २२

उद्विग्नाप्रचलिताद्दग्यस्यतेनजनेनवद्रुच यथाभवत्येवमुच्यमानेसति उत्पाततमामहोत्पाताताश्स्थिताः पर्य्यकूसर्वत
श्च कथंभूतो महात्मनोऽपिदक्षस्यभयावहः १२ नानाआयुधानियेषां वामनकैःह्रस्वैः उद्यतायुधैः पिंगैःकपिलैःपि
शंगैःपीतैःमकरस्येवोदरमाननंचयेषांतैः परितोधावद्भिःअवरुध्यः १३ यज्ञशालायाःपूर्वपश्चिमस्तंभयोःअपि
तंपूर्वपश्चिमायतंकाष्ठंप्राग्वंशस्तंभ यज्ञशालायाःपश्चिमतःपत्नीशालायाःपुरतःस्थितंसदोमंडपं सदसःपुरतो

वद्धेवमुद्विग्नदृशोच्यमानेजनेनदक्षस्यमुखेमहात्मनः उत्येतुरुत्पाततमाःसहस्रशोभयावहादिविभू
मौचपर्य्यक् १२ तावत्सरुद्रानुचरैर्मखोमहान्नानायुधैर्वामनकैरुदायुधैः पिंगैःपिशंगैर्मकरोदरा
ननैर्पर्य्याद्रवद्भिर्विदुराच्चरुध्यते १३ केचिद्बभंजुःप्राग्वंशंपत्नीशालांतथापरे सदआग्नीध्रशालांचत
द्विहारं महानसं १४ रुरुजुर्यज्ञपात्राणितथैकेग्नीननाशयन् कुंडेष्वमूत्रयन्केचिद्बिभिदुर्वेदि
मेखलाः १५ अबाधंतमुनीनन्येएकेपत्नीरतर्ज्जयन् अपरेजगृहुर्देवान्प्रत्यासन्नान्पलायितान् १६
भृगुंबबंधमणिमान्वीरभद्रःप्रजापतिं चंडेशःपूषणंदेवंभगंनन्दीश्वरोग्रहीत् १७

हविर्धानंतस्योत्तरतआग्नीध्रशालातद्विहारं यजमानगृहं महानसंपाकभोजनशाला १४ रुरु
जुःबभंजुःउत्तरवेद्योमेखलाः सीमासूत्राणि १५ १६ १७ ॥ एमरामरामरामरामएमरामरामरारामम

भा० च० विभुर्ब्रह्मा तेजीयसि अतितेजस्विनि पुरुषे कृतागसि सत्यपि स्वयं तत्र कृतागसां बुभूषतां अपराधं कर्तुमिच्छतां सा तथा
१८ बुभूषा तेषां क्षेमाय न भूयात् प्रायेणेति लोकोक्तिः न भवेदेवेत्यर्थः ४ अथापि प्रसादयध्वं क्षमापयत यूयं भवंतो वर्हिषीय
स्य भागभाजं पराहुः दूराद्देवैर्वर्जितवंतः प्रगृहीतांघ्रिपद्मं पादौ प्रगृह्येत्यर्थः ५ अध्वरस्य जीवितं पुनःसंधानं प्रार्थय

तदाकर्ण्य विभुः प्राह तेजीयसि कृतागसि क्षेमाय तत्र सा भूयान्न प्रायेण बुभूषतां ४ अथापि यूयं कृत
किल्बिषा भवं ये बर्हिषो भागभाजं परादुः प्रसादयध्वं परिशुद्धचेतसा क्षिप्रप्रसादं प्रगृहीतांघ्रिपद्मं
५ आशासाना जीवितमध्वरस्य लोकः सपालः कुपिते न यस्मिन् तमाशु देवं प्रियया विहीनं क्षमापय
ध्वं हृदि विद्धं दुरुक्तैः ६ नाहं न यज्ञो न च यूयमन्ये ये देहभाजो मुनयश्च तत्त्वं विदुः प्रमाणं बलवीर्ययो
र्वा यस्यात्मतंत्रस्य क उपायं विधित्सेत् ७ स इत्थमादिश्य सुरानजस्तैः समन्वितः पितृभिः सप्रजेशैः य
यौ स्वधिष्ण्यान्निलयं पुरद्विषः कैलासमद्रिप्रवरं प्रियं प्रभोः ८ जन्मौषधितपोमंत्रयोगसिद्धैर्नरेतरैः
जुष्टं किन्नरगंधर्वैरप्सरोभिर्वृतं सदा ९ नानामणिमयैः शृंगैर्नानाधातुविचित्रितैः नानाद्रुमलतागु
ल्मैर्नानामृगगणावृतैः १०

मानाः संतः यस्मिन् कुपिते सति सपालो लोको न भवेत् न श्रेयादित्यर्थः ६ वयं तत्र विभिमः त्वमेव वा किंचिदुपायं विधत्से सत्यं
द तत्राह नेति यज्ञस्तदानीं तनो इंद्रः यस्य तत्त्वं वलवीर्ययोः प्रमाणं इयत्तां न विदुः वीर्यं पराक्रमः पापमिति पाठे अपि
७ कैलासं वर्णयति ८ जन्मौषधीत्यादि चतुर्भिः नरेतरैः देवैर्जुष्टं ९ शृंगैः रमणं रतिप्रदमित्युत्तरेणान्वयः कथं

१८

अस्त्रान्वितैर्मंत्रसहितैर्न निर्भिन्नात्वक् यस्य तथाभूतं दृष्ट्वेति शेषः ॥२३॥ स पशूनां पतिः मखे संज्ञपनं योगं कं निष्पीडना
दि रूपं मारणोपायं दृष्ट्वा तेनोपायेनाहरत् ॥२४॥ अन्येषां ब्राह्मणादीनां तद्विपर्ययः अभूदिति शेषः ॥२५॥ गुह्यकाल
यं कैलाशं ॥२६॥ इति चतुर्थे पंचमः ॥५॥ षष्ठे तु देवसंघेन सह गत्वा भवं विधिः ॥ सांत्वयामास दक्षादिजीवितायार्यमादर

शस्त्रैरस्त्रान्वितैरेवमनिर्भिन्नत्वचं हरः ॥ विस्मयं परमापन्नो दध्यौ पशुपतिश्चिरं ॥२३॥ दृष्ट्वा संज्ञपनं योगं
पशूनां स पतिर्मखे ॥ यजमानपशोः कस्य कायात्तेनाहरच्छिरः ॥२४॥ साधुवादस्तदा तेषां कर्म तत्तस्य पश्यं
तां ॥ भूतप्रेतपिशाचानामन्येषां तद्विपर्ययः ॥२५॥ जुहावैतच्छिरस्तस्मिन् दक्षिणाग्नावमर्षितः ॥ त म२
द्देवयजनं दग्ध्वा प्रातिष्ठद्गुह्यकालयं ॥२६॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे दक्षयज्ञविध्वंस
ने पंचमोध्यायः ॥५॥ श्रीमैत्रेय उवाच ॥ अथ देवगणाः सर्वे रुद्रानीकैः पराजिताः शूलपट्टिशनिस्त्रिंशगदा
परिघमुद्गरैः १ संछिन्नभिन्नसर्वांगाः सर्त्विक्सभ्या भयाकुलाः स्वयंभुवे नमस्कृत्य कार्त्स्न्येनैत
न्यवेदयन् २ उपलभ्य पुरैवैतद्भगवानब्जसंभवः नारायणश्च विश्वात्मा न कस्याध्वरमीयतुः ३

र अथ देवगणाः स्वयंभुवे नमस्कृत्य न्यवेदयन्निति द्वितीयेनान्वयः शूलादिभिः १ संछिन्नानि त्रुटितानि भि
न्नानि विदीर्णान्यंगानि येषां सह ऋत्विग्भिः सभ्यैश्च वर्त्तमानाः २ कस्य दक्षस्य न ईयतुः ३ रामरामरामराम

भा० च०
१९

वेणुकीचकयोश्च निरंध्रसरंध्रत्वेन भेदः वेणुकजातिभिरित्यत्र वेणुका एलाजातिः द्रुमजातिभिरित्यत्र जातिः सामान्यं
१८ कुमुदादिसमृद्धिभिर्नलिनीषु सरस्सु कलं मधुरं यथा भवत्येवं कूजंति यानि पक्षिवृंदानि तैरुपशोभितं १९ मृगादि
भिर्निजुष्टं निषेवितं नाभिः कस्तूरीमृगः पूर्वं मृगशब्देन शृंगविशिष्टास्तेनोक्ताः इदानीं स्वातंत्र्येणोक्त्या पौनरुक्त्यं २०

खर्ज्जुराम्रातकाम्राद्यैः पियालमधुकेंदुकैः द्रुमजातिभिरन्यैश्च राजितं वेणुकीचकैः १८ कुमुदो
त्पलकह्लारशतपत्रवनर्द्धिभिः नलिनीषु कलं कूजत्खगवृंदोपशोभितं १९ मृगैः शाखामृगैः क्रो
डैर्मृगेंद्रैर्ऋक्षशल्यकैः गवयैर्नाभिभिर्व्याघ्रैर्निजुष्टं महिषादिभिः २० कदलीषंडसंरुद्धनलिनी
पुलिनश्रियं पर्यस्तं नंद्या सत्याः स्नानपुण्यतरोदया २१ विलोक्य भूतेशगिरिं विबुधा विस्मयं ययुः
ददृशुस्तत्र ते रम्यामलकां नाम वै पुरीं २२ वनं सौगंधिकं चापि यत्र तन्नाम पंकजं नंदा चालकनं
दा च सरितौ बाह्यतः पुरः तीर्थपादपदांभोजरजसातीव पावने २३ ययोः सुरस्त्रियः क्षत्तरवरुह्य स्वधि
ष्ण्यतः क्रीडंति पुंसः सिंचंत्यो विगाह्य रतिकर्षिताः २४

त

कदलीषंडैः संरुद्धानि आवृतानि नलिनीनां पुलि
नानि तैः श्रीः शोभा यस्मिन् नंद्या गंगया पर्यस्तं परिवेष्टितं सत्याः भवान्याः स्नानेन पुण्यतरमिति सुगंधमु
दकं यस्याः २१ तत्र गिरौ वनं च ददृशुः २२ यत्र वने तन्नाम सौगंधिकं पंकजं भवति जातावेकवचनं २३ पुरीं
वलीयति नंदा चेति च लभिः सरितौ पुराद्बाह्यतो भवतः तीर्थपादस्य हरेः पादांभोजरजसा ययोर्विगाह्य प्रविश्य क्रीडंति २४

१९

नानामलानि नानामलानि प्रस्रवणानि तेषु नानाकंदराः सानवश्च येषु रमणैः सह क्रीडंतीनां ११ मयूराणां केकाभिः
स्वनैर्नादितं मदांधैरलिभिर्विमूर्छितं मूर्छनागतिरागविशेषः तद्युक्तं सहकृतं रक्तकंठानां कोकिलानां झावितैः द्रुततर
गीतैः स्वरैः अन्येषां पतत्रिणां च कूजितैः उद्धस्तैरुन्नतशाखैर्द्रुमैः द्विजान्पक्षिणः आह्वयंतमिव लोके हि हस्तमुद

नानामलप्रस्रवणैर्नानाकंदरसानुभिः रमणं विहरंतीनां रमणैः सिद्धयोषितां ११ मयूरकेका
भिर्जुष्टं मदांधालिविमूर्छितं झावितैरक्तकंठानां कूजितैश्च पतत्रिणां १२ आह्वयंतमिवोद्धस्तैर्द्वि
वनि ३ जान्कामदुघैर्द्रुमैः व्रजंतमिव मातंगैर्गृणंतमिव निर्झरैः १३ मंदारैः पारिजातैश्च सरलैश्चोपशोभितं ॥
तमालैः शालतालैश्च कोविदारासनार्जुनैः १४ चूतैः कदंबनीपैश्च नागपुन्नागचंपकैः पाटला
शोकबकुलैः कुंदैः कुरबकैरपि १५ स्वर्णार्णशतपत्रैश्च वररेणुकजातिभिः कुब्जकैर्मल्लिकाभि
श्च माधवीभिश्च मंडितं १६ पनसोदुंबराश्वत्थप्लक्षन्यग्रोधहिंगुभिः भूर्जैरोषधिभिः पूगै राजपूगै
श्च जंबुभिः १७

क्षिप्याह्वैः स्वरेणाह्वानमर्थिनां कुर्वंति अद्रिश्चोत्क्षिप्तमहस्ताकारैर्द्रुमैः तत्रत्यपक्षिस्वनैश्च तत्पालकत्वात् इत्यर्थः व्र
जद्भिर्मातंगैर्गजैर्व्रजंतमिव निर्झरैः ध्वनिभिर्गृणंतं भाषमाणमिव १३ १४ चूताम्रयोः कदंबनीपयोश्च अ
वांतरं जातिभेदः १५ १६ १७

भा० च०
२०

मुमुक्षूणां शरणे आश्रये त्यक्तामर्षो योऽन्तकस्तत्तुल्यं ३२ तं विशिनष्टि सनंदनाद्यै रिति पंचभिः सख्या चकुवेरेणोपास्यमानम् ३३ विद्यातपासनात पथि स्थितैकाग्र्य योगः समाधिस्तेषां पंथानं प्रवर्त्तकं तद्द्वारा लोकस्य मंगलं हितं तपोवी वात्सल्यात् स्नेहाद्याचरं
तं ३४ संध्याभ्ररुचा रक्तवर्णेनांगेन भस्मादि लिंगं चंद्रलेखां च विभ्रंतं ३५ दृ घनामा सनं वेषीत स्यां ब्रह्म प्रवोचंतं ३६ सव्यं

तस्मिन्महायोगमये मुमुक्षुशरणे सुराः ददृशुः शिवमासीनं त्यक्तामर्षमिवांतकं ३२ सनंदनाद्यैर्महासि
द्धैः शांतैः शांतविग्रहम् उपास्यमानं सख्या च भर्त्रा गुह्यकरक्षसां ३३ विद्यातपोयोगपथमास्थितं
तमधीश्वरं चरंतं विश्वसुहृदं वात्सल्याल्लोकमंगलं ३४ लिंगं च तापसाभीष्टं भस्मदंडजटाजिनं अंगेन
संध्याभ्ररुचा चंद्रलेखां च विभ्रतं ३५ उपविष्टं दर्भमय्यां वृस्यां ब्रह्म सनातनं नारदाय प्रवोचंतं पृच्छते
शृण्वतां सतां ३६ कृत्वोरौ दक्षिणे सव्यं पादपद्मं च जानुनि बाहुं प्रकोष्ठेऽक्षमालामासीनं तर्क
मुद्रया ३७ तं ब्रह्मनिर्वाणसमाधिमाश्रितं व्युपाश्रितं गिरिशं योगकक्षां सलोकपाला मुनयो मनूनामाद्यं
मनुं प्रांजलयः प्रणेमुः ३८ स तूपलभ्यागतमात्मयोनिं सुरासुरेशैरभिवंदितांघ्रिः उत्थाय चक्रे शिरसाभिवं
दनमर्हत्तमः कस्य यथैव विष्णुः ३९

पादपद्मं दक्षिणे ऊरौ कृत्वा विन्यस्य जानुनि च सव्ये बाहुं कृत्वा दक्षिणं बाहुं प्रकोष्ठे मणिबंधस्थाने अक्षमालां कृत्वा दक्षिणहस्तकृत
या तर्कमुद्रया उपलक्षितमासीनमित्यर्थः तदुक्तं तर्जन्यंगुष्ठयोरग्रमित्यर्थः संयोज्य चांगुलीः प्रसार्यैवं धनं प्राहुः तर्कमुद्रेति
मांत्रिकाः ३७ ब्रह्मनिर्वाणं ब्रह्मानंदः तत्र समाधिरैकाग्र्यमाश्रितं योगकक्षां योगपट्टं च वामजानुदक्षिकरणार्थं विशेषेण

पाश्रितं वंतं मननशीला मनवस्तेषां आद्यं मुख्यं ३८ महत्तमो
विष्णुर्वामनमूर्तिर्यथा कस्यपस्य ३९

२०

ययोरंभो विगततर्षोपि गजः पिबंतीति तत्र हेतुः तासां पुरस्त्रीणांस्नानेन नालितं यन्नवकुंकुमं तेन पिंजरं पीतवर्णं गजीः करिणीः
२५ तारं रूप्यं तारादिमयविमानानां शतैः संकुलां तडिद्भिः स्त्रीणां घनैर्विमानानां खेन पुण्याः स दृश्य २६ यक्षेश्वरपुरीं हित्वाऽत्र
तिक्रम्य तद्वनं दृष्ट्वा ते देवा आरात् दूराद् ददृशुरिति चतुर्थेनान्वयः कथंभूतं वनं चित्राणि माल्यानि फलानि छदाः पत्रा

तयोस्तत्स्नानविभ्रष्टनवकुंकुमपिंजरं वितृषोपि पिबंत्यंभः पाययंत्यो गजा गजीः २५ तारहेममहा
रत्नविमानशतसंकुलं जुष्टं पुण्यजनस्त्रीभिर्यथा खं सतडिद्घनं २६ हित्वा यक्षेश्वरपुरीं वनं सौगंधिकं
च तत् द्रुमैः कामदुघैर्हृद्यं चित्रमाल्यफलच्छदैः २७ रक्तकंठखगानीकस्वरमंडितषट्पदं कलहंस
कुलप्रेष्ठं खरदंडजलाशयं २८ वनकुंजरसंघृष्टहरिचंदनवायुना अधिपुण्यजनस्त्रीणां मुहुरुन्मथ
यन्मनः २९ वैडूर्यकृतसोपानावाप्युत्पलमालिनी प्राप्तं किंपुरुषैर्दृष्ट्वा त आराद् ददृशुर्वटं ३० स
योजनशतोत्सेधः पादोनविटपायतः पर्यक्कृताचलच्छायो निर्नीडस्तापवर्जितः ३१

णि च येषु तैर्द्रुमैर्हृद्यं सुखकरं २७ रक्तकंठखगानामनीकस्य स्वरैर्मंडिताः षट्पदाः षट्पदस्वरा यस्मिन् कलहंसानां कुलस्य
प्रेष्ठं खरदंडानि पद्मानि तैर्युक्ता जलाशया यस्मिन् २८ वनकुंजरैः संघृष्टा ये हरिचंदनद्रुमास्तत्संबंधिना वायुना पुण्यजन
स्त्रीणां मनः अधि अधिकमुन्मथयत् २९ यत्र च उत्पलमालिन्यो वाप्यस्तत् किंपुरुषैः प्राप्तं वनं दृष्ट्वा पार्श्वांतरे किंपुरुषैः प्रा
प्ता वापी स्वरदृष्ट्येत्यर्थः ३० योजनशतमुत्सेधः उच्छ्रयो यस्य पादोनैः सर्वतः पंचसप्ततियोजनप्रमाणैः विटपैः शाखाभिरायतो वि

स्ताः पर्यंकः सर्वतः कृता कृचलाछाया येन निर्गतानीडम्
यस्मात् ३१

तत्कुतोऽत्र हेतुरस्य संभवमिति कैमुत्यन्यायेनाह नवैसतां सतः रोषोऽभिभवेत् नत्वत्वां द्वितीयार्थे षष्ठी पशुं अत्रत्वं य
थाभतिमिथ्यातद्वत् ४५ अतः ये पृथग्धियः भेददृशः अतः कर्मण्येव दृष्टिर्येषां दुष्टआशयो येषां परेषामुदयेन संपदा आर्पि
ताहृदये रुक्कुयेषां अरुंतुदाः मर्मभेत्तारः दैवेनैव वधो येषां तान् भवद्विधो निरुपमः साधुः संवधी न्न हन्यात् ४६ प्रत्यु
तः साधूनां वत्तमालोकानुग्रहमेव कर्त्तुमर्हसीत्याह द्वाभ्यां यस्मिन् देशे यदा काले स्पष्टधियो मोहिताः पृथग्दृशो

नवैसतां त्वच्चरणार्पितात्मनां भूतेषु सर्वेष्वभिपश्यतां तव भूतानि चात्मन्यपृथग्दिदृक्षतां प्राये
णरोषोभिभवेद्यथापशुं ४५ पृथग्धियः कर्मदृशो दुराशयाः परोदयेनार्पितहृद्रुजोनिशं परा
न्दुरुक्तैर्वितुदंत्यरुंतुदास्तान्मावधीद्दैववधान्भवद्विधः ४६ यस्मिन्यदापुष्करनाभमायया दुर्लंघ्य
यास्पृष्टधियः पृथग्दृशः कुर्वंति तत्र ह्यनुकंपया कृपां न साधवो दैवबलात्कृते क्रमं ४७ भवांस्तु पुंसः
परमस्य मायया दुरंतया स्पृष्टमतिः समस्तदृक् तया हतात्मस्वनुकर्मचेतस्स्वनुग्रहं कर्त्तुमिहार्ह
सि प्रभो ४८

भवंति तत्रापराधे साधवो हि अनुकंपया अनंतरमेव परदुःखासहिष्णुतया चित्तकंपे
नक्रियां कुर्वंति न तु क्रमं कृत्तः दैवबलात्कृतार्थमिमैव दैवमेवं भूतं को वापराधस्तेषामिति मत्वा हननं न कुर्व
दित्यर्थः ४७ भवांस्तु अस्पृष्टमतिः अतः समस्तदृक् सर्वज्ञः तया मायया हता आत्मा येषां तेषु अत एव कर्मानुगतचि
त्तेषु इह अपराधेऽनुग्रहं कर्त्तुमर्हसि ४८ ॥ ss ॥

महर्षिभिःसहिताःयेनीललोहितमनुवर्त्तन्तेपितस्तेवंदनंचक्रुः॥ एवंसर्वैर्नमस्कृतः। प्राहकृतप्रणामोदेवैर्यस्मैतं ६० यद्यपि
त्वंनीचवन्मांनमस्करोषि तथापित्वमैश्वर्य्यमहंवेद्मीत्याह॥ जानइति॥ विश्वस्येशंजाने॥ तत्रहेतुः जगतोयोनिर्याशक्तिःप्रकृतिवीजं
चशिवःपुरुषःतयोःकारणंतथापिनिर्भेदंयत्तद्ब्रह्मनिर्विकारंतदेवत्वमितिजाने नतुविरुद्धमेतत् ६१ त्वमेवस्वरूपयोर
विभक्तयोःशिवशक्त्योःक्रीडन्विश्वसृष्ट्यादिकरोषि ऊर्णनाभिरिवस्वरूपयोरितिपाठे स्वांशयोः अत्रतेनविशेषः ६२

तथापरेसिद्धगणामहर्षिभिर्येवैसमंतादनुनीललोहितं॥ नमस्कृतःप्राहशशांकशेखरंकृतःप्र
णामंप्रहसन्निवात्मभूः॥ ६० ॥ ब्रह्मोवाच ॥ जानेत्वामीशंविश्वस्यजगतोयोनिवीजयोः शक्तेःशिवस्य
तरं ३ चपरंयत्तद्ब्रह्मनिरं ॥ ६१ ॥ त्वमेवभगवन्नेतच्छिवशक्त्योःसरूपयोः विश्वंसृजसिपास्यत्सिक्रीडन्नूर्ण
पटोयथा ६२ त्वमेवधर्मार्थदुघाभिपत्तयेदक्षेणसूत्रेणससर्जिथाध्वरं त्वयैवलोकेऽवसिताश्च
सेतवोयान्ब्राह्मणाःश्रद्दधतेधृतव्रताः॥ ६३ ॥ त्वंकर्मणांमंगलमंगलानांकर्तुःस्मलोकंतनुषेस्वःपरंवा
॥ अमंगलानांचतमिस्रमुल्बणंविपर्य्ययःकेनतदेवकस्यचित् ६४

धर्ममर्थंचदोग्धि यात्रयीतस्याःअभिमतयेरक्षणाय ध्वरस्रष्टवानसि यद्वाहेमाधुर्दुग्ध धर्मार्थाभिपत्तयेतत्प्राप्तयेदक्षे
णदक्षसूत्रेणनिमित्तेनसेतवोवर्णाश्रममर्यादाश्चत्वयैववसितानिवृत्तानिर्णीताइतिवा श्रद्दधतेश्रद्धयानुतिष्ठन्ति ६३
सर्वकर्मफलदाताऽपित्वमेवेत्याह हेमंगलमंगलानांशुभानांकर्मणांकर्तुःस्वर्गंपरंमोक्षंवातनुषे अमंगलानांक
र्मणांकर्तुश्चतमिस्रंनरकंतनुषे तत्रकेनहेतुनातदेवतस्मिन्नेवकस्यचिद्विपर्य्ययोभवति ६४ ॥ राम ॥ ऽऽ ॥

भा० च० प्रकर्षेण कृत्तानि भग्नान्यंगानि येषां ते भवंतु उच्छेषणं यज्ञावशिष्टं ४ येषां त्वंगानि विनष्टानि ते तु अश्विनोर्बाहुभ्यां
२२ कृतबाहवः पूष्णो हस्ताभ्यां कृतहस्ताश्च भवंतु अध्वर्य्यवः अन्ये च ऋत्विजः बस्तस्य श्मश्रूणि एव श्मश्रूणि यस्य पु
मीढुष्टमः शिवः तेनोक्तं परितुष्टात्मभिः स्तुतैः ६ मीढ्वांसं शिवं तत्रागत्य सर्वं कार्य्यं इत्यामंत्र्य संप्रार्थ्य सुनासीरा

पूषा तु यजमानस्य दद्भिर्यक्षतु पिष्टभुक् देवाः प्रकृतसर्वांगा ये म उच्छेषणं ददुः ४ बाहु
भ्यामश्विनोः पूष्णो हस्ताभ्यां कृतबाहवः भवंत्वध्वर्य्यवश्चान्ये बस्तश्मश्रुर्भृगुर्भवेत् ५ ॥श्रीमैत्रे
य उवाच ॥ तदा सर्वाणि भूतानि श्रुत्वा मीढुष्टमोदितं परितुष्टात्मभिस्तात साधु साध्वित्यथाब्रुवन्
६ ततो मीढ्वांसमामंत्र्य सुनासीराः सहर्षिभिः भूयस्तद्देवयजनं समीढ्वद्वेधसो ययुः ७ विधाय का
र्त्स्न्येन च तद्यदाह भगवान्भवः संदधुः कस्य कायेन सवनीयपशोः शिरः ८ संधीयमाने शि
रसि दक्षो रुद्राभिवीक्षितः सद्यः सुप्त इवोत्तस्थौ ददृशे चाग्रतो मृडं ९ तदा वृषध्वजद्वेषी
कलिलात्मा प्रजापतिः शिवावलोकादभवच्छरद्ध्रद इवामलः १० भवस्तवाय कृतधीर्नाशक्नोदनु
रागतः औत्कंठ्याद्बाष्पकलया संपरेतां सुतां स्मरन् ११
देवाः सह मीढुषा ब्रह्मणा च वर्त्तमाना स्समीढ्वद्वेधसः ७ कार्त्स्न्येन कृत्तहस्तबाह्वादिसाधारणं पुविधाय प
९ एवं वृषध्वजद्वेषेण कलिलः कलुषीकृत आत्मा यस्य सः तदा शरत्कालीनो ह्रद इवामलोऽभवत् २२

एवंसामान्येनोक्त्वा प्रस्तुतमाह कुर्विति त्रिभिः त्वयाहतस्य अत एवासमाप्तस्य प्रजापतेरध्वरस्य हे मनो यत्र अध्वरे कुयाज्ञि
कः भागिनोपि भागं न ददुः भागार्हत्वमाह येन त्वया मखो निनीयते फुल्लप्राप्यते ४९ हे मन्यो अन्यसुरमारोग्यमस्तु ५०
५१ भागश्च तवास्त्वित्याह एष इति हे रुद्र यवदित्यर्थे यदित्यव्ययं यज्ञे कृते यावानुच्छिष्टः अवशिष्टोर्थः तावानेष तव भागो

कुर्वध्वरस्योद्धरणं हतस्य भो त्वयासमाप्तस्य मनो प्रजापतेः नयत्र भागं तव भागिनो ददुः कुयाज्ञिनो येन म
खो निनीयते ४९ जीयतां यजमानोयं प्रपद्येताक्षिणी भगः भृगोः श्मश्रूणि रोहन्तु पूष्णो दन्ताश्च पूर्व
वत् ५० देवानां भग्नगात्राणां ऋत्विजां चायुधाश्मभिः ॥ भवतानुगृहीतानामाशु मन्योस्त्वनातुरं ॥५१॥
एष ते रुद्र भागोस्तु यदुच्छिष्टोध्वरस्य वै ॥ यज्ञस्ते रुद्र भागेन कल्प्यतामद्य यज्ञहन् ॥५२॥ इति श्रीमद्भा
गवते महापुराणे चतुर्थस्कंधे रुद्रसांत्वनं षष्ठोध्यायः ॥६॥ श्रीमैत्रेय उवाच ॥ इत्यजेनानुनीतेन भवेन परि
पूंतित्विता ॥ अभ्यधायि महाबाहो प्रहस्य श्रूयतामिति ॥१॥ श्रीमहादेव उवाच ॥ नाघं प्रजेश बालानां वर्णये
नानुचिंतये देवमायाभिभूतानां दण्डस्तत्र धृतो मया ॥२॥ प्रजापतेर्दग्धशीर्ष्णो भवत्वजमुखं शिरः मित्र
स्य चक्षुषेक्षेत भागं स्वं बर्हिषो भगः ॥३॥

स्तु तेन भागेनाद्य यज्ञः कल्प्यतां संपाद्यतां ५२ इति चतुर्थे षष्ठः ॥६॥ सप्तमे विष्णुरुद्भूतः स्तुतो दक्षभवादिभिः यज्ञं प्रवर्तया
मास दक्षेणेति निरूप्यते १ अजेन योऽनुनीतः प्रार्थितो भवस्तेनाभिहितं हे महाबाहो विदुर १ २ अघमपराधं बालापर
धमपहृत्यानुगृह्णाति दग्धशीर्षस्य तस्य प्रजापतेः अजस्य मुखं यस्मिन् तत्तथाभूतं शिरोऽस्तु बर्हिषः संबंधिनं

तुष्यता

भा० च० वीराणां प्रभयादीनां संसर्गकृतदोषस्यशुद्धये निवृत्त्यर्थे १७ उपात्तहविषा अध्वर्युणा सहविष्णुर्दृष्यानुध्याद ध्येयं
२३ हे विष्णो पतेविदुर १८ स्वयाप्रभुतया तेषां तेजोमुष्णन् तिरस्कुर्वन् उपानीतः समीपं प्रापितः स्तोत्रे हहद्रथं त
वाजो पक्षौ तद्द्वह हृहद्रथं तरे पक्षाविति श्रुतेः १९ तमेवानुवर्णयति श्यामइति द्वाभ्यां हिरण्यवद्रसनाय स्येति
वैस्मवंयज्ञसंतत्यै त्रिकपालं हि द्विजोत्तमाः वीरसंसर्गेशुद्धये १७ अध्वर्युणात्तह
विषा यजमानो विष्णो पतेधियाविमृद्ध्याद ध्यौत यथाप्राद्रुरभूद्धरिः १८ तदास्वप्रभयातेषां द्योतयंत्यो
दिशो दश मुष्णन् तेजउपानीत स्तोत्रैः स्वस्तोत्र वाजिना १९ श्यामो हिरण्यरसनोऽर्कक्किरीट जुष्टो
नीलालकभ्रमरमंडितकुंडलास्यः कंबुवुचक्राशरचापगदासीचर्मव्यग्रैर्हिरण्मयभुजैरिवकर्णि
कारः २० वक्षस्यधिश्रितवधूवनमालुदारहासावलोककलयारमयश्चविश्वं पार्श्वभ्रमद्व्यज
नचामरराजहंसः श्वेतातपत्रशशिनोपरिरज्यमानः २१ तमुपागतमालक्ष्य सर्वे सुरगणादयः
प१ प्रणेमुः सहसोत्थाय ब्रह्मेंद्रत्र्यक्षनायकाः २२ वस्त्रं लक्ष्यते अर्कतुल्येन किरीटेन जुष्टः नीलालका एव भ्रम
राः स्तैर्मंडितं कुंडलयुक्तमास्यं यस्य कंब्वादिभिरायुधैर्व्यग्रैर्हस्ता र्थव्यग्रैः हिरण्मयैर्भुजैः पुष्पितः कर्णिकार इव शो
भमानः भुजानां हिरण्मयत्वं केयूरकंकणमुद्रिकाद्यलंकारैः २० वक्षसि अधिश्रिता वधूर्लक्ष्मीर्यस्यसः उदा
रोहासोऽवलोकश्चेतयोः कलया लेशेन पार्थिन पार्श्वे उभयतो भ्रमंती व्यजनचामरे एव राजहंसो यस्मिन्

सः रज्यमानः शोभातिशयं नीयमानः २१
अद्यानायकामनुरव्यायेषांते २२

त ३

१२ यदपिविप्रलब्धः पराभूतोमयाऽभवत् तथापित्वयादंडोभृतः सिक्षाकृता नतूपेक्षितोऽस्मि युक्तमेवैतदित्याह
च २ ब्रह्मबंधुषुब्राह्मणाभावेष्वपि तुभ्यंतवहरेश्चेतिवांयुवयोरवज्ञाउपेक्षानास्ति १३ तत्रहेतुमाह विद्येति ब्राह्मणान्भूत्वा
त्वमसृजः किमर्थमात्मतत्त्वमवितुं यद्वा ब्रह्मवेदआत्मतत्त्वंचअवितुंसंप्रदायप्रवर्त्तितेनज्ञापयितुमित्यर्थः तत्तस्मात्

कृच्छ्रात्संस्तभ्यचमनःप्रेमविह्वलितःसुधीः शशंसनिर्व्यलीकेनभावेनेशंप्रजापतिः १२ दक्ष उवाच ॥
भूयाननुग्रहअहोभवताकृतोमेदंडस्त्वयामयिभृतोयदपिप्रलब्धः नब्रह्मबंधुषुचवांभगवन्नवज्ञातु
भ्यंहरेश्चकुतएवधृतव्रतेषु १३ विद्यातपोव्रतधरान्मुखतश्चविप्रान्ब्रह्मात्मतत्त्वमवितुंप्रथमंत्वमस्रा
क् तद्ब्राह्मणान्परमसर्वविपत्सुपासिपालःपशूनिवविभोप्रगृहीतदंडः १४ योसौमयाविदितत
त्त्वदृशासभायांक्षिप्तोदुरुक्तिविशिखैरगणय्यतन्मां अर्वाक्पतंतमर्हत्तमनिंदयापात्दृष्ट्यार्द्रया
सभगवान्ममकेनतुष्येत् ॥१५॥ श्रीमैत्रेय उवाच ॥ क्षमाप्यैवंसमीढ्वांसंब्रह्मणाचानुमंत्रितः कर्मसं
तानयामाससोपाध्यायार्त्विगग्निभिः १६

हे परम उत्कृष्ट १४ अत्रचप्रत्युपकारोनास्तीत्याह योसाविति अविदिततत्त्वदृशो अप्राप्ततत्त्वज्ञानेन तत्त्वमगणय्य विस्मृ
त्य अर्हत्तमनिंदया अर्वाक् अधःपतंतंमाममपात् रक्षितवान् स्वकृतेनैव अनुग्रहेणैवतुष्येत् नमयातत्प्रतिकर्तुंशक्य
मित्यर्थः १५ अनुमंत्रितोऽनुज्ञातः उपाध्यायसहितैः ऋत्विगादिभिः अनुवर्त्तयामास १६ ॥ ऽऽ ॥

भा० च०
२४

ग२

ध्यवस्थायस्मात् अतः एकं भेददृष्ट्यं अत एवाभयं भवतीति श्रुतेः जीवस्यापि वस्तुतः एवंभूतत्वात द्वैलक्षण्यार्थमुक्तं मायां
प्रतिविध्य अभिभूय स्वतंत्र एव सन् तया मायया पुरुषत्वं मनुष्यनाट्यमुपेत्य तस्यां मायायां तिष्ठन् अपरिशुद्धद्रवेगादि
मानिवास्ते एमहत्स्वावतारे तथा प्रतीयते भवानित्यर्थः अन्ये तु अविद्योपाधयो मायाभिभूताः संसरंति अतस्त्वमेवेश्वरा न
रुद्रादयः इति भावः अतएवेमां भेददृष्टिं भगवान् वारयिष्यति अहं ब्रह्मा च सर्वश्च जगतः कारणं परमित्यादिना २६॥

ऋत्विज ऊचुः॥ तत्त्वं न ते वयमनंजन रुद्रशापात् कर्मण्यवग्रहधियो
ग२ भगवन् विदामः धर्मोपलक्षणमिदं त्रिवृदध्वराख्यं ज्ञातं यदर्थमधिदै
वमदोव्यवस्थाः २७

ऋत्विजोपि तस्यापराधं परिहरंतः स्तुवंति भो अनंजन उपाधिमलशून्य यद्यपि त्वमेव रुद्रादिरूपः तथा
पि नंदीश्वर शापात्कर्मण्येव दुरग्रहधियः संतस्तव तत्त्वं न विद्मः किंतु धर्मस्यापूर्वस्योपलक्षणभूतं त्रिवृत् त्रयी
प्रतिपाद्यमध्वराख्यं तव रूपमस्माभिर्ज्ञातं कीदृशो यदर्थं यस्य सिद्ध्ये [illegible] अधिदैवं त्राधिकारेण अदो
व्यवस्थाः अत्र इयमेव देवदेवता नान्येत्येवंभूता नियमा इत्यर्थः यद्वा व्यवस्था इत्याख्यातं अङ्गमाद्यभा
वश्रार्षः यदर्थं अदः इदं इंद्राद्यधिदैवं रूपविशेषेण स्थितवानसीत्यर्थः २७

२४

हतरुचः तिरस्कृतप्रभाः सन्नजिह्वा गद्गदवाचः ससाध्वसाः तन्महिम्ना क्षुभितचित्ताः उपतस्थुः तुष्टुवुः २३ य
स्य महिम महिमानं प्रति तु अर्वाग्वृत्तयो येषां ते पि यथामति गृणंति स्म अस्तुवन् कृतः प्रकटीकृतो ऽनुग्रहार्थं विग्रहो
येन तं यद्वा नेषां अर्वाग्वृत्तित्वे हेतुः ते तु तस्य महिम महिमा विभूतिमात्ररूपा इत्यर्थः २४ तत्र तावद्दक्षस्तुतिप्र
कारमाह दृष्ट्वेति गृहीतमर्हणं सादनं तमं येन तं अत्र मे पात्रे आगते आसाद्य अर्हणेषु समर्पितेषु प्रीत्या मा अर्हस
पात्रमेव येन गृहीतमित्यर्थः यद्वा कथं प्रपेदे गृहीतमर्हणं सादनोत्तमं यथा भवति तथा तद्गृहीत्वा प्रपद्य इत्यर्थः गृही

तत्तेजसा हतरुचः सन्नजिह्वाः ससाध्वसाः मूर्ध्ना धृतांजलिपुटा उपतस्थुरधोक्षजं २३ अप्यर्वाग्वृत्तयो
यस्य महित्वात्मभुवादयः यथामति गृणंति स्म कृतानुग्रहविग्रहं २४ दक्षो गृहीतार्हणसादनोत्त
मं यज्ञेश्वरं विश्वसृजां परं गुरुं सुनंदनंदाद्यनुगैर्वृतं मुदा गृणन् प्रपेदे प्रयतः कृतांजलिः २५ दक्ष उवाच
शुद्धं स्वधाम्न्युपरताखिलबुद्ध्यवस्थं चिन्मात्रमेकमभयं प्रतिषिध्य मायां तिष्ठंस्तयैव पुरुषत्वमुपेत्य
तस्यामास्ते भवानपरिशुद्ध इवात्मतंत्रः २६ चेति पाठः सुगमः गृणान् स्तुवन् प्रपेदे शरणं जगाम २५ ऋ
त्विक्सदस्येशभृगुब्रह्मेंद्रयोषितः ऋषयश्च तथा सिद्धा यजमानी च लोकपाः योगिब्रह्माग्निदेवाश्च स्तुवंति ज
गदीश्वरं तथा गंधर्वविद्याधरब्राह्मणाश्च पृथक् पृथक् अतः ननु साक्षात्परमेश्वर एव रुद्रः तस्य ब्राह्मपुत्रत्वेन जीवत्वमनु
करणमात्रं हंत किमिति त्वया किमिति भेदं दृष्टोऽसोऽज्ञात इति मां भगवान् आशिष्यसीत्यापांक्याम युत स्वरूप
स्य जीवधर्मानाधं तावेव संगच्छते नान्यस्येत्याह शुद्धमिति स्वधाम्नि स्वस्वरूपे तिष्ठन् भगवान् शुद्धचिन्मात्रचेत

भा० च०
१२५

भृगुस्तुस्वभावतस्तत्वज्ञानहीनाज्जीवाः अतोऽज्ञानकृतं मम दुश्चेष्टितं क्षमस्वेत्याह यन्माययेति आत्मन्या
त्मनिश्रितं अनुगतं तव तत्वं न विंदंति प्रणतानामात्मवंधुश्च ३० ब्रह्मादयो न विंदंतीति भृगुणोक्तं तत्र सहमा
नोब्रह्मातत्त्वंज्ञानुमाविष्कुर्वन्नेवाह नैतदिति पदार्थभेदग्राहकैः इंद्रियैः गुणस्य इंद्रियस्य यद्वा ज्ञानार्थयोः
कारणस्यसत्वादेः ॥३१॥ इंद्रस्तुइंद्रियविषयः सर्वोपिमिथ्येतिब्रह्मणोक्तं महिमानमाह इदंतत्वेवपुरपिउप

भृगुरुवाच ॥ यन्माययागहनयाऽपहृतात्मबोधाब्रह्मादयस्तनुभृतस्तमसिस्वपंतः ॥ नात्मन्श्रितं तव
विदंत्यधुनापितत्वंसोयंप्रसीदतुभवान्प्रणतात्मवंधुः ॥३०॥ ब्रह्मोवाच ॥ नैतत्स्वरूपंभवतोऽसौपदार्थ
व२ भेदग्रहैःपुरुषोयावदीक्षेत् ॥ ज्ञानस्यचार्थस्यगुणस्यचाश्रयोमायामयाद्व्यतिरिक्तोयतस्त्वं ॥३१॥ इंद्र
उवाच ॥ इदमप्यच्युतविश्वभावनंवपुरानंदकरंमनोदृशां ॥ सुरविद्विट्क्षपणैरुदायुधैर्भुजदंडै
रुपपन्नमष्टभिः ३२ पत्न्य ऊचुः ॥ यज्ञोयंतवयजनायकेनसृष्टोविध्वस्तःपशुपतिनाद्यदक्षकोपात् तं
नस्त्वंशवशयनाभशांतमेधंयज्ञात्मन्नलिनरुचादृशापुनीहि ३३

पन्नमेव नतुप्रपंचवदनिर्वचनीयतयाऽनुपपन्नं. सुराणां विद्विषः क्षपयंतीति क्षपणैः तैर्भुजदंडैरुपलक्षितं ३२ ऋत्विक्पा श्री
पत्न्यस्तुवंति येषां नोऽयं तव यजमानाय त्वां यष्टुं केन ब्रह्मणा पूर्वं सृष्टः हेयज्ञात्मन् तं नोयज्ञं नलिनरुचा कांत्या दृशा. वि
नेत्रेण पुनीहि पवित्रंकुरु कथंभूतं यज्ञं शवाः शेरते यस्मिन्निति शवशयनं स्मशानं तद्वदाभा प्रतीतिर्यस्य सचासौ शांत त
तमेधश्च उपरतोत्सवः मेधशब्देन पशुहिंसादुत्सवो लक्ष्यते शवमुदकं तत्र शेरत इति तथा पद्मेत्यनामेति संबोध. २५

सदस्यास्तु निरीश्वरोपि दद्याध्वरे धनलोभेन स्ववृत्तिमनुचिंत्यातु तृष्णाविरक्तिमाशानाः स्तुवंति हे शरण्य अस्म
यप्रद उत्पत्यध्वनि संसारमार्गे वर्त्तमार्गे वर्त्तमानो श्रांतानां सार्थः समूहस्ते पादैकः त्वद् पादरूपं निवासं कदायास्या
मीति अशरणे विश्राममूर्त्ये उरुक्लेशा एव दुर्गे मत्स्थानानि यस्मिन् श्रांत एव अग्रो व्यालस्तेनान्वीष्टे लक्ष्मीकृते यस्मिन्
विषयरूपामृगतृष्णाका यस्मिन् ॥ आत्माहंकारास्पदं गेहं च स एव उरुभारो यस्य सः द्वंद्वानि सुखदुःखादीन्येव स्वभ्रा

॥ सदस्या ऊचुः ॥ उत्पत्यध्वन्यशरण उरुक्लेशदुर्गेंतकोग्रव्यालान्विष्टे विषयमृगतृष्णात्मगे
ह्योरुभारः ॥ द्वंद्वस्वभ्रे खलमृगभये शोकदावेज्ञसार्थः पादौकस्ते शरणद कदा याति कामोपसृष्टः ॥ २
रुद्र उवाच ॥ तव वरद वरांघ्रावाशिषेहाखिलार्थे ह्यपि मुनिभिरसक्तैरादरेणार्हणीये यदि रचित
धियं माविद्यलोको पविद्धं जपति न गणये तत्त्वत्परानुग्रहेण २९

णगर्त्ती यस्मिन् खला एव मृगा व्याघ्रादयस्तेभ्यो भयं यस्मिन् शोक एव दावाग्निर्यस्मिन् कालेनोपसृष्टः पीडितः
२८ श्रीरुद्रस्तु पूर्वमनिंदादुःसहा आसीत् इदानीं तु तं गणयामीत्याह तवेति आशिषा कामेनाशक्तैर्निष्कामैः
रचितधियं अभिनिवेशितचित्तं मां मां अविद्यः विद्याहीनो लोकः यदि अपविद्धं जपति आचारभ्रष्टं जल्पति त
तः जल्पनं तव यः परोनुग्रहः त्वत्परायणानां वा योनुग्रहस्तेन २९ रामरामरामरामरामरामरामरामराम

लोकपालास्त्वीश्वरत्वाभिमानारूढा भगवतस्तत्वमपश्यंत ऊचुः दृष्टइत्यर्थः कुतः असद्ग्रहैः पुंस्त्वमाविष्टलिंगात्वादस्त
त्प्रकाशरूपाभिः दृग्भिरिंद्रियैः अयंभावः। शुद्धचित्तानां त्वं शुद्धचित्तमूर्तिर्भासि। अस्माकंतु वहिर्मुखेंद्रियाणां पंचभूतोप
लक्षितोजीवविशेषइवाभासि। अतस्त्वमस्मदिंद्रियगोचरो न भवसि। धिगस्मज्जीवितमिति। ३७। योगेश्वरास्तदभेदेनभ
जतामनुग्रहं भाक्तमन्यमानाः स्वाभिन्नत्वभावेन भजतामप्यनुग्रहं प्रार्थयमानाः स्तुवंति द्वाभ्यां प्रेयानितिविश्वात्मनि

लोकपाला ऊचुः॥ दृष्टः किंनो दृग्भिरसद्ग्रहैस्त्वं प्रत्यग्द्रष्टा दृश्यते येन दृश्यं। मायाह्येषा भवदीया हि
भूमन्यस्त्वं षष्ठः पंचभिर्भासि भूतैः ३७ ॥योगेश्वरा ऊचुः॥ प्रेयान्न तेऽन्योऽस्त्यमुतस्त्वयि प्रभो विश्वात्मे
नीक्षेन्न पृथग्य आत्मनः अथापि भक्त्येश तयोपधावतामनन्यवृत्त्यानुगृहाण वत्सल ३८ जगदुद्भव
स्थितिलयेषु दैवतो बहुभिद्यमानगुणयात्ममायया रचितात्मभेदमतये स्वसंस्थया विनिवर्तितभ्रम
गुणात्मने नमः ३९

परब्रह्मणि त्वयि आत्मनः पृथक्त्वं नेक्षेत न अमुतः अमुष्मात् अन्यः ते प्रेष्ठो नास्ति आत्मनो जीवान् पृथक्त्वं नेक्षेत इति वा वत्सलः भ
क्तप्रियः अनन्यवृत्त्या भक्त्या अव्यभिचारिभक्त्या भजतोऽनुग्रहेण इत्यर्थः ३८ अव्यभिचारिणी भक्तिः कथं स्यात् भजनी
यानां बहुत्वादित्याशंक्याह जगतः उद्भवादिषु दैवतो जीवादृष्टात् बहुधा भिद्यमाना गुणा यस्याः तया स्वमायया
आत्मनि स्वरूपे चित्ते ब्रह्मादिभेदमतिर्येन तस्मै स्वसंस्थया केवलरूपावस्थानेन च विनिवर्तितो भ्रमो गुणाश्च तद्धेत

ऋषयस्तु कर्माण्यनुतिष्ठंतस्तत्तु एवेन तत्फलेन च युज्यंते भगवति न तद्भगवमालोच्य विस्मिता स्तुवंति अनन्वितं घ
टमानं यद्यस्मात् आत्मना स्वयं कर्माचरसि अनुतिष्ठसि न त्वज्यसे लिप्यसे यतश्च अन्ये विभूतये संपदे ईश्वरीत्वं श्री
मुपसेदुः भेजुः यद्वा यत इति सार्वविभक्तिकस्तसि यामित्यर्थः मे वां स्तु स्वयमेवानुवर्त्तमानां तां न मन्यते बाढ़ि
यत्ते ॥ ३४ ॥ सिद्धांतु तत्कथायास्सुखमभिनंदंतः स्तुवंति अयं नो मनोराजः त्वत्कथैव मृष्टश्रुद्धंपीयूषं तन्मयीया नदी

ऋषय ऊचुः ॥ अनन्वितं ते भगवन् विचेष्टितं यदात्मना चरसि हि कर्म नाज्यसे ॥ विभूतये यत उपसेदुरी
श्वरीं न मन्यते स्वयमनुवर्त्ततीं भवान् ॥ ३४ ॥ सिद्धा ऊचुः ॥ अयं त्वत्कथामृष्टपीयूषनद्यां मनोवारणः
क्लेशदावाग्निदग्धः ॥ तृषार्त्तोवगाढो न संस्मार दावं न निष्क्रामति ब्रह्मसंपन्नवन्नः ॥ ३५ ॥ यजमान्युवा
च ॥ स्वागतं ते प्रसीदेश तुभ्यं नमः श्रीनिवास श्रिया कांतया त्राहि नः त्वामृतेधीश नांगैर्मखः शोभते शी
र्षहीनः कबंधो यथा पूरुषः ॥ ३६ ॥

तस्यां अवगाढः प्रविष्टो दावाग्नितुल्यं संसारं तापं न स्मरति स्म न च ततो निर्गच्छति ब्रह्मसंपन्नवत् ब्रह्मैक्यं प्राप्त इ
व ॥ ३५ ॥ यजमानी दक्षपत्नी स्तौति स्वागतं भद्रमागमनं जातं हे अधीश यथा शिरसा हीनः कबंधमात्रः पुरुषो अंगैः
करचरणाद्यवयवैः शोभनैरपि न शोभते तथा त्वां विना केवलैः प्रयाजाद्यंगैर्मखो न शोभते अतो नः श्रिया सह त्रायस्व
त्वद्रक्षां कुर्वित्यर्थः ॥ ३६ ॥

भा० च०
२७

तस्मै निरस्तनाप्यनमस्तोकरवाम॥ विद्याधराऊचुः॥ त्वन्माययार्थमभिपद्यकलेवरेऽस्मिन्२

गंधर्वास्परसस्तुवयंभिया केवलं सर्वा न यि परमेश्वरत्वेनोपश्लोकयामः त्वमेव तु परमेश्वरः अन्ये तु त्वदंशा एवे
त्याहुः॥ त्वं अंशभाज इति हे विभूमन् महत्तमा क्रीडाभांडं क्रीडोपकरणं विश्वं ब्रह्मांडं यस्य तस्मै नमः कुर्मः ४३ वि
द्याधरास्तु केवलं विद्याभिः संपदः प्राप्यन्ते॥ अहंकारादि व्यामोहनिवृत्तिस्तु त्वत्कथाश्रवणं विना नास्तीत्याहुः अ
द्याधरास्तु केवलं विद्याभिः संपदः प्राप्यं ते अहं कारादि व्यामोहनिवृत्तिस्तु त्वत्कथाश्रवणं विना नास्तीत्याहुः॥ अ
र्थपुरुषार्थसाधनं कलेवरं अभिपद्य प्राप्य त्वन्मायया अस्मिन्ममेति चाभिमानभ्रत्वा इममात्ममोहं युष्मत्कथ्य

गंधर्वा ऊचुः॥ त्वं अंशभाजस्ते देव मरीच्यादय एते ब्रह्मेंद्राद्या देवगणा रुद्रपुरोगाः॥ क्रीडाभांडं विश्वमिदं
यस्य विभूमन् तस्मै नित्यं नाथ नमस्ते करवाम॥ विद्याधरा ऊचुः॥ त्वन्माययार्थमभिपद्य कलेवरेऽस्मिन् कृत्वा ममाहमिति दुर्मतिरुत्पथैः स्वैः॥ क्षिप्तोऽप्यसद्विषयलालस आत्ममोहं युष्मत्क
थामृतनिषेवक उद्व्युदस्येत् ४४ ब्राह्मणा ऊचुः॥ त्वं क्रतुस्त्वं हविस्त्वं हुताशः स्वयं त्वं हि मंत्रः स
मिद्दर्भपात्राणि च त्वं सदस्यर्त्विजो दंपती देवता अग्निहोत्रं स्वधा सोम आज्यं पशुः ४५ त्वं पुरा गां रसा
या महासूकरो दंष्ट्रया पद्मिनीं वारणेंद्रो यथा स्तूयमानो नदल्लीलया योगिभिर्व्युज्जहर्थ त्रयीगात्र य
ज्ञक्रतुः ४६

स्तनिषेवकः उत्तउच्चैर्व्युदस्येत् परित्यज्येत नान्यः ननु स्वैः पुत्रादिभिरधिक्षिप्तोऽदुःखितः सन्
परित्यजेदेव नेत्याहुः क्षिप्तोऽपि दुर्मतिः अत्र सत्सु विषयेष्वेव लालसा तृष्णा यस्य सः ४५ ब्राह्मणाः स्तुवंति त्वमि
ति त्रिभिः ४५ सदस्या ऋत्विजश्च गां पृथ्वीं रसायाः रसातलात् दंष्ट्रया व्युज्जहर्थ विशेषेणोद्धृतवानसि योगिभिः
स्तूयमानः हे त्रयीगात्र वेदमूर्ते यज्ञो यागः स रूपं तद्विशेषः क्रतुस्तद्रूपी यज्ञसंकल्परूपं इति वा यज्ञः क्र

२७

प्रावृड्य स्तौति ॥ नमस्त इति ईप्सितं स्वीकृतं सत्वं येन अतः भक्त्यादिफलप्रस्तावे त्रिसत्वगुणत्वं निर्गुणत्वं च कथमित्याशं
क्याह यस्य काष्ठां तत्त्वं नाहं वेद्मि अपरे ब्रह्मादयश्च न विदुः तस्मै ॥ ४० ॥ अग्निस्त्वं यज्ञमूर्त्तिं प्रणमामीति यस्य तेजसा सुसमि
द्धः प्रदीप्तः तेजोऽस्य स्य सोऽहं प्रसक्तः ध्वरे हविर्वहामि तं यज्ञियं यज्ञाय हितं पालकं ॥ यज्ञं यज्ञमूर्त्तिं पंचविधत्वमैतरेयके
उक्तं स एव यज्ञः पंचविधोऽग्निहोत्रं दर्शपौर्णमासौ चातुर्मास्यानि पशुः सोम इति पंचभिर्यज्ञमंत्रैः स्विष्टः सुपूजितं तं

प्रावृड्ब्रह्मोवाच ॥ नमस्ते ईप्सितसत्वाय धर्मादीनां च सूतये ॥ निर्गुणाय च यत्काष्ठां नाहं वेदापरेऽपि च ॥ ४० ॥ अ
ग्निरुवाच ॥ यत्तेजसाहं सुसमिद्धतेजा हव्यं वहे स्वध्वरे आज्यसिक्तं ॥ तं यज्ञियं पंचविधं च पंचभिः स्विष्टं यजु
र्भिः प्रणतोऽस्मि नत्पदं ॥ ४१ ॥ देवा ऊचुः ॥ पुरा कल्पापाये स्वकृतमुदरीकृत्य विकृतं त्वमेवाद्यस्तस्मिन् सलिल उर
गेंद्राधिशयने ॥ पुमान् शेषे सिद्धैर्हृदि विमृशिताध्यात्मपदविः स एवाद्याक्ष्णोर्यः पथि चरसि भृत्यानवसि
नः ॥ ४२ ॥

याच श्रुतिः आश्रावयेति चतुरक्षरमस्तु श्रौषडिति च चतुरक्षरं यजेति द्व्यक्षरं ये यजामह इति पंचाक्षरं द्व्यक्षरो वषट्कार इ
ति स्मृतिश्च चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेव च हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदत्विति ॥ ४१ ॥ देवास्तु सत्यं चय
मिति देवाः तथापि जगदाद्यंतयोस्त्वं एव नान्यः कश्चिदित्याहुः पुरेति कल्पापाये प्रलये विकृतं कार्यजातं उदरीकृत्य
संहृत्य त्वमेवाद्यः पुमान् उरगेंद्र एवाधिकं शयनं शय्या तस्मिन् शेषे शयनं करोषि सिद्धैर्जनलोकादिवासिभिः वि
मृशिता विचिंतिता अध्यात्मपदवी ज्ञानमार्गो यस्य स एव त्वं इदानीमक्ष्णोः पथि चरसि प्रत्यक्षोऽसि अवसि रक्ष

तस्मादेवमैक्यं पश्यन्कृतार्थो भवतीत्याह त्रयाणामेकोभावः स्वरूपं येषां ५४ स्वेन क्रतुना त्रिकपालेष्ट्या उभयतः
अंगैः प्रधानेन च ५५ स्वेन भागेन यज्ञावशिष्टेन उदवस्यति समाप्यतेऽनेन त्युदवसानं तेन कर्मणा सोमपानित्यपि अयजत्
इत्यनुषंगः ५६ उदवस्य उदवस्य कर्म समाप्य अवभृथरूपं यथा भवति तथा स्नातवान् स्वेनैवानुभावेनावाप्तराध

त्रयाणामेकभावानां यो न पश्यति वै भिदां ॥ सर्वभूतात्मनां ब्रह्मन्स शांतिमधिगच्छति ॥ ५४ ॥ श्रीमैत्रेय
उवाच ॥ एवं भगवतादिष्टः प्रजापतिपतिर्हरिं ॥ अर्चित्वा क्रतुना स्वेन देवानुभयतोयजत् ५५ रुद्रं च स्वेन भा
गेन ह्युपाधावत्समाहितः कर्मणोदवसानेन सोमपानितरानपि ५६ उदवस्य सहर्त्विग्भिः सस्नाववभृथं ततः ॥
तस्मा अप्यनुभावेन स्वेनैवावाप्तराधसे ॥ धर्म एव मतिं दत्वा त्रिदशास्ते दिवं ययुः ५७ एवं दाक्षायणी हित्वा सती
पूर्वकलेवरं जज्ञे हिमवतः क्षेत्रे मेनायामिति शुश्रुम ५८ तमेव दयितं भूय आवृंक्ते पतिमंबिका अनन्यभावैक
गतिं शक्तिः सुप्तेव पूरुषं ५९ एतद्भगवतः शंभोः कर्म दक्षाध्वरद्रुहः श्रुतं भागवताच्छिष्यादुद्धवान्मे बृहस्प
तेः ६० इदं पवित्रं परमीशचेष्टितं यशस्यमायुष्यमघौघमर्षणं यो नित्यदाकर्ण्य नरोनुकीर्त्तयेद्धुनोत्यघं
कौरव भक्तिभावतः ॥ ६१ ॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे दक्षयज्ञोद्धारे सप्तमोध्यायः ॥ ७ ॥

से प्राप्तसिद्धये तस्मा अपि ५७ आवृंक्ते भजते स्म अनन्यभावानामेकैव गतिः यतः प्रलये सुप्ता शक्तिरीश्वरमिव ५९
बृहस्पतेः शिष्यान्मया श्रुतं ६० परं पवित्रं आकर्ण्य तथानुकीर्त्तयेत्स आत्मनः परस्यापि अघं संसारव्यसनं सर्वं

रघुनाथ ॥ छ ॥ शुभमस्तु ॥ ७ ॥

सत्वमस्माकं त्वद्दर्शनमाकांक्षतां प्रसीद अस्माकं ध्येयस्त्वमप्युद्धरेत्यर्थः नचाशक्यं तवैतत् यतस्तव नाम्नि कीर्त्यमाने ए
वयस्तव विघ्नास्त्यजंति एवंप्रभावोयस्य तस्मै नमः ४७ इत्यनेन प्रकारेण सर्वैः कीर्त्यमाने हे भद्र विरसन्निन्ये प्रवर्त्तेया
मास ४८ सर्वात्मतया सर्वभागोक्तापि भगवान्निजानंदतृप्तोपि स्वेन भागेन त्रिकपालपुरोडाशेन प्रीयमाण इदं वदन्त
माभाष्य संबोधयन्नभाषे ४९ योहं जगतः कारणं आत्मा चेश्वरश्च उपद्रष्टा साक्षी च स्वप्रकाशश्च निरुपाधिश्च स एव ब्रह्मा
सप्रसीदत्वमस्माकमाकांक्षतां दर्शनं ते परिक्लिष्टसत्कर्मणां कीर्त्यमाने नृभिर्नाम्नि यज्ञेश ते यज्ञविघ्नाः क्षयं यांति तस्मै
नमः ४७ ॥मैत्रेय उवाच॥ इति दक्षः कविर्यज्ञं भद्र रुद्राभिमर्शितं कीर्त्यमाने हृषीकेशे संनिन्ये यज्ञभावने ४८ भ
गवान्स्वेन भागेन सर्वात्मा सर्वभागभुक् दक्षं बभाष आभाष्य प्रीयमाण इवानघ ४९ ॥श्रीभगवानुवाच॥ अहं
ब्रह्मा च सर्वश्च जगतः कारणं परं आत्मेश्वर उपद्रष्टा स्वयंदृगविशेषणः ५० आत्ममायां समाविश्य सोहं गु
णमयीं द्विजः सृजन्रक्षन्हरन्विश्वं दध्रे संज्ञां क्रियोचितां ५१ तस्मिन्ब्रह्मण्यद्वितीये केवले परमात्मनि
ब्रह्मरुद्रौ च भूतानि भेदेनाज्ञोनुपश्यति ५२ यथा पुमान्न स्वांगेषु शिरःपाण्यादिषु क्वचित् पारक्यबुद्धिं
कुरुते एवं भूतेषु मत्परः ५३
च स एव ब्रह्मा च सर्वश्चेत्यन्वयः ५० कुत इत्यत आह अहमेवात्ममायामधिष्ठाय जगत्सृष्ट्यादि कुर्वन् सच
सन् क्रियोचितां संज्ञां धारयामि तस्मिन्काले द्वितीये समानासमानजातीयभेदाभेदरहिते ब्रह्मणि मयि ब्रह्मरु
द्रौ मा प्रेति च भेदेनाज्ञः पश्यतीत्यर्थः ५२ विद्वांस्तु भेदं न पश्यतीति सदृष्टांतमाह यथेति ५३ ॥ ५५ ॥

ग्न:

भा० चं०
२९

सुनीतिः सुरुचिश्च तन्नाम्ये तयोर्मध्ये ८ तयोः प्रियत्वे प्रपंचयन् ध्रुवचरित्रमाह पंचभिरध्यायैः सुरुचेः पुत्रमुत्तमसंज्ञं लालयन् तमप्यंकारोहणं चिकीर्षमाणं ९ गर्वोक्तिमेवाह त्रिभिः नेति नृपतेर्धिष्ण्यमासनं न नृपात्मजोऽपि भवा

जाये उत्तानपादस्य सुनीतिः सुरुचिस्तयोः सुरुचिः प्रेयसी पत्युर्नेतरा यत्सुतो ध्रुवः ८ एकदा सुरुचेः पुत्र
मंकमारोप्य लालयन् उत्तमं नारुरुक्षंतं ध्रुवं राजाभ्यनंदत ९ तथा चिकीर्षमाणं तं सपत्न्यास्त
नयं ध्रुवं सुरुचिः शृण्वतो राज्ञः सेर्ष्यमाहातिगर्विता १० न वत्स नृपतेर्धिष्ण्यं भवानारोढुमर्हति
न गृहीतो मया यत्त्वं कुक्षावपि नृपात्मजः ११ बालोसि बत नात्मानमन्यस्त्रीगर्भसंभृतम् नूनं वेद भ
वान् यस्य दुर्लभेर्थे मनोरथः १२ तपसाराध्य पुरुषं तस्यैवानुग्रहेण मे गर्भे त्वं साधयात्मानं यदीच्छ
सि नृपासनम् १३ मैत्रेय उवाच मातुः सपत्न्याः सुदुरुक्तिविद्धः श्वसन् रुषा दंडहतो यथाहिः हित्वा मि
षंतं पितरं सन्नवाचं जगाम मातुः प्ररुदन् सकाशं १४ तं निःश्वसंतं स्फुरिताधरोष्ठं सुनीतिरुत्संग उदू
ह्य बालं निशम्य तत्पौरमुखान्नितांतं सा विव्यथे यद्गदितं सपत्न्या १५ सोत्सृज्य धैर्यं विललाप शो
कदावाग्निना दावलतेव बाला वाक्यं सपत्न्याः स्मरती सरोजश्रिया दृशा बाष्पकलामुवाह १६

नारोढुमर्हति १० ११ १२ पुरुषमीश्वरं १३ मिषंतं पश्यंतं संनवाचं कुंठितवाचं १४ उदूह्य आरोप्य

तं पुरजनमुखात् श्रुत्वा १५ शोक एव दावाग्नि
स्तेन दावाग्निगतो हस्तं तेनावस्थिता सा वा लापं च
कार १६
२९

दक्षकन्यान्वयेप्राप्ताद्दक्षयज्ञकथोदिता ॥ मनुपुत्रान्वयेप्राप्ताध्रुवचर्य्योच्यपंचभिः १ अष्टमेसुरुच्युक्तिरोषमत्सरतः
पुरान्निर्गतेनध्रुवेणाहृतप्रसादतोषणंहरेः ॥२॥ एवंतावन्मनुकन्यान्वयोक्तेनैव मरीच्यादीनांब्रह्मपुत्राणांवंशावर्णिताः
तत्रावशिष्टंकिंचिदाह सनकाद्याइति ॥ नावसन्नाश्रिताः ऊर्द्ध्वरेतसोनैष्ठिकाः अतस्तेषांवंशोनास्ति १ अधर्मोपिब्रह्म

श्रीमैत्रेयउवाच ॥ सनकाद्यानारदश्चऋभुर्हंसोऽरुणिर्यतिः नैतेगृहान्ब्रह्मसुताह्यावसन्नूर्द्ध्वरेतसः १
मृषाऽधर्म्मस्यभार्य्यासीद्दंभंमायांचशत्रुहन् असूतमिथुनंतत्तुनिर्ऋतिर्जगृहेऽप्रजाः २ तयोःसमभवल्लो
भोनिकृतिश्चमहामते ताभ्यांक्रोधश्चहिंसाचयद्दुरुक्तिःस्वसाकलिः ३ दुरुक्तौकलिराधत्तभयंमृत्युंचसत्त
म तयोश्चमिथुनंजज्ञेयातनानिरयस्तथा ४ संग्रहेणमयाख्यातःप्रतिसर्गस्तवानघ त्रिःश्रुत्वैतत्पुमान्पुण्यं
विधुनोत्यात्मनोमलं ५ अथातःकीर्त्तयेवंशंपुण्यकीर्त्तेःकुरूद्वह स्वायंभुवस्यापिमनोर्हरेरंशांशजन्म
नः ६ प्रियव्रतोत्तानपादौशतरूपापतेःसुतौ वासुदेवस्यकलयारक्षायांजगतःस्थितौ ७

पुत्रस्तस्यवंशमाह मृषेतिचतुर्भिः दंभःपरप्रतारणं मायातुदुश्चिंताचेष्टा तयोःसोदरयोरपिदापत्यमधर्मांशत्वया
एवमुपपद्यतेति अप्रजः अपुत्रः २ निकृतिःशठता यत्ताभ्यांकश्चित्तस्यस्वसादुरुक्तिश्चेत्यर्थः ३ यातनातीव्रवेदना ४
प्रतिसर्गोनुसर्गएव यद्वाप्रतिसर्गःप्रलयः अधर्मस्यभयहेतुत्वात्प्रतिसर्गत्वं एतत् एतंअधर्मवंशंपुण्यमिति वर्जनेनद्वारा
पुण्यहेतुत्वात् ५ मनोपुत्रवंशं हरेरंशोब्रह्मातस्यांशाद्देहाज्जन्मयस्य ६ जगतोरक्षायांस्थितौ ७ ॥ ८८ ॥ ८८

भा० च०
३०

तमेवेत्यनेन सूचितं सर्वोत्तमत्वं प्रपंचयति नान्यमिति हस्तेन गृहीतं दीपवत् पद्मं यया इतरैः ब्रह्मादिभिः २३
संजल्पितं विलापं तत् अर्थस्यागमो यस्मात् तथाभूतं वचः आकर्ण्य २४ विस्मित इत्युक्तं तदेवाह अहो तेजः प्रभावः

नान्यं ततः पद्मपलाशलोचनाद् दुःखच्छिदं ते मृगयामि कंचन यो मृग्यते हस्तगृहीतपद्मया श्रियेतरैरं
गविमृग्यमाणया २३ श्रीमैत्रेय उवाच एवं संजल्पितं मातुराकर्ण्यार्थागमं वचः संनियम्यात्मनात्मा
नं निश्चक्राम पितुः पुरात् २४ नारदस्तदुपाकर्ण्य ज्ञात्वा चास्य चिकीर्षितं स्पृष्ट्वा मूर्द्धन्यघघ्नेन पाणि
ना प्राह विस्मितः २५ अहो तेजः क्षत्रियाणां मानभंगममृष्यतां बालोप्ययं हृदा धत्ते यत्समातुरसद्वचः
२६ श्रीनारद उवाच नाधुनाप्यवमानं ते सन्मानं वापि पुत्रक लक्षयामः कुमारस्य सक्तस्य क्रीडनादिषु २७
विकल्पे विद्यमानेपि न ह्यसंतोषहेतवः पुंसो मोहमृते भिन्ना यल्लोके निजकर्मभिः २८ परितुष्येत्तत
स्तात तावन्मात्रेण पुरुषः दैवोपसादितं यावद्वीक्ष्येश्वरगतिं बुधः २९ अथ मात्रोपदिष्टेन योगेनाव
रुरुत्ससि यत्प्रसादं स वै पुंसां दुराराध्यो मतो मम ३०

२५ विकल्पे मानापमानविवेके सत्यपि भिन्ना न संति किंतु मोहकल्पिता एव तत्र हेतुः यथार्थः कुतः यत्सुखदुःखं वा तन्निज
कर्मभिरेव भवतियतः २६ २७ २८ उपशमोपदेशेन निवर्तयति परितुष्येदिति षड्भिः ईश्वरगतिं वीक्ष्य २९ ईश्वरा
नुकूल्यं विना नो ह्यमाः फलहेतव इति ज्ञात्वा परितुष्येत् संतोषमेव कुर्यात् दुष्करश्चायं तव समुद्यम इत्याह अथेति द्वा

पं० यथापप्रसादमकरोदे प्रादुर्हासि ३४

३०

वृजिनस्यदुःखस्यश्रमंगलमपराधंपरेषुमामंस्थाः यतःपरेभ्योदुःखंददातियःसएतमेवदुःखंभुंक्ते १७ दु
र्भगयामयाउदरेगृहीतः तस्याएवस्तन्येनवृद्धश्च दुर्भगत्वमेवाह यांमामिडस्पतिर्भूपतिर्भार्येतिवोढुं स्वीक
र्तुंविलज्जते वाशब्दाद्दासीत्यपि १८ पितृभार्यात्वेनसमात्रा मातुःसपत्नीतयापियदुक्तंतत्पसाराध्यपुरुषमि

दीर्घस्वसंतीवृजिनस्यपारमपश्यतीवालकमाहबाला मामंगलंतातपरेषुमंस्थाभुंक्तेजनोयत्पर
दुःखदस्तत् १७ सत्यंसुरुच्याभिहितंभवान्मेयदुर्भगायाउदरेगृहीतः स्तन्येनवृद्धश्चविलज्जतेयांभा
र्येतिवावोढुमिडस्पतिर्मां १८ आतिष्ठतत्तातविमत्सरस्त्वमुक्तंसमात्रापियदव्यलीकं आराधयाधोक्षजपा
दपद्मंयदीच्छसेध्यासनमुत्तमोयथा १९ यस्यांघ्रिपद्मंपरिचर्यविश्वविभावनायात्तगुणाभिपत्तेः अ
जोऽध्यतिष्ठत्खलुपारमेष्ठ्यंपदंजितात्मश्वसनाभिवंद्यं २० तथामनुर्वोभगवान्पितामहोयमेकमत्याप
रुदक्षिणैर्मखैः इष्ट्वाभिपेदेदुरवापमन्यतोभौमंसुखंदिव्यमथापवर्ग्यं २१ तमेववत्साश्रयभृत्यवत्सलंमुमु
क्षुभिर्मृग्यपदाब्जपद्धतिं अनन्यभावेनिजधर्मभावनेमनस्यवस्थाप्यभजस्वपूरुषम् २२
व२ त्यादितत् आतिष्ठकुरु अध्यासनंयदीच्छसि १९ परिचर्यनिषेव्य विश्वस्यविभावनायपालनाय आत्ताःस्वीकृतागुणा
भिपत्तिःसत्वगुणाधिष्ठानंयेन तस्यजितआत्मामनःश्वसनप्राणश्चयैस्तैरभिवंद्यं २० एकमत्याससर्वात्मबुध्याभिइष्ट्वा
२१ मृग्यापदाब्जयोःपद्धतिर्मार्गोयस्य तमेवाश्रयशरणंव्रज ततोभजस्व नान्यस्मिन्भावोयस्य तस्मिन्निजधर्मे

४९ कं२

अंबइतिपाठे उत्संगाज्ज्ञातो नारदः सभगवानतत्त्रिवितुदन्वादयन् हितायाश्चइति ३९ निःश्रेयस्य अभिप्रेता
र्थस्य यथाः कोसावित्यत आह भगवान्वासुदेवः अत एवतं भज ४० ४० मधुवनाख्यं तटं गच्छ यत्र मधुव
ने ४२ अध्ययमुनाद्याभापि आत्मनाउचितानियोग्यानि देवतानमस्कारादीनि कृत्वातिथमनियमउक्ताः अ

मैत्रेय उवाच ॥ इत्युदाहृतमाकर्ण्य भगवान्नारदस्तदा प्रीतः प्रत्याहतं बालं सद्वाक्यमनुकंपया ॥ ३९ ॥
नारद उवाच जनन्याभिहितः पंथाः स वै निःश्रेयसस्य ते भगवान्वासुदेवस्तं भज तत्प्रवणात्मना ४०
धर्मार्थकाममोक्षाख्यं य इच्छेच्छ्रेय आत्मनः एकं ह्येव हरेस्तत्र कारणं पादसेवनं ४१ तत्तात गच्छ भद्रं
ते यमुनायास्तटं शुचि पुण्यं मधुवनं यत्र सान्निध्यं नित्यदा हरेः ४२ स्नात्वानुसवनं तस्मिन्कालिंद्याः
सलिले शिवे कृत्वोचितानि निवसन्नात्मनः कल्पितासनः ४३ प्राणायामेन त्रिवृता प्राणेंद्रियमनो
मलं शनैर्व्युदस्याभिध्यायेन्मनसा गुरुणा गुरुं ४४ प्रसादाभिमुखं वीक्ष्य प्रसन्नवदनेक्षणं सुनासं सु
भ्रुवं चारुकपोलं सुरसुंदरं ४५ तरुणं रमणीयांगमरुणोष्ठेक्षणाधरं प्रणताश्रयणं नृम्णं शरण्यं करुणार्णवं ४६

सनकल्पनं चकुशादिभिः स्वस्तिकादिश्च ४३ प्राणेंद्रियमनसां मलं चांचल्यं व्युदस्येति प्राणायामप्रत्याहारेण ४४ ४४ ध
रणमाह अभिध्यायेदिति त्रिभिः गुरुणा धीरेण मनसा श्रीहरिं सुरसुंदरं ४५ रमणीयान्यंगानि यस्य ओष्ठ
श्च ईक्षणं च अरुणे ओष्ठेक्षणे धारयतीति तथा तं अरुणं ओष्ठमीक्षणं वा धारयतीति वा नृम्णं सुखकरं यद्वा नृ

ॐ नमो भगवते वासुदेवाय

निःसंगेनतीव्रयोगयुक्तेनसमाधिनामृगयंतोपियस्यपदवींमार्गंनविदुःसदेवोदुराराध्यः ३१ श्रेयसांकालेदृढ
तेः ३२ सुखदुःखयोर्मध्येसुखेसतिपुण्यंक्षीयतदुःखेसतिपापंइत्यात्मानंतोषयन् तमसःपारंमोक्षंप्राप्नोति
किंचगुणैरधिकात्पुंसइतित्यब्लोपेपंचमी तंदृष्ट्वाप्रीतिंकुर्यात् नत्वसूयामित्यर्थः अनुक्रोशंकृपांकुर्याद्धि

मुनयःपदवींयस्यनिःसंगेनोरुजन्मभिः। नविदुर्मृगयंतोपितीव्रयोगसमाधिना ३१ अतोनिवर्ततामेषनिर्बं
धस्तवनिष्फलः। यतिष्यतिभवान्कालेश्रेयसांसमुपस्थिते ३२ यस्ययद्दैवविहितंसतेनदुःखसुखयोः।
आत्मानंतोषयन्देहीतमसःपारमृच्छति ३३ गुणाधिकान्मुदंलिप्सेदनुक्रोशंगुणाधमात्। मैत्रंसमा
नादन्विच्छेन्नतापैरभिभूयते ३४ ध्रुव उवाच ॥ सोयंसमोभगवतासुखदुःखहतात्मनां दर्शितः
वि१ कृपयापुंसांदुर्दर्शोस्मद्विधैस्तुयः ३५ अथापिमेविनीतस्यक्षात्रंघोरमुपेयुषः सुरुच्यादुर्वचोबा
णैर्नभिन्नेश्रयतेहृदि ३६ पदंत्रिभुवनोत्कृष्टंजिगीषोःसाधुवर्त्ममे ब्रूह्यस्मत्पितृभिर्ब्रह्मन्नन्यै
न१ रप्यनधिष्ठितं ३७ नूनंभवान्भगवतोयोंगजःपरमेष्ठिनः वितुदन्नटतेवीणांहितायार्कइवापरः ३८
पमानतुतिरस्कारं समानान्मैत्रीनतुस्पर्द्धां ३४ क्षात्रंस्वभावंप्राप्तवतोअतएवविनीतस्यदुर्वचोबाणै
र्भिन्नेहृदिनश्रयते नश्रयन्नेनतिष्ठति ३६ अन्यैरधिष्ठितंत्रिभुवनोत्कृष्टंपदंजेतुमिच्छोर्मेसाधुवर्त्ममार्गं

भा० च० ३२ सलिलैरिति। शस्तैर्दूर्वांकुरैः अन्यैरेवांशुकैः भूर्जत्वगादिभिः ५४ अधिष्ठानमाह लब्ध्वेति संपाद्य द्रव्यमयीं शिलादि
भिर्निर्मितां पूजासाङ्गुण्यहेतुमाह आभृतात्मा धृतचित्तः मितं वन्यं भुंक्ते इति तथा यत्करोति यत्करिष्य

सलिलैः शुचिभिर्माल्यैर्वन्यैर्मूलफलादिभिः शस्तांकुरांशुकैश्चार्चेत्तुलस्या प्रियया प्रभुं ५४ लब्ध्वा
द्रव्यमयीमर्चां क्षित्यंब्वादिषु वार्चयेत् आभृतात्मा मुनिः शांतो यतवाक् मितवन्यभुक् ५५ स्वेच्छा
वतारचरितैरचिंत्यनिजमायया करिष्यत्युत्तमश्लोकस्तद्ध्यायेद्धृदयंगमं ५६ परिचर्या भगवतो या नम ४
वत्यः पूर्वसेविताः तां मंत्रहृदयेनैव प्रयुंज्यान्मंत्रमूर्तये ५७ एवं कायेन मनसा वचसा च मनोगतं परिच
र्यमाणो भगवान्भक्तिमत्परिचर्यया ५८ पुंसाममायिनां सम्यग्भजतां भाववर्द्धनः श्रेयो दिशत्य
भिमतं यद्धर्मादिषु देहिनां ५९ विरक्तश्चेंद्रियरतौ भक्तियोगेन भूयसा तं निरंतरभावेन भजेता
द्धा विमुक्तये ६० इत्युक्तस्तं परिक्रम्य प्रणम्य च नृपार्भकः ययौ मधुवनं पुण्यं हरेश्चरणचर्चितं ६१

ति ५६ तदानीमवतारप्राचुर्याभावात् ५७ पूर्वसेविताः सेवनं कारिताः आर्यत्वेन विहितास्तत्यर्थः मंत्रहृदये
न द्वादशाक्षरेण ५८ एवमुक्तरीत्या मनोगतं यथा भवति तथा कायादिभिः भक्तिमत्या परिचर्यमाणः ५९ धर्मा
र्थकामेषु यदभिमतं तेन श्रेयो दिशतीति द्वयोरन्वयः ६० विरक्तो भजेत् किमर्थं विमुक्तये ६१ हरेश्चरणाभ्यां चर्चि ३२

पुरुषं पुरुषलक्षणैर्युक्तं ४७ कौस्तुभाभरणं श्रीवायस्य ४८ कांचीकलापेन पर्य्यस्तं परिवेष्टितं मनोनयनवो
वर्द्धनं हर्षकारं ४९ हृत्पद्मकर्णिकायां धिस्मा मध्यस्थानं तदाक्रम्य सम्भ्रितामात्मनि मनसि स्थितं

वं २ श्रीवत्सांकं घनश्यामं पुरुषं वनमालिनं शंखचक्रगदापद्मैरभिव्यक्तचतुर्भुजं ४७ किरीटिनं कुंडलि
नं केयूरवलयान्वितं कौस्तुभाभरणं ग्रीपीतकौशेयवाससं ४८ कांचिकिकलापपर्य्यस्तलसत्कांचनन्पु
रं दर्शनीयतमंशांतं मनोनयनवर्द्धनं ४९ पद्मानखमणिश्रेण्या चित्तसद्मासमर्द्धितां हृत्पद्मक
र्णिकाधिस्यमाक्रम्यात्मन्यवस्थितं ॥५०॥ स्मयमानमभिध्याये त्सानुरागावलोकनं नियत्तेनैकमृत्तेन
मनसा वरदर्षभं ॥५१॥ एवं भगवतो रूपं सुभद्रं ध्यायतो मनः निर्वृत्या परया तूर्णं संपन्नं न निवर्त्तते
५२ अप्यश्च परमो गुह्यः श्रूयतामेन्नपाहृज्ज यं सप्तरात्रप्रपठन्पुमान्पश्यति खेचरान् ॥५३॥ ॐनमोभ
म १ गवते वासुदेवाय ॥मंत्रः॥ मंत्रेणानेन देवस्य कुर्य्याद्द्रव्यैर्यी बुधः सपर्य्यां विविधैर्द्रव्यैर्देशकालवि
भागवित् ५४
५० ध्यानमाह स्मयमानमिति नियत्तेन प्रागुक्तयाधारणया सुस्थिरे
ण अत एकमृत्तेन एकाग्रेण धारणोक्तानि विशेषणानि ध्यानैः पिद्रष्टव्यानि यद्वा यथोक्तमात्रमेव तदुक्तमे
कादशस्कंधे नान्यानि चिंतयेद्भूयः सुस्मितं भावयेन्मुखमिति ५१ समाधिमाह एवमिति तूर्णं शीघ्रं सपन्नः सन्

क्रमदीपिका। प्र ३ सव्याख्या ३१

मू० अब्भक्ष उत्तमश्लोकमुपाधावत्समाधिना ७४ चतुर्थमपि वै मासं द्वादशे द्वादशेऽहनि २

भा०च० ७३ तृतीयं च आनयन् ईषदिव नयन्नुपाधावदित्यन्वयः ७४ ७५ प्रतिमासमाहारसंकोचस्तथा योऽतिरेकं च कृतवानि ध्रु० ८
३३ त्यर्थः भूतानि शब्दादीनिंद्रियाणि च यस्मिन् तन्मन आकृष्य ब्रह्म ध्यायन् ७७ धारयमाणस्य सतः तस्य तेजः सोढुं अश

द्वितीयं च तथा मासं षष्ठे षष्ठेऽर्भको दिने तृणपर्णादिभिः शीर्णैः कृतान्नोऽभ्यर्चयद्विभुं ७३ तृतीयं चान
यन्मासं नवमे नवमेऽहनि वायुभक्षो जितश्वासो ध्यायन्देवमधारयत् ७५ पंचमे मास्यनुप्राप्ते जित
श्वासो नृपात्मजः ध्यायन् ब्रह्म पदैकेन तस्थौ स्थाणुरिवाचलः ७६ सर्वतो मन आकृष्य हृदि भूतेंद्रिया
शयं ध्यायन्भगवतो रूपं नाद्राक्षीत्किंचनापरं ७७ आधारं महदादीनां प्रधानपुरुषेश्वरं ब्रह्म धारय
स ५ माणस्य त्रयो लोकाश्चकंपिरे ७८ यदैकपादेन स पार्थिवार्भकस्तस्थौ तदंगुष्ठनिपीडिता मही ननाम
तत्रार्द्धमिभेंद्रधिष्ठिता तरीव सव्येतरतः पदे पदे ७९ तस्मिन्नभिध्यायति विश्वमात्मनो द्वारं निरुध्यासु
मनन्यया धिया लोका निरुच्छ्वासनिपीडिता भृशं सलोकपालाः शरणं ययुर्हरिम् ८०

कुर्वंतः कंपिताः ७८ तस्यांगुष्ठेन निपीडिता आक्रांता सती मही तत्र तदा अर्द्धं न मानस भेंशके अर्द्धशब्दस्य नपुं
सकत्वात् अर्द्धशब्दिनोरभेदाच्चैव सामानाधिकरण्यं इभेंद्रेणाधिष्ठिता तरी नौर्यथा पदे पदे सव्येतरदक्षिणतश्च नमेतित
द्वत् ७९ अनादृत्यास्य येमाह तस्मिन् ध्रुवे विश्वं विश्वात्मकं विभुं आत्मनः सकाशात् अनन्यया धिया आत्माभेदद्रष्ट्या अ
भिध्यायति किं कृत्वा असुं प्राणं नवद्वारं च निरुध्य विश्वात्मन्येकीकृत्य स्वप्राणेनि ३३

ती

अर्हितं सत्कृत्य समर्पितं अर्हणं मध्वादि यस्मै ६३ किंचिन्न रिष्यते न नश्यति सवितर्कः प्रश्नः ६४ मात्रा सह निर्वासित इति
तस्यो अपनादृत्वात् ६५ मा स्मादंति किंस्विन्न खादंतीत्यर्थः ६६ ६७ यस्य यशो जगत्प्राटकं व्याप्नोति ॥ ६८ ॥ विपुलयन्

तपोवनं गते तस्मिन् प्रविष्टोऽन्तःपुरं मुनिः । अर्हितार्हणको राज्ञा सुखासीन उवाच ह ॥ ६३ ॥ नारद उवाच ॥ राजन्
न किं ध्यायसि दीर्घेण मुखेन परिशुष्यता । किं वा न रिष्यते कामो धर्मो वार्थेन संयुतः ॥ ६४ ॥ राजोवाच ॥ सुतो मे बा
लको ब्रह्मन् स्त्रैणेनाकरुणात्मना । निर्वासितः पंचवर्षः सह मात्रा महान् कविः ॥ ६५ ॥ अप्यनाथं वने ब्रह्मन् मा
स्मादंत्यर्भकं वृकाः । श्रांतं शयानं क्षुधितं परिम्लानमुखांबुजं ॥ ६६ ॥ अहो मे बत दौरात्म्यं स्त्रीजितस्योपधा
रय । योंऽकं प्रेम्णारुरुक्षंतं नाभ्यनंदमसत्तमः ॥ ६७ ॥ श्रीनारद उवाच ॥ मा मा शुचः स्वतनयं देवगुप्तं विशां
पते । तत्प्रभावमविज्ञाय स्वं कृत्य यद्यशो जगत् ॥ ६८ ॥ सुदुःकरं कर्म कृत्वा लोकपालैरपि प्रभुः । एष्यत्यचि
रतो राजन् यशो विपुलयंस्तव ॥ ६९ ॥ श्रीमैत्रेय उवाच ॥ इति देवर्षिणा प्रोक्तं विश्रुत्य जगतीपतिः
राजलक्ष्मीमनादृत्य पुत्रमेवान्वचिंतयत् ७० तत्राभिषिक्तः प्रयतस्तामुपोष्य विभावरीम् समाहितः
पर्यचरदृष्यादेशेन पूरुषं ७१ त्रिरात्रांते त्रिरात्रांते कपित्थबदराशनः आत्मवृत्त्यनुसारेण मासं निन्ये
र्चयन्हरिम् ७२

विस्मारयन् ६९ ध्रुवो मधुवने किमकरोदित्यपेक्षायामाह तत्रेत्यादिना ७ अभिषिक्तः स्नातः यस्यां प्राप्तेस्तां ७१

कपित्थानि बदराणि च अशनं यस्य आत्मवृत्तिः देह
स्थितिः तदनुसारेण ७२

विवक्षंतं तद्गुणान्वक्तुमिच्छंतं अतद्विदं स्तुत्यादिकर्तुमजानंतं अस्य ध्रुवस्य च हृद्यवस्थितत्वात्तज्ज्ञात्वा ब्रह्ममयेन
वेदात्मकेन शंखेन ४ भगवता प्रतिपादितां गिरं प्रतिपद्येति शेषः प्रतिपद्यतामिति पाठे तां य आत्मको परिज्ञातः प
रात्मनोरीश्वरजीवयोः निर्णयः येन सः अत एव भक्त्या भावः प्रेमा यस्य असत्वरं स्थैर्येण परिश्रुतं वा ख्यातं
उरुश्रवः कीर्तिर्यस्य तं ध्रुवक्षितिर्ध्रुवा क्षितिः स्थानं यस्येति भाविनिर्देशः ५ ईश्वरानुग्रहसंप्राप्तवागाद्यद्भुतं हृति

स तं विवक्षंतमतद्विदं हरिर्ज्ञात्वास्य सर्वस्य च हृद्यवस्थितः ॥ कृतांजलिं ब्रह्ममयेन कंबुना पस्पर्श बाले
कृपया कपोले ४ स वै तदैव प्रतिपादितां गिरं दैवीं परिज्ञातपरात्मनिर्णयः तं भक्तिभावोभ्यगृणादसत्व
रं परिश्रुतोरुश्रवसं ध्रुवक्षितिः ॥ ५ ॥ ध्रुव उवाच ॥ योंतःप्रविश्य मम वाचमिमां प्रसुप्तां संजीवयत्यखिल
शक्तिधरः स्वधाम्ना अन्यांश्च हस्तचरणश्रवणत्वगादीन् प्राणान्नमो भगवते पुरुषाय तुभ्यं ६ एक
स्त्वमेव भगवन्निदमात्मशक्त्या मायाख्ययोरुगुणया महदाद्यशेषं सृष्ट्वानुविश्य पुरुषस्तदसद्गुणे
षु नानेव दारुषु विभावसुवद्विभासि ७

भिः हार्दज्ञादित्यसंकाशैः श्लोकैरस्तौद्धरिं ध्रुवः यो मम प्रसुप्तां लीनां वाचं अन्यांश्च प्राणानिंद्रियाणि स्वधाम्ना चिच्छ
क्त्या संजीवयति यतः अखिलाश्च ज्ञानादि ज्ञानक्रियाशक्तीर्धारयतीति तस्मै पुरुषाय अंतर्यामिणे ६ ननु वागा
दींद्रियशक्तिधरा वह्न्याद्यः प्रसिद्धा नाहमित्यत आह एक इति अनुविश्य पुरुषोंतर्यामी त्वमेकं एव तत्स्य मा

१ [illegible]

एवं प्राणनिरोधं कदाचिदपि न विद्मः । अखिलसत्त्वधाम्नः सर्वप्राणिशरीरस्य तन्नस्माद् वृजिनात् क्लेशात् ॥ ८१ ॥ कोसौ बालः कथं
च तस्मात् प्राणनिरोध इत्यत आह । उत्तानपादस्य पुत्रो मयि धिया विश्वरूपे संगतात्मा ऐक्यं प्राप्तो वर्त्तत इति ॥ ८२ ॥ इति चतुर्थे ऽष्टमः ॥ ८ ॥
न वमे तु हरिं स्तुत्वा लब्ध्वा तस्माद् वरान् ध्रुवः प्रत्यागत्याकरोद्राज्यं पितृदत्तमितीर्यते एवं भगवद्वाक्येन गतभया ॥ १ ॥ स वै ध्रुवः यो
गविपाके न दीर्घेन निश्चलया वा रूढाधिरूढं पुरतः स्थितमपि यदंतर्हितत्वाद् सो नापश्यत् तदा भगवतैवांतः स्वरूपमाकृष्ट

देवा ऊचुः ॥ नैवं विदामो भगवन् प्राणरोधं चराचरस्याखिलसत्त्वधाम्नः ॥ विधेहि तन्नो वृजिनाद्विमोक्षं प्राप्ता वयं
त्वां शरणं शरण्यं ॥ ८२ ॥ श्रीभगवानुवाच ॥ मा भैष्ट बालं तपसो दुरत्ययान्निवर्त्तयिष्ये प्रतियात स्वधाम ॥ यतो हि वः
प्राणनिरोध आसीदौत्तानपादिर्मयि संगतात्मा ॥ ८३ ॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे ध्रुवचरि
मु त्रेऽष्टमोध्यायः ॥ ८ ॥ श्रीमैत्रेय उवाच ॥ त एवमुत्सन्नभया उरुक्रमे कृतावनामाः प्रययुस्त्रिविष्टपं सहस्रशी
र्षापि ततो गरुत्मता मधोर्वनं भृत्यदिदृक्षया गतः १ स वै धिया योगविपाकतीव्रया हृत्पद्मकोशे स्फुरितं तत्
डित्प्रभं तिरोहितं सहसैवोपलक्ष्य बहिः स्थितं तदवस्थं ददर्श २ तद्दर्शनेनागतसाध्वसः क्षिताववंदता
गं विनमय्य दंडवत् दृग्भ्यां प्रपश्यन् प्रपिबन्निवार्भकं चुंबन्निवास्येन भुजैरिवाश्लिषन् ३

अंतस्तिरोहितं तु पत्नद्य व्युत्थितः सन् तदवस्थं यादृगंतः स्फुरितं तादृशम् २ आगतसाध्वसः जातसंभ्रमः
विनमय्य आनतं कृत्वा संभ्रम एवाह दृग्भ्यां प्रपिबन्निव पश्यन् नवंदत आस्येन चुंबन्निवावदंत भुजाभ्यां
ऽऽ ॥ ऽऽ आश्लिषन्निवावदंतेत्यर्थः ३ ॥ ऽऽ ॥ ऽऽ

सं
अतःकथाश्रवणप्रसक्तसंगतिंदेहीत्याह भक्तिंत्वयिप्रवहतांसातत्येनकुर्वतांनतुमोक्षंकिंयाचसेन महत्संगेनअंज
साअयत्नतएव उरूणिव्यसनानियस्मिन् तंनेष्येपारंगमिष्यामि भगवद्गुणकथैवामृतंतस्यपानेनमत्तःसन् ११
कथामृतपानस्यमाह तेअतितरांप्रियमपिमर्त्यदेहंनस्मरंति नानुसंदधते येचसुतादयः अदःम
र्त्यमनुसंबद्धाः तानपिकेनस्मरंति येकृतप्रसंगाः केषुभवदीयपदारविंदसौगंध्येलुब्धंहृदयंयेषांते

भक्तिंमुहुःप्रवहतांत्वयिमेप्रसंगोभूयादनंतमहताममलाशयानां येनांजसोल्बणमुरुव्यस
नंभवाब्धिंनेष्येभवद्गुणकथामृतपानमत्तः ११ तेनस्मरंत्यतितरांप्रियमीशमर्त्यं येचान्व
दःसुतसुहृद्गृहवित्तदाराः येत्वब्जनाभभवदीयपदारविंदसौगंधलुब्धहृदयेषुकृतप्रसंगाः
१२ तिर्यङ्नगद्विजसरीसृपदेवदैत्यमर्त्यादिभिःपरिचितंसदसद्विशेषं रूपंस्थविष्ठमजते
महदाद्यनेकंनातःपरंपरमवेद्मिनयत्रवादः १३ तुशब्देनान्येषांकेवलयोगादिनिष्ठानां

देहाभिमानानिवृत्तिंदर्शयति १२ एवंनियस्यहेपरमअजतेइदंस्थविष्ठंविराड्रूपंकेवलंवेद्मि अ
तःपरमीश्वरंनवेद्मि यत्रवादःशब्दव्यापारोनास्तितद्ब्रह्मस्वरूपंचनवेद्मि अतोऽभिमानोननिवर्ततइतिभा
वः १३

अपिच किंवक्तव्यं ब्रह्मादयो ज्ञानादिशक्तिधरा न भवंतीति यस्मात् ब्रह्मणोपि ज्ञानं त्वदधीनमेवेत्याह त्वद्दत्तया
वयुनज्ञानेन भवंतं शरणं प्रपन्नो ब्रह्मा इदं विश्वं अचष्ट अपश्यत् कथं सुप्तः पुरुषः प्रबुद्धः सन् यथा पश्यति तद्व
त् अतः आपवर्ग्या मुक्तास्तेषामपि शरण्यं कृतविदा सर्वेंद्रियजीवनेन त्वत्कृतमुपकारं जानता कथं विस्मर्यते
एवंभूते त्वामभजंतः कृतघ्ना इत्यर्थः ८ येच माहशाः कामाद्यर्थं भजंति तेपि मूढा इत्याह नूनमिति भवा

प्र १ त्वद्दत्तयावयुनयेदमचष्ट विश्वं सुप्तप्रबुद्ध इव नाथ भवत्प्रपन्नः तस्यापवर्ग्यशरणं तव पादमूलं वि
स्मर्यते कृतविदा कथमार्तबंधो ८ नूनं विमुष्टमतयस्तव मायया ते ये त्वां भवाप्ययविमोक्षणमन्य.
ति ३ हेतोः अर्चंति कल्पकतरुं कुणपोपभोग्यमिच्छंति यत्स्पर्शजं नरकेपि नृणां ९ यानिर्वृतिस्तनुभृतां
तव पादपद्मध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् सा ब्रह्मणि स्वमहिमन्यपि नाथ मा भूत् किंत्वं
तकासिलुलितात्पततां विमानात् १०

प्ययो जन्ममरणे तद्विमोक्षहेतुं त्वामन्यहेतोः कामाद्यर्थं भजंति
ते नूनं विमुष्टमतयः वंचितचित्ताः यतस्ते कल्पतरुं त्वामर्च्येति ततः कुणपतुल्येन देहेनोपभोग्यं सुखमिच्छंति न
चेच्छायोग्यं तदित्याह यत्स्पर्शजं विषयसंबंधजन्यं सुखं तन्नरकेपि भवति ९ ननु स्वर्गादिकं सुखं सकामैः प्राप्यते
निष्कामभजने तन्न स्यादित्यत आह येति स्वमहिमनि निजानंदरूपेपि मा भूत् न भवतीत्यर्थः अंतकस्यासिना

कालेन लुलिता खंडिता द्विमानात् पततां सा नास्ती
ति किमु वक्तव्यम् १०

भा० च०
३६

सकामभजनादपिमोक्षमाप्तवान् आह हेभगवन् पुरुषार्थःपरमानंदः सएवमूर्त्तिर्यस्यतद्रूपं आशिषोराज्या
देःसकाशात् याशीःपरमाफलंनिश्चितकस्य तथातेनप्रकारेण त्वमेवपुरुषार्थः इत्येवंनिष्कामतयात्वंच
नुभजतः यद्यप्येवंतथापिहेआर्य्यस्वामिन् दीनान्सकामानस्मान्भगवान्भवान्परिपातिसंसारभया

सत्याशिषोहिभगवंस्तवपादपद्ममाशीस्तथानुभजतःपुषार्थमूर्त्तेः॥अप्येवमार्य्यभगवान्परिपा
तिदीनान्वाश्रेववत्सकमनुग्रहकातरोऽस्मान्॥१७॥श्रीमैत्रेयउवाच॥अथाभिष्टुतएवंवैसत्संक
ल्पेनधीमता भृत्यानुरक्तोभगवान्प्रतिनंद्येदमब्रवीत्॥१८॥श्रीभगवानुवाच॥वेदाहंतेव्यवसि
तंहृदिराजन्यबालक तत्प्रयच्छामिभद्रंतेदुरापमपिसुव्रत १९ नान्यैरधिष्ठितंभद्रयद्भ्राजि
ष्णुध्रुवक्षिति यत्रग्रहर्क्षताराणांज्योतिषांचक्रमाहितं मेढ्यांगोचक्रवत्स्थास्नुपरस्तात्कल्पवासि
नाम् २०

इत्येव यतःअनुग्रहेहिताचरएकांतरःपरवशः यथानवप्रसूतावाश्राधेनुर्वत्संक्षी
रंपाययति वृकादिभ्योरक्षतिचतद्वत् १७ १८ व्यवसितंसंकल्पितं १९ तत्प्रयच्छामीत्युक्तं किंतदित्यपेक्षा
यामाह नान्यैरितिसार्द्धाभ्यां हेभद्र ध्रुवक्षितिर्निवासोयस्मिन् आहितमर्पितं धान्याक्रमणवद्भ्राम्य
माणानांपश्वनांबंधनस्तंभोमेढीतस्यांबलीवर्दसमूहवत् अवांतरकल्पवासिनांपरस्तादपिस्थास्नुले

३६

तदेव भगवदनुकंपयात्तद्रूपं हृद्यंत्वात्वेश्वररूपमनुवर्ण्यन्नमस्करोति कल्पांत इति एनत्त्रैलोक्यं यः पुमान् शेते स्वस्मिन्नेव दृक् न बहिर्यस्य योगनिद्रारूढत्वात् अनंतसखः शेषसहायः नद्दं के शेषोत्संगे यस्य नाभिरेव सिंधुः समुद्रः तस्मिन्रोहतीति तिनथा तस्मिन् कांचनलोकपद्मस्य गर्भे कर्णिकायां द्युमान् तेजस्वी ब्रह्मा भवतितं प्रणतोऽस्मि इत्यर्थः १७ ननु ममापि स्वापाद्यवस्थात्वे कोऽजीवाद्विशेष इत्यत आह त्वंतु व्यतिरिक्तः जीव विलक्ष

कल्पांत एतदखिलं जठरेण गृह्णन् शेते पुमान् स्वदृगनंतसखस्तदंके यन्नाभि [सिंधु]रुहकांचनलोकपद्मगर्भे द्युमान् भगवते प्रणतोऽस्मि तस्मै १८ त्वं नित्यमुक्तपरिशुद्धविबुद्ध आत्मा कूटस्थ आदिपुरुषो भगवांस्त्र्यधीशः यद्बुद्ध्यवस्थितिमखंडितया स्वदृष्ट्या द्रष्टास्थितावधिमखो व्यतिरिक्त आससे १९ तस्मिन्विरुद्धगतयो ह्यनिशं पतंति विद्यादयो विविधशक्तय आनुपूर्व्यात् तद्ब्रह्मविश्वभवमेकमनंतमाद्यमानंदमात्रमविकारमहं प्रपद्ये २०

ताः आससे तिष्ठसि वैलक्षण्यमेवाह त्वं नित्यमुक्तः जीवस्तु त्वाभासो न मुच्यते त्वं परिशुद्धः स तु मलिनः त्वं विशुद्धः सर्वज्ञः त्वमात्मा स तु जडः त्वं कूटस्थः स तु विकारी त्वमादिपुरुषः स त्वादिमान् त्वं भगवान् भगहीनस्त्वं त्रयाणां गुणानामधीशः स तु परतंत्रः कुत एतद्वैलक्षण्यं यद्यतो बुद्ध्यवस्थितिं बुद्धेस्तिस्रोऽवस्था अखंडितया स्वदृष्ट्या चिच्छक्त्या द्रष्टा पश्यसि दृष्टेतितत्प्रत्ययोऽतः अतो बुद्ध्यवस्थितिमित्यत्र षष्ठ्यभावः तथाभूत एव त्वं स्थितौ पालने अधिमखः यज्ञाधिष्ठाता

श्रीविष्णुः १९ तव ब्रह्मरूपेण ज्ञानं नमस्करोति यस्मिन्नि
तिपतति अकस्मादुद्भवंति विश्वस्य भवो यस्मात् एक
मखंडं आद्यं अनादि १६

मायाविनः सकामस्य यत्सुदुर्लभं हरेः पदं तदेकेनैव जन्मना लब्ध्वापि स्वमात्मानं मनः असिद्धार्थमप्राप्तमनोरथमि
व कथममन्यत पुरुषार्थविदपि २८ २९ तापमेवाह समाधिनेति सार्द्धैः षड्भिः नैके अनेके भवा यस्मिन् बहुजन्मभ्य
स्तेनेत्यर्थः प्रणामस्तुत्यादिसमये गरुडाधिरूढस्य हरेः पादछाया यो स्थितं मात्मानं स्मरन्नाह छायायामुपेत्येति पृथ

विदुर उवाच ॥ सुदुर्लभं यत्परमं पदं हरेर्मायाविनस्तच्चरणार्चनार्जितं ॥ लब्ध्वाप्यसिद्धार्थमिवैकज
जन्मना कथं स्वमात्मानममन्यतार्थवित् ॥ २८ ॥ श्रीमैत्रेय उवाच ॥ मातुः सपत्न्या वाग्बाणैर्हृदि विद्धस्तु ता
न्स्मरन् नैछन्मुक्तिपतेर्मुक्तिं तस्मात्तापमुपेयिवान् २९ ॥ ध्रुव उवाच ॥ समाधिना नैकभवेन यत्प
दं विदुः सनंदादय ऊर्ध्वरेतसः मासैरहं षड्भिरमुष्य पादयोश्छायामुपेत्यापगतः पृथङ्मतिः
३० अहो वत ममानात्म्यं मंदभाग्यस्य पश्यत भवछिदः पादमूलं गत्वा याचे यदंतवत् ३१ म
तिर्विदूषिता देवैः पतद्भिरसहिष्णुभिः यो नारदवचस्तथ्यं नाग्रहीषमसत्तमः ३२

मतिः भेददृष्टिः सन् हा कष्टमिति भावः ३० अनात्म्यं आचारशून्यत्वं अज्ञत्वं भवछेत्तुः परं गत्वा यदंतवत् तदे
व याचे याचितवानस्मि ३१ अयस्तत्वेकारणं संभावयाति इति पतद्भिः मदपेक्षया अधः प्राप्नुवद्भिः अत एवास
हनशीलैः नाधुनाप्यवमानं ते इत्यादि सत्यमपि नारदस्य वचो यो नग्रहीतवानस्मि तस्य मे मतिर्विदूषिता ३२

धर्म्योग्न्यादयोन्ये त्वद्रूपः वनौकसः सप्तऋषयः यत्र दक्षिणीकृत्य भ्रमंतश्चरंति २१ एतत्त्वत्स्थानं तत्र त्वं भवि
ष्यतीत्याह प्रस्थित इति तुभ्यं पृथ्वीं दत्वा वनं प्रस्थिते मत्तः वनं प्रति दीर्घगमने कृते स रक्षिता रक्षिष्यसि २२ त्वया
श्रसंकल्पितमपि मङ्क्ष्यत त्वद्रोहाद्देवं भविष्यतीत्याह त्वद्भ्रातरीति सा सुरुचिः प्रवेक्ष्यति २३ किंच दृष्ट्वा मां यज्ञे हृद
धर्मोग्निः कश्यपः शक्रो मुनयो ये वनौकसः चरंति दक्षिणीकृत्य भ्रमंतो यस्तारकाः २१ प्रस्थिते
तु वनं पित्रा दत्वा गां धर्मसंश्रयः षट्त्रिंशद्वर्षसाहस्रं रक्षिता व्याहतेंद्रियः २२ त्वद्भ्रातर्युत्तमे नष्टे
मृगयायां तु तन्मनाः अन्वेषंती वनं माता तत्र दावाग्निं सा प्रवेक्ष्यति॥२३ इष्ट्वा मां यज्ञहृदयं यज्ञैः पुष्कर
दक्षिणैः भुक्त्वा चेहाशिषः सत्या अंते मां संस्मरिष्यसि॥२४॥ ततो गंतासि मत्स्थानं सर्वलोकनमस्कृ
तं उपरिष्टाद् ऋषिभ्यस्त्वं यतो नावर्तते यतिः॥२५॥मैत्रेय उवाच॥ इत्यर्चितः स भगवान् अतिदिश्यात्मनः श्र
पदं बालस्य पश्यतो धाम स्वमयाद् गरुडध्वजः २६ सोपि संकल्पजं विष्णोः पादसेवोपपादितं प्राप्य सं
कल्पनिर्वाणं नातिप्रीतोभ्यगात्पुरम् २७ यं प्रियामर्त्तियस्पतं २८ यतः स्थानात् अतिदिश्य दत्वा २९ संक
ल्पजं मनोरथं पादसेवया प्रापितं संकल्पस्य निर्वाणं संकल्पजं मनोरथं पादसेवया प्रापितम् संकल्पस्य
निर्वाणम् समाप्तिर्यस्मात् २७ रामरामरामरामरामरामरामरामरामरामरामरामराम ॥

संस्पर्शेन २

भा०च० ब्राह्मणादिभिः पर्यस्तः परिवृतः ३९ अस्य राज्ञो महिष्यो मध्ये तत्रमं निधायेकां शिविकां नरविमानमारुह्य ४० उपव
३८ नस्याभ्यासे समीपे विष्वक्सेनांघ्रि संस्पर्शेन हतमशेषमघबंधनं यस्य ४१ जातः उद्दामो महान्मनोरथो यस्य

स तस्मै रथमारुह्य कार्तस्वरपरिष्कृतं ब्राह्मणैः कुलवृद्धैश्च पर्यस्तो मात्यबंधुभिः ३९ शंखदुंदु
नादेनब्र भिनादेन ब्रह्मघोषेण वेणुभिः निश्चक्राम पुरात्तूर्णमात्मजाभीक्षणोत्सुकः ३९ सुनीतिः सुरुचिश्चास्य महिष्यौ
ह्मे २ रुक्मभूषिते आरुह्य शिबिकां सार्धमुत्तमेनाभिजग्मतुः ४० तं दृष्ट्वोपवनाभ्यास आयांतं तरसा रथात्
अवरुह्य नृपस्तूर्णमासाद्य प्रेमविह्वलः परिरेभेंगजं दोर्भ्यां दीर्घोत्कंठमनाः श्वसन् विष्वक्सेनांघ्रिसं
स्पर्शहताशेषाघबंधनं ४१ अथाजिघ्रन्मुहुर्मूर्ध्नि शीतैर्नयनवारिभिः स्नापयामास तनयं जातोद्दा
ममनोरथः ४२ अभिवाद्य पितुः पादावाशीर्भिश्चाभिमंत्रितः ननाम मातरौ शीर्ष्णा सत्कृतः सज्जनाग्र
णी ४३ सुरुचिस्तं समुत्थाप्य पादावनतमर्भकं परिष्वज्याह जीवेति बाष्पगद्गदया गिरा ४४ यस्य प्र
सन्नो भगवान्गुणैर्मैत्र्यादिभिर्हरिः तस्मै नमंति भूतानि निम्नमाप इव स्वयम् ४५

४२ अभिमंत्रितः पितुराशीर्भिस्सह तेन कृतसंभाषणः ४३ ४४ सुरुच्याः प्रीतिर्न संभाविते त्याह यस्येति
नमंति अनुसरंति आपो यथा स्वयमेव निम्नं देशमवतरंति ४५ ॥ ॥

३८

किंच दैवीमिति प्रसुप्तः स्वप्नानिव पश्यत् द्वितीये असत्यपि भ्रात्रेव भ्रातृव्यः शत्रुरिति दृष्ट्या हृद्रुजा हृदयशोकेन तप्येता
यमनुभवामि ३३ किंच मयिप्रसाद्य यत् प्रार्थितं तदप्यर्थं प्रार्थितमाह भवच्छिदमिति ३४ एतदेव सदृष्टांतमाह स्वाराज्यं
तिज्ञानंदं प्रयच्छतः सकाशात् अभिमानः क्षीणपुण्येन मयाभिक्षितः याचितः क्षीणेनेतिवा दृष्टांत एवसंबंधः यथा अध

दैवीं मायामुपाश्रित्य प्रसुप्त इव भिन्नदृक् तप्ये द्वितीयेप्यसति भ्रातृभ्रातृव्यहृद्रुजा ३३ मयैतत्प्रार्थि
तं व्यर्थं चिकित्सेव गतायुषि प्रसाद्य जगदात्मानं तपसा दुःप्रसादनं भवच्छिदमयाचेहं भवं भाग्यवि
वर्जितः ३४ स्वराज्यं यच्छतो मौढ्यान्मानो मे भिक्षितो बत ईश्वरात्क्षीणपुण्येन फलीकारानिवाधनः
३५ ॥ मैत्रेय उवाच ॥ नवै मुकुंदस्य पदारविंदयो रजोजुषस्तात भवादृशा जनाः वांछंति तद्दास्यमृते र्थ
मात्मनो यदृच्छया लब्धमनःसमृद्धयः ३६ आकर्ण्यात्मजमायांतं संपरेत्य यथागतं राजा न श्रद्दधे भ
द्रमभद्रस्य कुतो मम ३७ श्रद्धाय वाक्यं देवर्षेर्हर्षवेगेन धर्षितः वार्ताहर्तुरिति प्रीतो हारं प्रादान्महाध
नम् ३८

नः ईश्वरात् चक्रवर्तिनः फलीकारान् तंदुलकणान् याचेत तद्वत् ३५ एवंनिस्पृहत्वं तस्ययुक्तमि
त्याह तस्यदास्यं विना अन्यमात्मनो न वांछंति यदृच्छयैव लब्धेन मनसः समृद्धिर्येषांते ३६ प्रस्तुतमाह आ
कर्ण्येति संपरेत्य मृत्वा आगतमाकर्ण्य यथा न श्रद्दधे विश्वासं न चकार अभद्रस्य मम भद्रं कुत इति मत्वा ३७ एष्यत्

भा० च०
३९

चत्वरमंगणं रथ्याम हामार्गाः ४० अस्योपरिनिर्मिताभूमिका मार्गोऽवोम रः मृष्टाः संमार्जिताश्चत्वरादयो यस्मिन्
५१ सिद्धार्थः स्वेधनशर्षपः अक्षताश्च वाः ५२ उपजह्रे व्यकिरन् सतीः सत्यः ५३ ५४ यत्र भवनोत्तमे ५५ कु
मृष्टचत्वररथ्याट्टमार्गं चंदनचर्चितं लाजाक्षतैः पुष्पफलैस्तंडुलैर्बलिभिर्युतं ५१ ध्वजायपथिदृष्टायतत्र
तत्र पुरस्त्रियः सिद्धार्थाक्षतदध्यंबुदूर्वापुष्पफलानि च ५२ उपजह्रुः प्रयुंजाना वात्सल्यादाशिषः सतीः
शृएवंस्तद्वल्गुगीतानि प्राविशद्भवनं पितुः ५३ महामणिव्रातमये स तस्मिन्भवनोत्तमे लालितोनि
तरां पित्रान्यवसद्दिवि देववत् पयः फेननिभाः शय्या दांता रुक्मपरिच्छदाः आसनानि महार्हाणि
यत्र रौक्मा उपस्कराः ५५ यत्र स्फटिककुड्येषु महामारकतेषु च मणिप्रदीपा आभांति ललनारत्नसंयुताः उ
द्यानानि च रम्याणि विचित्रैरमरद्रुमैः कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रतैः वाप्यो वैदूर्यसोपानाः प
द्मोत्पलकुमुद्वतीः हंसकारंडवकुलैर्जुष्टाश्चक्राह्वसारसैः ५६ उत्तानपादो राजर्षिः प्रभावं तनयस्य जे ४
तं श्रुत्वा दृष्ट्वाद्भुततमं प्रपेदे विस्मयं परं ५७ वीक्ष्योढवयसं तं च प्रकृतीनां च संमतं अनुरक्तप्र
जं राजा ध्रुवं चक्रे भुवःपतिं ५८ आत्मानं च प्रवयसमाकलय्य विशांपतिः वनं विरक्तः प्रातिष्ठद्विमृशन्नात्म
नो गतिम् ५९
कुमुत् कुमुदं पद्मादिमत्यो वाप्यः ५६ ५७ ऊढवयसं प्राप्तयौवनं अनुरक्ताः प्रजा यस्मिन् ५८ प्रवसंवदं ३९

जहतुः दधतुः ४६ ४७ हे वीरसुवो ध्रुवमातः अभिषिच्यमानाभ्यां स्तनाभ्यां पयस्तदा सुस्राव ४८ चिरं नष्टः दर्शनम
प्राप्तः रक्षिता रक्षिष्यति ४९ ५० एवमिति व्यवहितं पित्राद्युपलालनं परामृश्यते १ पुरं वर्णयति तत्रेति चतुर्भिः स

उत्तमश्च ध्रुवश्चोभावन्योन्यप्रेमविह्वलौ अंगसंगादुत्पुलकावस्रौघं मुहुरूहतुः ४६ सुनीतिरस्य जन
नी प्राणेभ्योपि प्रियं सुतं उपगुह्य जहावाधिं तदंगस्पर्शनिर्वृता ४७ पयः स्तनाभ्यां सुस्राव नेत्रजैः सलि
लैः शिवैः तदाभिषिच्यमानाभ्यां वीर वीरसुवो मुहुः ४८ तां शशंसुर्जना राज्ञीं दिष्ट्या ते पुत्र आर्तिहा
प्रतिलब्धश्चिरं नष्टो रक्षिता मंडलं भुवः ४९ अभ्यर्चितस्त्वया नूनं भगवान्प्रणतार्तिहा यदनुध्यायि
नो वीरा मृत्युं जिग्युः सुदुर्जयं ५० लाल्यमानं जनैरेवं ध्रुवं सभ्रातरं नृपः आरोप्य करिणीं हृष्टः स्तूयमानो
विशत्पुरं १ तत्र तत्रोपसंक्लृप्तैर्लसन्मकरतोरणैः सवृंदैः कदलीस्तंभैः पूगपोतैश्च तद्विधैः २ चूतप
ल्लववासःस्रक्मुक्तादामविलंबिभिः उपस्कृतं प्रतिद्वारमपां कुंभैः सदीपकैः ३ प्राकारैर्गोपुरागारैः
शातकुंभपरिच्छदैः सर्वतोऽलंकृतं श्रीमद्विमानशिखरद्युभिः ४

वृंदैः फलमंजरीयुक्तैः पूगानां पोतैर्बालवृक्षैः तद्विधैः सवृंदैरुपस्कृतं प्रतिद्वारमित्युत्तरेणान्वयः २ चूतपल्लवा वासां
सि च स्रजश्च मुक्तादामानि च तेषां विशिष्टं लंबनमस्ति येषु कुंभेषु ३ गोपुरैरगारैश्च शातकुंभाः परिच्छदाः परि

ते पितत्कर्मासहमाना अमुमविध्यन् द्विगुणं यथा भवति षड्भिः प्रतिकर्तुमिच्छवः १० चित्रवाजैः विचित्रपक्षैः ११
धारासंपातेन छन्नो गिरिरिव नैवादृश्यत १२ सूर्यतुल्यः १३ यातुधानेषु राक्षसेषु जयकाशिषु जितंजितमिति

ते पि चामुष्यमृष्यंतः पादस्पर्शमिवोरगाः शरैरविध्यन्युगपद्द्विगुणं प्रचिकीर्षवः १० ततः परिघनिस्त्रिं
शैः प्राशशूलपरश्वधैः शक्त्यृष्टिभिर्भुशुंडीभिश्चित्रवाजैः शरैरपि अभ्यवर्षन्प्रकुपिताः सरथं सह
सारथिम् इछंतस्तत्प्रतिकर्तुमयुतानि त्रयोदश ११ औत्तानपादिः स तदा शस्त्रवर्षेण भूरिणा नै
वादृश्यत छन्न आसारेण यथा गिरिः १२ हाहाकारस्तदैवासीत्सिद्धानां दिवि पश्यतां हतोयं मानवः
सूर्यो मग्नः पुण्यजनार्णवे १३ नदत्सु यातुधानेषु जयकाशिष्वथो मृधे उदतिष्ठद्रथस्तस्य नीहारा
दिव भास्करः १४ धनुर्विस्फूर्जयन्दिव्यं द्विषतां खेदमुद्वहन् अस्त्रौघं व्यधमद्बाणैर्घनानीकमिवानि
लः १५ तस्य ते चापनिर्मुक्ता भित्वा वर्माणि रक्षसां कायानाविविशुस्तिग्मा गिरिमशनयो यथा १६
भल्लैः संछिद्यमानानां शिरोभिश्चारुकुंडलैः ऊरुभिर्हेमतालाभैर्दोर्भिर्वलयवल्गुभिः हारकेयूरमुकु
टैरुष्णीषैश्च महाधनैः आस्तृतास्ता रणभुवो रेजुर्वीरमनोहराः १७

जयप्रकाशकेषु सत्सु १४ व्यधमत् संचूर्णयामास १५ वर्माणि कवचादि १६ शिरःप्रमुखैरास्तृताः प्रकीर्णा
विरेजुरिति द्वयोरन्वयः १७

इति चतुर्थे नवमः ॥ ९ ॥ दशमे भ्रातृहंतृणां यक्षाणामकरोद्वधं एक एव बालकं गत्वा तस्य विक्रम उच्यते १ यो वि
तोरत्नमिवातिमनोहरं १ कन्यारत्नं चेति वा २ यक्षेणाद्रौ हिमवति हतः अजावितपाठे युद्धे अस्य गतिं गता मृते

इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे नवमोध्यायः ॥ ९ ॥ मैत्रेय उवाच ॥ प्रजापतेर्दुहितरं शिशुमार
स्य वै ध्रुवः उपयेमे भ्रमिं नाम तत्सुतौ कल्पवत्सरौ १ इलायामपि भार्यायां वायोः पुत्र्यां महाबलः पुत्रमुत्कल
नामानं योषिद्रत्नमजीजनत् २ उत्तमस्त्वकृतोद्वाहो मृगयायां बलीयसः हतः पुण्यजनेनाद्रौ तन्मातास्य ग
तिं गता ३ ध्रुवो भ्रातृवधं श्रुत्वा कोपामर्षशुचार्पितः जैत्रं स्यंदनमास्थाय गतः पुण्यजनालयं ४ गत्वोदीचीं
दिशं राजा रुद्रानुचरसेवितां ददर्श हिमवद्द्रोण्यां पुरीं गुह्यकसंकुलां ५ दध्मौ शंखं बृहद्बाहुः खं दिशश्चा
नुनादयन् येनोद्विग्नदृशः क्षत्तरुपदेव्योत्रसन्भृशं ६ ततो निष्क्रम्य बलिन उपदेवमहाभटाः अस
हंतस्तन्निनादमभिपेतुरुदायुधाः ७ स तानापततो वीर उग्रधन्वा महारथः एकैकं युगपत्सर्वानह
न्बाणैस्त्रिभिस्त्रिभिः ८ ते वै ललाटलग्नैस्तैरिषुभिः सर्व एव च मत्वा निरस्तमात्मानमाशंसन्कर्म तस्य तत् ९

त्यर्थः ३ कोपामर्षस्य चाहं है कथं तेनार्पितो व्याप्तः जैत्रं जयहेतुं पुण्यजनालयं अलकां ४ रुद्रानुचरा भूतादयः ५ दध्मौ
वादितवान् येन शंखनादेन हे क्षत्तः उपदेव्यो यक्षस्त्रियः ६ ७ एकैकं त्रिभिस्त्रिभिः इत्येवं सर्वान् त्रयोदशायुतानि
यक्षान् युगपदहन् जघान ८ ९

भा० च०
४१

तस्यैकल्याणं आशंसन् प्रार्थितवंतः ॥२९॥ नत्वविपत्तानुशत्रून्नाशयतु अविद्यासाद्यात् अंजसा सुखेनैव मृत्युं तरति य
इति च ॥ चतुर्थे दशमः ॥१०॥ एकादशेतु यक्षाणां त्वयं हर्षोमनुस्वयं ॥ आमंत्य वरयामास ध्रुवं तत्वोपदेशतः ॥ एवं गदतां वच
नमुपदेशमिव निशम्य उपस्पृश्य आचम्य निर्मितं नारायणास्त्रं संदधे ॥१॥ क्लेशा रागादयो यथा ॥२॥ किंच तस्यार्षास्त्रं स्वर्ष
ध्रुवे प्रयुक्तामस्तुरैस्तां मायामतिदुस्तरां ॥ निशम्य तस्य मुनयः शमाशंसन्समागताः ॥३१॥ मुनय ऊचुः ॥
औत्तानपादिभगवांस्तव शार्ङ्गधन्वा देवः क्षिणोत्ववनतार्तिहरो विपक्षान् ॥ यन्नामधेयमभिधाय निशम्य चाद्धा
लोकोंजसा तरति दुस्तरमंग मृत्युं ॥३२॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे दशमोध्यायः ॥१०॥ मै
त्रेय उवाच ॥ निशम्य वदतामेवमृषीणां धनुषि ध्रुवः ॥ संदधेस्त्रमुपस्पृश्य यन्नारायणनिर्मितं १ संधीय
मान एतस्मिन्मायागुह्यकनिर्मिताः ॥ क्षिप्रं विनेशुर्विदुर क्लेशा ज्ञानोदये यथा २ तस्यार्षास्त्रं धनुषि प्रयुं
जतः सुपर्णपुंखाः कलहंसवाससः ॥ विनिःसृता आविविशुर्द्विषद्बलं यथा वनं भीमरवाः शिखंडिनः ३ तै
स्तिग्मधारैः प्रधने शिलीमुखैरितस्ततः पुण्यजना उपद्रुताः ॥ तमभ्यधावन्कुपिता उदायुधाः सुपर्णमुन्न
द्धफणा इवाहयः ४ सतान्पृषत्कैरभिधावतो मृधे निकृत्तबाहूरुशिरोधरोदरान् ॥ निनाय लोकं परमर्कमंडलं
व्रजंति निर्भिद्य यमूर्ध्वरेतसः ५
नारायणमस्तु इदं तं अस्त्रं प्रयुंजतः संदधतः सतः सुपर्णमयाः पुंखा मूलप्रांता
येषां कलहंसानां वासांसि पक्षा येषां ते शरा विनिःसृताः इति द्रष्टव्यं उपरिष्टात् शिलीमुखग्रहणात् ३ प्रधने युद्धे उन्नद्धा उ
च्छ्रिताः फणा येषां सर्पाणां पृषत्कैः बाणैः निकृत्ता बाह्वादयो येषां तान् परलोकं निनाय कं यं ऊर्ध्वरेतसः संन्यासिनोर्कमं

४१

प्रायः वाहुल्येन विवृक्णाः संछिन्नाः अवयवा येषां १८ आततायिनं शस्त्रपाणिनं १९ इति ब्रुवन्नित्यन्वयः तत्रापि न मायि
नामित्यादेरनुषंगः चित्ररथो ध्रुवः यत्तवान् प्रतियोगः पुनरुद्योगस्तस्माच्छंकितः मनःस्वतः वायोर्हेतोः २० विस्फु
रंत्यस्तडितो यस्मिंस्तत् नत्रासयंतः स्तनयित्नवोऽशनयो यस्मिन् २१ ववृषुः निपेतुरित्यर्थः नस्रजातिशरीरमिति

हतावशिष्टास्तेर रणाजिराद्दैत्योरगाः क्षत्रियवृष्यशायकैः प्रायो विवृक्णावयवाश्च दुद्रुवुर्मृगेंद्रविक्रीडि
तयूथपाश्च १८ अपश्यमानः सतदाततायिनं महामृधे केचनमानवोत्तमः पुरीं दिदृक्षन्नपि नाविशद्द्वि
षां नमायिनं वेदचिकीर्षितं जनः १९ इति ब्रुवंश्चित्ररथः स्वसारथिं यत्तः परेषां प्रतियोगशंकितः शुश्राव शब्दं
जलधेरिवेरितं नभस्वतो दिक्षु रजोन्वदृश्यत २० क्षणेनाच्छादितं व्योम घनानीकेन सर्वतः विस्फुरत्तडि
ताद्दिक्षु त्रासयत्स्तनयित्नुना २१ ववृषू रुधिरौघासृक्पूयविण्मूत्र[illegible]मेदसः निपेतुर्गगनादस्य कबं
धान्यग्रतोनघ २२ ततः खेदृश्यत गिरिर्निपेतुः सर्वतोदिशं गदापरिघनिस्त्रिंशमुसलाः साश्मवर्षिणः २३
अहयोऽशनिनिःश्वासा वमंतोऽग्निं रुषाक्षिभिः अभ्यधावन्गजामत्ताः सिंहव्याघ्राश्च यूथशः २४ समुद्र ऊर्मि
भिर्भीमः प्लावयन्सर्वतोमुखं आससाद महाह्रादः कल्पांत इव भीषणः २५ एवंविधान्यनेकानि त्रासनान्यमनस्विनां
ससृजुस्तिग्मगतय आसुर्या माययासुराः २६

स्रगास ह स्लेष्मादिमेदसः पुंस्त्वमांषं मेदांसि अस्याग्रतो निपेतुः २२ साश्मवर्षिणः अश्मसहितं यद्वर्षितं तद्वंतः २३ अशनिव
न्निस्वासा येषां २४ २५ त्रासनानि भयंकराणि तिग्मा क्रूरा गतिः प्रवृत्तिर्येषां असुराणां तस्मात् दिशादे अदूशां तरथे नयत्तादयो

७४ टी॰का

ततः कृतार्थो भवतीत्याह संप्रसन्ने सति गुणेभ्यो विमुक्तोऽनयवत्कार्य्येण जीवेन लिङ्गशरीरेण निर्मुक्तः सन् निर्गुणसुखा
त्मकं प्राप्नोति १४ आत्मरतं त्वं भगवत्योक्तं इदानीं तु नास्ति नो आत्मपुत्रादिसंबंधः न चान्योन्यहंतृत्वादिकमपीत्याह
देभिः भूतैः पंचभिरारब्धे देहाकारेण परिणते योषित्पुरुषश्चेति प्रसिद्धिः तयोर्व्यवायान्मैथुनात्संभूतिर्योषित्पुरुष
योरिह संसारे भवति १५ एवं तावत्सर्गः प्रवर्त्तत एवं पालकाकारेण परिणतैर्भूतैरेव स्थितिः हत्त देहाकारपरिण

संप्रसन्ने भगवति पुरुषः प्राकृतैर्गुणैः विमुक्तो जीवनिर्मुक्तो ब्रह्म निर्वाणमृच्छति १४ भूतैः पंचभिरार
ब्धैर्योषित्पुरुष एव हि तयोर्व्यवायात्संभूतिर्योषित्पुरुषयोरिह १५ एवं प्रवर्तते सर्गः स्थितिः संयम एव
च गुणव्यतिकराद्राजन्मायया परमात्मनः १६ निमित्तमात्रं तत्रासीन्निर्गुणः पुरुषर्षभः व्यक्ताव्यक्तमि
दं विश्वं यत्र भ्रमति लोहवत् १७ स खल्विदं भगवान्कालशक्त्या गुणप्रवाहेण विभक्तवीर्यः करोत्यक
र्तैव निहंत्यहंता चेष्टा विभूम्नः खलु दुर्विभाव्या १८

तैः संयमः स च परात्मनो मायया गुणानां व्यतिकरात् न तु स्वतः १६ ननु जडानां देहानां वा कथं सर्गादिहेतु
त्वं तत्राह निमित्तमात्रं पुरुषर्षभ ईश्वरः यत्र यस्मिन्निमित्ते सति कार्यकार्यकारणात्मकं विश्वं भ्रमति परि
वर्त्तते यथा अयस्कान्ते मणौ निमित्ते सति लोहं प्रवर्त्तते तद्वत् १७ ननु स चेन्निमित्तं तर्हि तस्याविशेषाद्युगपदेव
सर्गादित्रयं भवेत् अत आह स खल्विति कालशक्त्या क्रमेण गुणानां प्रवाहः क्षोभस्तेन विभक्तं सत्त्वादिविषयं वीर्यं श
क्तिर्यस्य ननु कालेपि गुणेषु युगपदेव क्षोभः स्यात्तत्राह चेष्टा कालशक्तिः दुर्विभाव्या अचिन्त्या १८

तान्अनागसोनिरपराधान् ६ तमसोनरकस्यद्वारेणाघेनरोषेण ७ ८ ननुमद्भ्रातुर्हंतारःकथमकृतैनसअत्रतत्र
तत्राहनन्विति ९ सत्यप्यपराधेचैतद्धुचितंनभवतीत्याह नायमिति परागृह्यपरागभूतंदेहमात्मानंगृहीत्वाय

तान्हन्यमानानभिवीक्ष्यगुह्यकाननागसश्चित्ररथेनभूयसा औत्तानपादिंकृपयापितामहोमनुर्जगादोप
गतोमहर्षिभिः ६ मनुरुवाच अलंवत्सातिरोषेणतमोद्वारेणपाप्मना येनपुण्यजनानेतानवधीस्त्वमनागसः ना ३
७ नास्मत्कुलोचितंतातकर्मैतत्सद्विगर्हितं वधोयदुपदेवानामारब्धस्तेकृतैनसां ८ नन्वेकस्यापराधेनप्रसंगा
द्बहवोहताः भ्रातुर्वधाभितप्तेनत्वयांगभ्रातृवत्सलः ९ नायंमार्गोहिसाधूनांहृषीकेशानुवर्तिनां य
दात्मानंपरागृह्यपशुवद्भूतवैशसं १० सर्वभूतात्मभावेनभूतावासंहरिंभवान् आराध्यापदुराराध्यंविष्णो
स्तत्परमंपदं ११ सत्वंहरेरनुध्यातस्तत्पुंसामपिसंमतः कथंत्ववद्यंकृतवाननुशिक्षन्सतांव्रतम् १२
तितिक्षयाकरुणयामैत्र्याचाखिलजंतुषु समत्वेनचसर्वात्माभगवान्संप्रसीदति १३

शवीयथादेहाभिमानादन्योन्यंघ्नंति तथाभूतानांवैशसंहिंसेतियत् १० त्वंचबाल्येसाधुःसन्निदानींकथमन्यथा
कृतवानित्याह सर्वभूतात्मभावेनेतिद्वाभ्यां ११ अनुध्यातःहृदिस्थितःज्ञानीचातत्पुंसांहरिदासानामपिसाधुत्वेनसंम
तः १२ सतांव्रतमेवाह महत्सुतितिक्षया नीचेषुकरुणयासमेषुमैत्र्या अखिलेषुसमत्वेनच १३ ॥ ऽऽ ॥ श्र

भा० च०
६२

ननु कर्मादीनां जेतृत्वादीनां स्वरूपतोपि भिन्नत्वात्कथमैक्यमत्यंतत्राह अव्यक्तस्य अतएवाप्रमेयस्य तथापि स
ति हेतुः नानाशक्तीनां महदादीनामुदयो यस्मात् इति चिकीर्षितमेव तावत्कोपि न वेद अथ स्वस्य संभवो यस्मा
त् तमीश्वरं को विद न कोपि वेद अद्धेति पाठे साक्षात् अतस्तत्त्वज्ञानाभावात् विशेषांशे विवाद इत्यर्थः तथा च श्रुतिः
कोऽद्धा वेद इह प्रवोचत्र कुतः यातः कुतः इयं विसृष्टिः अर्वाग्देवा अस्य विसर्जनेनाथ को वेद यत आवभूव इत्यादि २३ ॥

अव्यक्तस्याप्रमेयस्य नानाशक्त्युदयस्य च न वै चिकीर्षितं तात को वेदाथ स्वसंभवं २३ न चैते पुत्रक भ्रा
तुर्हंतारो धनदानुगाः विसर्गादानयोस्तात पुंसो दैवं हि कारणं २४ स एव विश्वं सृजति स एवावति हंति
च अथापि ह्यनहंकारान्नाज्यते गुणकर्मभिः २५ एष भूतानि भूतात्मा भूतेशो भूतभावनः स्वशक्त्या मा
यया युक्तः सृजत्यत्ति च पाति च २६ तमेव मृत्युममृतं तात दैवं सर्वात्मनोपेहि जगत्परायणं यस्मै वलिं
विश्वसृजो हरंति गावो यथा वै नसि दाम यंत्रिताः २७

श्वर एव बुद्धिस्थन् प्राकृतावुपयोगमाह न चैते भ्रातुर्हंतारः उक्षैव हेतुमनुवदंति विसर्गादानयोर्मृत्युजन्मनोः य
द्वा विसर्गः सृष्टिः आदानं संहारः दैवमीश्वर एव हि कारणं २४ तथापि निर्लेपतामाह स एवेति २५ अनहंकार
त्वे हेतुमाह एष इति २६ सत्यमीश्वर एव कर्ता तथाप्यहंकारादिमयानत्युक्तं कथं शक्यमिति चेत्तत्राह तमेवे
ति चतुर्भिः मृत्युमभक्तानां भक्तानां त्वमृतं उपेहि शरणं गच्छ तमेवेत्यवधारणे हेतुः यस्मै नासिकायामभि

वद्धा गाव इव विश्वसृजोपि नामभिर्यंत्रिताः वद्धाः
संतो वलिं हरंति तत्कारिणं कर्म कुर्वंति इत्यर्थः २७

६२

ननु पित्रादिः सृजति पालयति राजादिः निहंति चौरादिः न त्वीश्वरः तत्राह स इति जनेन पित्रादिना जनं पुत्रादिकृत् अं
तकं चौरादिकं तन्मृत्युहेतुना मारयन्नंतकरः स्वयं त्वनंतोऽनादिश्च अव्ययः अक्षीणशक्तिः अयं भावः पित्रादयश्चांत
उत्पत्त्यादिमत्तो न स्वातंत्र्येण कारणं किं त्वीश्वर एव नियंता सर्वकारणमिति १९ न चैवं कुर्वतोपि वैषम्यप्रसक्तिः पक्ष
पाताभावादित्याह द्वाभ्यां न वा इति मृत्युरूपस्यास्य समं यथा भवति तथा प्रजाः कर्मभिस्ताः विशतः तस्य साम्येपि भूते
षु फलवैषम्यं तत्कर्मतयात्वादित्ति सदृष्टांतमाह तं धावंतमनु अनीशाः कर्माधीना भूतसंघा धावंति अनिलं धावंतमे

सोऽनंतोऽन्तकरः कालोऽनादिरादिकृदव्ययः जनं जनेन जनयन्मारयन्मृत्युनांतकम् १९ न वै स्वपक्षो
ऽस्य विपक्ष एव वा परस्य मृत्योर्विशतः समं प्रजाः तं धावमानमनुधावंत्यनीशा यथा रजांस्यनिलं भूत
संघाः २० आयुषोपचयं जंतोस्तथैवोपचयं विभुः उभाभ्यां रहितः स्वस्थो दुःस्थस्य विदधात्यसौ २१
[illegible] केचित्कर्म वदंत्येनं स्वभावमपरे नृप एके कालं परे दैवं पुंसः काममुतापरे २२

व रजांसीव तत्र यथा रेणवस्तानि तमःप्रकाशजलाग्न्यादिप्रवेशेपि नानिलस्य वैषम्यं एवमीश्वरस्यापीति भावः २०
अपचयं अकालमृत्योरपि रक्षा यद्वा अपचयं मृत्युकादीनुपचयं देवादीन् स्वस्थत्वात् उपचयापचयाभ्यां रहितोऽसौ
विभुः दुःस्थस्य कर्माधीनस्य विदधाति २१ एवंभूतश्चेश्वरः सर्वादिसमतः विवादादिस्तु नाममात्रमित्याह केचि
त्पुंसः कामं वात्स्यायनादयः श्रुतिश्च कामोऽकार्षीत् कामः करोति कामः कर्ता कामः कारयितेत्यादि २२॥

भा० च०
५४

३४॥ ३५॥ इति चतुर्थे एकादशः॥ ११॥ द्वादशे धनदेनाभिनंदितः पुरमागतः॥ यज्ञैरिष्ट्वा हरेः स्थानमारुरोहेति कीर्त्यते॥ वैशसा
द्धानिर्वृत्तं ज्ञात्वा॥ १॥ क्षत्रियदायाद क्षत्रियपुत्र॥ अत्यजस्त्यक्तवानसि॥ २॥ न चैवैरस्य कारणमस्तीत्याह न भवानिति॥ अप
यभावयोर्मृत्युजन्मनोः॥ ३॥ कथं तर्हि अहं हन्तेत्यादिबुद्धिस्तत्राह॥ अहं त्वमिति॥ आभाति प्रकाशते अजायत तद्ध्यानात्॥ अत

तं प्रसादयवत्साशु सन्नत्या प्रश्रयोक्तिभिः॥ न यावन्महतां तेजः कुलं नोभिभविष्यति॥ ३४॥ एवं स्वायंभुवः पौ
त्रमनुशास्य मनुर्ध्रुवं॥ तेनाभिवंदितः साकमृषिभिः स्वपुरं ययौ॥ ३५॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कं
धे मनुवाक्यमेकादशोध्यायः॥ ११॥ मैत्रेय उवाच॥ ध्रुवं निवृत्तं प्रतिबुध्य वैशसादपेतमन्युं भगवान्धनेश्वरः॥
तत्रागतश्चारणयक्षकिन्नरैः संस्तूयमानो न्यवदत्कृतांजलिम्॥ १॥ धनद उवाच॥ भो भोः क्षत्रियदायाद प
रितुष्टोस्मि तेनघ॥ यत्त्वं पितामहादेशाद्वैरं दुस्त्यजमत्यजः॥ २॥ न भवानवधीद्यक्षान्न यक्षा भ्रातरं तव
काल एव हि भूतानां प्रभुरप्ययभावयोः॥ ३॥ अहं त्वमित्यपार्था धीरज्ञानात्पुरुषस्य हि॥ स्वाप्नीवाभात्यतद्ध्या
नाद्ययावंधविपर्ययौ॥ ४॥ तद्गच्छ ध्रुव भद्रं ते भगवंतमधोक्षजं॥ सर्वभूतात्मभावेन सर्वभूतात्मविग्रहं
भजस्व भजनीयांघ्रिमभावाय भवच्छिदं॥ युक्तं विरहितं शक्त्या गुणमय्यात्ममायया॥ ५॥
तद्ध्यानात् देहानुसंधानात् ययाधिया बंधः विपर्ययौ दुःखादिः तत्तस्माद्गत्वा च भगवंतं भजस्वेत्युत्तरेणा
न्वयः सर्वभूतात्मविग्रहे यस्य मायया युक्तं विरहितं सगुणनिर्गुणभेदेन ५ राम राम राम राम राम॥ ५४

तदाराधनंचतवसुशक्यमेवेत्याह यःपंचवर्षःसत्वंयमाराध्यत्रिलोक्यामूर्द्धिपदंस्थानंलेभेलब्धवानसि इदा
नींतमेवान्विछ अवलोकयेत्युरेणान्वयः प्रत्यंचि अक्षाणियस्मिन् क्रियाविशेषणंवा २८ हरिंध्यायंतंप्रत्याह
अंगध्रुवमुक्तविरोधेआत्मनिमनसिव्यपाश्रितंतत्रचस्थितं आत्मदृक्प्रत्यग्दृष्टिःसन् अयंभेदोयस्मिन्

यःपंचवर्षोजननींत्वंविहायमातुःसपत्न्यावचसाभिन्नमर्मा वनंगतस्तपसाप्रत्यगक्षमाराध्यले
भेमूर्द्धिपदंत्रिलोक्याः २८ तमेवमंगात्मनिमुक्तविग्रहेव्यपाश्रितंनिर्गुणमेकमक्षरं आत्मानम
न्विछविमुक्तमात्मदृक्यस्मिन्निदंभेदमसत्प्रतीयते २९ त्वंप्रत्यगात्मनितदाभगवत्यनंतआनंद
मात्रउपपन्नसमस्तशक्तौ भक्तिंविधायपरमांशनकैरविद्याग्रंथिंविभेत्स्यसिममाहमितिप्ररूढं ३०
संयछरोषंभद्रंतेप्रतीपंश्रेयसांपरं श्रुतेनभूयसाराजन्नगदेनयथामयं ३१ येनोपसृष्टात्पुरुषाल्लोक
उद्विजतेभृशं नबुधस्तद्वशंगछेदिछन्नभयमात्मनः ३२ हेलनंगिरिशभ्रातुर्धनदस्यत्वयाकृतम्
यज्जघ्निवान्पुण्यजनान्भ्रातृघ्नानित्यमर्षितः ३३

तदिदंयस्मिन्प्रतीयतेतं २९ तदन्वेषणफलमाह त्वमिति तदान्वेषणकालएव ३० उपदेशसारमाह संयछेति
द्वाभ्यां प्रतीपंप्रतिकूलं अगदेनौषधेनयथालोकःरोगंनियछति ३१ येनरोषेणोपसृष्टात्व्याप्तात् ३२ अन्यच्चते
त्वयाकार्यमित्याह हेलनमितिद्वाभ्यां यद्यतः जघ्निवान् ३३

आत्मादेहः आत्मादिमायिकमपि पुनः कालेन सृष्टमनित्यमाकलय्य चिंत्य विशालां बदरिकाश्रमं १५ तत्र तत्कृतमष्टां
गयोगमाह तस्यांशिववाः शुद्धंउदकं विगाह्य प्रविश्येति स्नानादिनियमा उक्ताः विशुद्धेकरणइंद्रियाणि शमादयो यमाः आ
सनादीनि स्फुरमेवोक्तानि जितो मरुत्प्राणायेन आहृतान्यक्षाणि येन भगवतः प्रतिमिधि भूते स्थूले विराड्रूपे तन्मनोद

आत्मस्त्र्यपत्यसुहृदो बलकोशमृद्धमंतःपुरं परिविहारभुवश्च रम्याः भूमंडलं जलधिमेखलमाक
लय्य कालोपसृष्टमिति स प्रययौ विशालां १५ तस्यां विशुद्धकरणः शिववार्विगाह्य बध्वासनं जितम
रुन्मनसाहृताक्षः स्थूले दधार भगवत्प्रतिरूप एतत् ध्यायंस्तदव्यवहितो विसृजत्समाधौ १६ भक्तिं
हरौ भगवति प्रवहन्नजस्रमानंदबाष्पकलया मुहुरर्द्यमानः विक्लिद्यमानहृदयः पुलकाचितांगो नात्मान
मस्मरदसावितिमुक्तलिंगः १७ स ददर्श विमानाग्र्यं नभसोऽवतरद्ध्रुवः विभ्राजयद्दशदिशो राकापतिमिवोदि
तं १८ तत्रानुदेवप्रवरौ चतुर्भुजौ श्यामौ किशोरावरुणांबुजेक्षणौ स्थिताववष्टभ्य गदां सुवाससौ किरीटहारां
गदाचारुकुंडलौ १९

धार ध्यायन्नव्यवहितो ध्यातृध्येयभेदशून्यः सन् साम्यप्रोक्षितः तत्स्थूलं व्यसृजत् १६ एवमजस्रं नित्यं ह
रौ भक्तिप्रकर्षेण वहन् असौ ध्रुवोहमित्यात्मानं न सस्मार यतो मुक्तलिंगः त्यक्तेश्वराभिमानः तत्र हेतवः
आनंदबाष्पकलया बिंदुप्रवाहेणाभिभूयमानः विक्लिद्यमानः द्रवत् हृदयं यस्य पुलकैर्व्याप्तांगः १७ १८
अनु अनंतरं देवप्रवरौ ददर्शेत्यनुषंगः गदामवष्टभ्य स्थितौ किरीटादिभिः सहितं चारुणी कुंडले ययोः १९

काममशंकोच्येन अविशंकितः निर्भयः अनंतरं अतिनिकटं ६ सवरायचोदितइत्यनुवादरूपंपद्यंकृत्वाकथ्यं अतः
सचवव्रइति तस्यअपुनरुक्तं ७ ८ द्रव्यक्रियादेवतानांकर्मसाध्यंफलंतद्रूपंकर्मफलप्रदंचेत्यर्थः ९ सर्वस्या
त्मनि असर्वसर्वोपाधिवर्जिते १० ११ अभोगैर्यज्ञानुष्ठानैः १२ ॥ बहवः सवाः यागाः संवत्सरावाय

वृणीष्वकामंनृपयन्मनोगतंमत्तस्त्वमौत्तानपदेविशंकितः वरार्होस्यंबुजपादयोरनंतरंत्वांवयमंग
शुश्रुमः ॥ ५ ॥ मैत्रेय उवाच ॥ सराजराजेनवरायचोदितोध्रुवोमहाभागवतोमहामतिः हरौसवव्रेऽचलितांस्मृतिं
ययात्तरत्ययत्नेनदुरत्ययंतमः ७ तस्यप्रीतेनमनसातांदत्वैडविलस्ततः पश्यतोऽंतर्दधेसोपिस्वपुरंप्रत्यप
द्यत ८ अथायजतयज्ञेशंक्रतुभिर्भूरिदक्षिणैः द्रव्यक्रियादेवतानांकर्मकर्मफलप्रदम् ९ सर्वात्मन्यच्यु
तेसर्वेतीव्रौघांभक्तिमुद्वहन् ददर्शात्मनिभूतेषुतमेवावस्थितंविभुं १० तमेवंशीलसंपन्नंब्रह्मण्यंदीन
वत्सलं गोप्तारंधर्मसेतूनांमेनिरेपितरंप्रजाः ११ षट्त्रिंशद्वर्षसाहस्रंशशासक्षितिमंडलं भोगैःपुण्यक्षयं
कुर्वन्नभोगैरशुभक्षयं १२ एवंवहुसवंकालंमहात्माविचलेंद्रियः त्रिवर्गौपयिकंनीत्वापुत्रायादान्नृपासनं
१३ मन्यमानइदंविश्वंमायारचितमात्मनि अविद्यारचितस्वप्नगंधर्वनगरोपमं १४

स्मिन् तंकालं त्रिवर्गसाधनंनीत्वा अविचलानिसंयतानि इंद्रियाणियस्य १३ इदंदेहादिभगवन्मायया
आत्मनिस्वस्मिन् रचितंमन्यमानः अत्रअविद्यादृष्टिदृष्टांतयति अविद्यारचिते १४ ॥ रामरामराम

ती १

भा० च० मधुच्युवतेस्त्रवंतिमधुच्युत् तांपागंतरेमधुच्युतंयस्यास्तांअमृतस्राविणीमित्यर्थः॥कृतंनित्यंकर्ममंगलंवाचा

६६ लंकरणंयेन अभ्यवादयत् वाचयामास॥२७॥तदेवरूपंहिरण्मयंबिभ्रत्सन् इयेषऐच्छत्॥२८॥२९॥दीनांहित्वा

अगांदुर्गमंत्रिविष्टपंयास्यामीत्यन्वस्मरत॥३०॥अवसितमभिप्रायंव्यवसायज्ञात्वा॥३१॥३२॥देवयानेनदेवमा

श्रीमैत्रेयउवाच॥ निशम्यवैकुंठनियोज्यमुख्ययोर्मधुच्युतंवाचमुरुक्रमप्रियः॥कृताभिषेकःकृत ध्रा २

नित्यमंगलोमुनीन्प्रणम्याशिषमभ्यवादयत्॥२७॥परीत्याभ्यर्च्यधिष्ण्याग्र्यंपार्षदावभिवंद्यच॥इयेष

तदधिष्ठातुंबिभ्रद्रूपंहिरण्मयं २८ तदादुंदुभयोनेदुर्मृदंगपणवादयः गंधर्वमुख्याप्रजगुःपेतुः

कुसुमवृष्टयः २९ सचस्वर्लोकमारोक्ष्यन्सुनीतिंजननींध्रुवः अन्वस्मरदगंहित्वादीनांयास्येत्रिवि

ष्टपं ३० इतिव्यवसितंतस्यव्यवसायसुरोत्तमौ दर्शयामासतुर्देवींपुरोयानेनगच्छतीं ३१ तत्रतत्र ध्रु ४

प्रशंसद्भिःपथिवैमानिकैःसुरैः अवकीर्यमाणोददृशेकुसुमैःक्रमशोग्रहान् ३२ त्रिलोकींदेव

यानेनसोतिव्रज्यमुनीनपि परस्ताद्यद्ध्रुवगतिर्विष्णोःपदमथाभ्यगात् ३३ यद्भ्राजमानंस्वरुचैवसर्व

वि तोलोकास्त्रयोह्यनुविभ्राजंतएते यन्नाव्रजन्जंतुषुयेननुग्रहाव्रजंतिभद्राणिचरंतियेनिशं ३४

र्गेण विमानेनइतिवा मुनीन्सप्तर्षीनपि ततःपरस्तात्यद्विष्णोःपदंतदभ्यगात् ध्रुवागतिर्यस्यसः ३३ यद्भ्राजमानंस्व

पश्यरुचालोकाविभ्राजन्तेयेऽननुग्रहानिष्कृपाःतेयन्नाव्रजन्नगतवंतः ३४ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ ॥ ६६

उत्तमगायः पुण्यश्लोकः तस्य किंकरौ विज्ञाय मधुद्विषः पार्षत्प्रधानौ वित्ति हेतोः साध्वसेन संभ्रमेण विस्मृतपू
जाक्रमः केवलं तस्य नामानि गृणन् ननाम २० २१ २२ सुभद्रं त इति प्रागीरितस्यैव विष्णुपदारोहणाभिप्रायः अतीतप
त तर्पितवान् आवां तस्य पार्षदौ २३ सुदुर्जयत्वे हेतुः सूरयः सप्तर्षयोपि यत्पदं प्राप्य केवलमधःस्थिताः पश्यंति

विज्ञाय तावुत्तमगायकिंकरावभ्युत्थितः साध्वसविस्मितक्रमः ननाम नामानि गृणन्मधुद्विषः पा
र्षत्प्रधानाविति संहृतांजलिः २० तं कृष्णपादाभिनिविष्टचेतसं बद्धांजलिं प्रश्रयनम्रकंधरं सुनंद
नंदावुपसृत्य सस्मितं प्रीत्योचतुः पुष्करनाभसंमतौ २१ श्रीसुनंदनंदावूचतुः भो भो राजन्सुभद्रं ते वा
चं नोवहितः शृणु २२ यः पंचवर्षस्तपसा भवान्देवमतीतृपत् तस्याखिलजगद्धातुरावां देवस्य शा
र्ङ्गिणः पार्षदाविह संप्राप्तौ नेतुं त्वां भगवत्पदं २३ सुदुर्जयं विष्णुपदं जितं त्वया यत्सूरयोऽप्राप्य वि
चक्षते परं आतिष्ठ तच्चंद्रदिवाकरादयो ग्रहर्क्षताराः परियंति दक्षिणं २४ अनास्थितं ते पितृभिर
न्यैरप्यंग कर्हिचित् आतिष्ठ जगतां वंद्यं तद्विष्णोः परमं पदं २५ एतद्विमानप्रवरमुत्तमश्लोकमौ
लिना उपस्थापितमायुष्मन्नधिरोढुं त्वमर्हसि २६

यच्चंद्रादयः प्रदक्षिणं यथा भवति तथा एवं परिक्रा
मंति आतिष्ठ अधितिष्ठ २४ २५ आयुष्मन्निति त्वयि शरीरस्यानाभिप्रायमेव २६ रामरामराम ॥

भा०च० ६१

उद्दामं उत्कृष्टं यशो यस्य धन्या देर्निमित्तं ध्रौव्यं ध्रुवस्थानप्रापकं प्रशस्यं प्रशंसार्हं अघमर्षणं पापनाशनं ४४
अच्युतप्रियस्य ध्रुवस्य चेष्टितं श्रुत्वा यथा वर्तेत तस्य भक्तिर्भवेत् ४५ तीर्थं महत्त्वाद्याप्ति स्थानं गुणायत्र भवंति
४६ समवाये सभायां ४७ नेच्छन्निः कामः तत्र श्रवणे आत्मैवात्मानं प्रतिसंतुष्टो भवतीति हेतोः सिद्धिमाप्नो

श्रीमैत्रेय उवाच ॥ एतत्तेभिहितं सर्वं यत्पृष्टोहमिह त्वया ध्रुवस्योद्दामयशसश्चरितं संमतं सतां धन्यं
यशस्यमायुष्यं पुण्यं स्वस्त्ययनं महत् स्वर्ग्यं ध्रौव्यं सौमनस्यं प्रशस्यमघमर्षणं ४४ श्रुत्वैतच्छ्रद्धयाभी
क्ष्णमच्युतप्रियचेष्टितं भवेद्भक्तिर्भगवति प्रियस्यात्क्लेशसंक्षयः ४५ महत्त्वमिच्छतां तीर्थं श्रोतुः
शीलादयो गुणाः यत्र तेजस्तदिच्छूनां मनो यत्र मनस्विनां ४६ प्रयतः कीर्तयेत्प्रातः समवाये द्वि
जन्मनां सायं च पुण्यश्लोकस्य ध्रुवस्य चरितं महत् पौर्णमास्यां सिनीवाल्यां द्वादश्यां श्रवणेथ
वा दिनक्षये व्यतीपाते संक्रमेऽर्कदिने पि वा ४८ श्रावयेच्छ्रद्दधानानां तीर्थपादपदाश्रयः ने
च्छंस्तत्रात्मनात्मानं संतुष्ट इति सिध्यति. ४९ ज्ञानमज्ञाततत्वाय यो दद्यात्सत्पथेऽमृतं कृपालो
र्दीननाथस्य देवास्तस्यानुगृह्णते ५० इदं मया तेभिहितं कुरूद्वह ध्रुवस्य विख्यातविशुद्धकर्मणः
हित्वार्भकः क्रीडनकानि मातुर्गृहं च विष्णुं शरणं यो जगाम ॥ ५१ ॥

ति ४९ किंच सत्पथि भगवन्मार्गे अमृतरूपं ज्ञानं यो दद्यात् ५० ध्रुवस्य चरितं मयाभिहितं मातुर्गृहं च हित्वा

६१

अच्युतप्रियाबांधवायेषां ३५ ३६ अनिमिषं अनसंज्योतिषांचक्रं यस्मिन् आहितंसतभ्रमति मेढ्यांप्रहितोगंभी
रवेगोगवांगणइव ३७ आतोद्यंवीणांविनुदन्वादयन् प्रचेतसांब्रह्मसत्रेभगवन्माहात्म्यप्रसंगेनध्रुवमहिमाप्रति
पादनेनपरान्त्रीन्श्लोकानगायत् नूनमिति ३८ पतिरेवदेवतायस्याः तस्याः सुतस्ययस्तपःप्रभावः तस्यतांगतिं

पुंसांतः समदृशः सुहृदः सर्वभूतानुरंजनाः यांत्यंजसाच्युतपदमच्युतप्रियबांधवाः ३५ इत्युत्तानपदःपु
त्रोध्रुवःकृष्णपरायणः अभूत्त्रयाणांलोकानांचूडामणिरिवामलः ३६ गंभीरवेगोऽनिमिषंज्योतिषां
चक्रमर्पितं यस्मिन्भ्रमतिकौरव्यमेढ्यामिवगवांगणः ॥ ३७ ॥ महिमानंविलोक्यास्यनारदोभगवानृषिः
आतोद्यंविनुदन्श्लोकान्सत्रेऽगायत्प्रचेतसां ३८ ॥ नारद उवाच ॥ नूनंसुनीतेःपतिदेवतायास्तपःप्रभा
वस्यसुतस्यतांगतिं दृष्ट्वाभ्युपायानपिवेदवादिनोनैवाधिगंतुंप्रभवंतिकिंनृपाः ३९ यःपंचवर्षोगुरु
दारवाक्शरैर्भिन्नेनयातोहृदयेनदूयता वनंमदादेशकरोजितंप्रभुंजिगायतद्भक्तगुणैःपराजितं ४०
यःक्षत्रबंधुर्भुवितस्याधिरूढमन्वारुरुक्षेदपिवर्षपूगैः षट्पंचवर्षोयदहोभिरल्पैःप्रसाद्यवैकुंठमवापतत्पदं ४१

कलमधिगंतुंवेदवादेनशीलाब्रह्मर्षयोऽपिनैवप्रभवंति अभ्युपायात्भगवद्धर्मान्दृष्ट्वापि किंपुनर्नृपाः ३९
ततःप्रभावगतिंचविशिनष्टि द्वाभ्यां गुरुदाराः पितृपत्नीसुरुचिः तस्यावाक्शरैः निर्भिन्नेनहृदयेनवनंयातः सर्वे
अजितमपियोजिगायवशीकृतवान् ४० तस्यापिरूढंतेनप्राप्तंपदंयोभुविक्षत्रबंधुः द्विजयोभवेत्सः तमनुवर्षेस

मूहैरपि आरोढुमिच्छेदपि किंसा असंकल्प्योऽपि शक्यः दूरतआरो
हणमित्यर्थः कुतं भूतं पदं षट्वा पंचवर्षोऽपि यस्य सः अल्पै
रेवाहोभिः वैकुंठं प्रसाद्य यत्तस्य पदमवापतत् ४१ ॥ ४

भा० च०
५८

आत्मानं स्वरूपभूतं ब्रह्मास्ववरुंधानः आप्नुवन्नज्ञानन् आत्मनोनान्यत् देहं तं स्वयं तु सर्वस्मादन्यः सन् कथंभूतं
ब्रह्मनिर्वाणं शांतं अवबोधरसेनैकात्म्यं यस्य कथं अव्यवच्छिन्नो योयो योगः स एवाग्निस्तेन दग्धकर्ममलआश
योवासनाचयस्य ८ जडादीनामिवाकृतिर्यस्य तथाभूतो लक्षितः अतन्मतिः नतेषामिव मतिर्यस्य सर्वज्ञ

आत्मानं ब्रह्मनिर्वाणं प्रत्यस्तमितविग्रहं अवबोधरसैकात्म्यमानंदमनुसंततं अव्यवच्छिन्नयो
गाग्निदग्धकर्ममलाशयः स्वरूपमवरुंधानो नात्मनोन्यं तदैक्षत ८ जडांधबधिरोन्मत्तमूकाकृतिर
तन्मतिः लक्षितः पथि बालानां प्रशांतार्चिरिवानलः ९ मत्वा तं जडमुन्मत्तं कुलवृद्धाः समंत्रिणः वत्स
रं भूपतिं चक्रुर्यवियांसं भ्रमेः सुतं १० स्वर्वीथिर्वत्सरस्येष्टा भार्यासूत षडात्मजान् पुष्पार्णं तिग्मके
तुं च इषमूर्जं वसुं जयं ११ पुष्पार्णस्य प्रभा भार्ये दोषा च द्वे बभूवतुः प्रातर्मध्यंदिनं सायमिति ह्यासन्
प्रभासुताः १२ प्रदोषो निशिथो व्युष्ट इति दोषासुतास्त्रयः व्युष्टः सुतं पुष्करिण्यां सर्वतेजसमादधे १३ स
चक्षुः सुतमाकूत्यां पत्न्यां मनुमवाप ह मनोरसूत महिषी विरजान्नड्वला सुतान् १४

श्री

त्वात् प्रशांतानि अर्चींषि ज्वाला यस्यानलस्य तद्वत् स्थितः ९ यवीयांसं तत्कनिष्ठं १० इष्टा प्रिया भा
र्या यस्य ११ १२ निशिथः निशीथः १३ स सर्वतेजाः चक्षुः संज्ञं मनुं सुतमवाप मनोर्महिषी नड्वला विरजान्
शुद्धान् पुरुप्रमुखान् द्वादशसुतानसूत १४ ॥ ५८

इति चतुर्थे द्वादशः ॥१२॥ एवं पंचभिरध्यायैर्ध्रुवचर्यानुवर्णिता ॥ अथैकादशभिश्चित्रं पृथुचारित्रमुच्यते ॥ तत्र त्रयोद
शे वक्तुं पृथुजन्म ध्रुवान्वये अंगो वेणपिता पुत्रार्थोयाद्भूत इतीर्यते प्ररूढो भावो भक्तिर्यस्य ॥१॥ अन्ववाये वंशे २ ना
रदेन प्रचेतसां सत्रे वर्णिताः कथाः प्रस्तुतं तन्माहिमानमाह मन्य इति ॥ देवस्य दर्शनं यस्य हरेः परिचर्याप्रकारः क्रिया

इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे द्वादशोध्यायः ॥१२॥ सूत उवाच ॥ निशम्य कौषारविणोप
वर्णितं ध्रुवस्य वैकुंठपदाधिरोहणं ॥ प्ररूढभावो भगवत्यधोक्षजे प्रष्टुं पुनस्तं विदुरः प्रचक्रमे ॥१॥ विदुर उ
वाच ॥ के ते प्रचेतसो नाम कस्यापत्यानि सुव्रत कस्यान्ववाये प्रख्याताः कुत्र वा सत्रमासत २ मन्ये महा
भागवतं नारदं देवदर्शनं येन प्रोक्तः क्रियायोगः परिचर्याविधिर्हरेः ॥३॥ स्वधर्मशीलैः पुरुषैर्भगवान्
यज्ञपुरुषः इज्यमानो भक्तिमता नारदेनेरितः किल ॥४॥ यास्ता देवर्षिणा तत्र वर्णिता भगवत्कथाः
मह्यं शुश्रूषवे ब्रह्मन् कार्त्स्न्येनाचष्टुमर्हसि ॥५॥ मैत्रेय उवाच ॥ ध्रुवस्य चोत्कलः पुत्रः पितरि प्रस्थिते व
नं सार्वभौमश्रियं नैच्छदधिराजासनं पितुः ॥६॥ सजन्मनोपशांतात्मा निःसंगः समदर्शनः ॥ दद
र्श लोके विततमात्मानं लोकमात्मनि ॥७॥

योगः पंचरात्रे येन प्रोक्तः ३ स्वधर्मशीलैः प्रचेतसोभिः ४ ध्रुवस्य वंशं ज्ञातारं इति वक्तुं ध्रुवस्य वंश
मनुक्रामति ध्रुवस्येत्यादिना पितुः सार्वभौमश्रियं नैच्छत् अधिराजासनं च ६ अनिच्छायां हेतुमाह सर

१

भा० च०
४९

२५ अयातयामानि अगतवीर्याणि ॥२६॥ २७॥ यज्ञो गृहीतभागो नो पिबामृतं च व्यसृजन्न प्रायुंक्त ॥२८॥ आहुताः ग्रहान्
सोमपात्राणि इह यज्ञे न गृह्णन्ति ॥२९॥ इह जन्मनि नावत्मनाक् ईषदपि अ घेन स्थितं कथं द्विजाः तस्या
घस्य सद्य एव प्रायश्चित्तैः क्षालनात् किं तु प्राक्तनमेकमघमस्ति ॥ यद्यस्मात् इह गृहाधिकोऽपि त्वं प्र
तमूचुर्विस्मितास्तत्र यजमानमथर्त्विजः ॥ हवींषि हूयमानानि न ते गृह्णंति देवताः ॥२५॥ राजन्
हवींष्यदुष्टानि श्रद्धयासादितानि ते ॥ छंदांस्ययातयामानि योजितानि धृतव्रतैः ॥२६॥ न विदामे
ह देवानां हेलनं वयमण्वपि ॥ यन्न गृह्णंति भागान् स्वान् ये देवाः कर्मसाक्षिणः ॥२७॥ मैत्रेय उवा
च ॥ अंगो द्विजवचः श्रुत्वा यजमानः सुदुर्मनाः ॥ तत्प्रष्टुं व्यसृजद्वाचं सदस्यांस्तदनुज्ञया ॥२८॥ ना
गच्छंत्याहुता देवा न गृह्णंति ग्रहानिह ॥ सदसस्पतयो ब्रूत किमवद्यं मया कृतं ॥२९॥ सदस्पतय ऊ स
चुः ॥ नरदेवेह भवतो नाघं तावन्मनाक् स्थितं ॥ अस्त्येकं प्राक्तनमघं यदिहेदृक् त्वमप्रजः ॥३०॥ त
थासाधय भद्रं ते आत्मानं सुप्रजं नृप ॥ इष्टस्ते पुत्रकामस्य पुत्रं दास्यति यज्ञभुक् ॥३१॥ तथा भागधे
स्व २
यानि ग्रहीष्यंति दिवौकसः ॥ यद्यज्ञपुरुषः साक्षादपत्याय हरिर्वृतः ॥३२॥
ज्ञारहितः ॥३०॥ अतो यथा देवा हविर्गृह्णंति तथात्मानं सुप्रजं साधय ॥ कथं साधनीयं तदाह ॥ इष्ट इति ॥३१॥ तथा
सति स्वभागान् ग्रहीष्यंति ॥ यद्यतो हरिः साक्षाद्वृतः स्यात् ॥ अतस्तेन सह सर्वे देवा आगमिष्यंतीत्यर्थः ॥३२॥ ४९

१५ १६ १७ अंगाविदुरवागेव बहूनं येषां ॥१८॥ मथने हेतुः अराजक इति आद्यः पुरग्रामादीनां तेन रचितत्वात् ॥१९॥
यस्याः प्रजाया हेतोर्विनाशः सन्ययौ ॥२०॥ किंच अंहः अपराधं तेउद्दिश्य आलक्ष्य ॥२१॥ यतोऽयम धर्म इत्याह ॥ नाव

पुरुकुत्सं चित्रद्युम्नं सत्यवंतं धृतव्रतं ॥ अग्निष्टोममतीरात्रं प्रद्युम्नं शिबिमुल्मुकं ॥१५॥ उल्मुकोजनन
यत्पुत्रान्पुष्करिण्यां षडुत्तमानू ॥ अंगं सुमनसं ख्यातिं क्रतुमंगिरसं गयं ॥१६॥ सुनीथांगस्य या पत्नी सुषु
वे वेनमुल्वणं ॥ यद्दौःशील्यात्स राजर्षिर्निर्विण्णो निरगात्पुरात् ॥१७॥ यमंग शेपुः कुपितावाग्वज्रा मुनयः
किल ॥ गतासोस्तस्य भूयस्ते ममंथुर्दक्षिणं करं ॥१८॥ अराजके तदा लोके दस्युभिः पीडिताः प्रजाः ॥ जातो
नारायणांशेन पृथुराद्यः क्षितीश्वरः ॥१९॥ विदुर उवाच ॥ तस्य शीलनिधेः साधोर्ब्रह्मण्यस्य महात्म
नः ॥ राज्ञः कथमभूद्दुष्टा प्रजा यद्विमना ययौ ॥२०॥ किंवांहो वेन उद्दिश्य ब्रह्मदंडमयूयुजन् ॥ दंडव्रतध
रे राज्ञि मुनयो धर्मकोविदाः ॥२१॥ नावध्येयः प्रजापालः प्रजाभिरघवानपि ॥ यदसौ लोकपालानां बिभ
र्त्योजः स्वतेजसा ॥२२॥ एतदाख्याहि मे ब्रह्मन्सुनीथात्मजचेष्टितं ॥ श्रद्दधानाय भक्ताय त्वं परावरवित्त
मः ॥२३॥ मैत्रेय उवाच ॥ अंगोऽश्वमेधं राजर्षिराजहार महाक्रतुं ॥ नाजग्मुर्देवतास्तस्मिन्नाहूता ब्रह्मवादिभिः
२४

ध्येयः अविज्ञे योपि न भवति २२ परावरविदां मध्ये अतिश्रेष्ठः २३ अभावी पुत्रः काम्यकर्मणा बलादु
पादितो न सुखाय भवेदिति द्योतयन्नंगस्य पुत्रोत्पत्तिक्रममाह अंग इत्यादिना २४ रामरामरामरामरामराम

भा० ष० विचक्ष्यदृष्ट्वा ६१ दुर्मनास्तस्य कुपुत्रनिंदावाक्यान्याह प्रायेणेतित्रिभिः अप्रजायतेरभ्यर्थितः तत्र हेतुः कुत्सितैरपत्यैः
५० संभृतं धारयितुमशक्य दुःखं येन विंदंति ६२ सर्वेषां सर्वैः सह आधिमान् संविग्धाः ६३ तत्र प्रजाव्यपदेशं पुत्रनाम
मात्रमपि आत्मनो मोहेन बंधनं यदर्थाः यन्निमित्ताः क्लेशदा गृहा भवंति ६४ इदानीं निर्वेद हेतुत्वेन कुत्सितमेवा

तं विचक्ष्य खलं पुत्रं पालयामास नैर्विविधैर्नृपः यदा न शासितुं कल्पो भृशमासीत् सुदुर्मनाः ६१ प्रायेणाभ्यर्थि
तो देवो ये प्रजा गृहमेधिनः कदपत्यभृशं दुःखं येन विंदंति निर्भरं ६२ यतः पापीयसी कीर्तिरधर्म
श्च महान्नृणां यतो विरोधः सर्वेषां यतः आधिरनंतकः ६३ कस्तं प्रजापदेशं वै मोहबंधनमात्म
नः पंडितो बहु मन्येत यदर्थाः क्लेशदा गृहाः ६४ कदपत्यं वरं मन्ये सदपत्याच्छुचां पदात् निर्विद्ये
त गृहान्मर्त्यो यत्क्लेशनिवहा गृहाः ६५ एवं स निर्विण्णमना महाराज्ञो गृहान्निशीथ उत्थाय महो
दयोदयात् अलब्धनिद्रोनुपलक्षितो नृभिर्हित्वा गतो वेणसुप्रसुप्तं ६६ विज्ञाय निर्विषय गतं पतिं षं २
प्रजाः पुरोहितामात्यसुहृद्गणादयः विचिक्युरुर्व्यामतिशोककातरा यथा निग्रहं पुरुषं कुयोगिनः ६७

पत्यमभिनंदति कदपत्यमिति शुचांपदात् शोकानां स्थानात् वरत्वे हेतुः निर्विद्येति तत्कुतः यद्यतः कदप
त्याद्गृहाः क्लेशनिवहा भवंति ६५ महतां मुख्यानां विभूतीनामुदयो यस्मिन् तस्मा गृहाद्गृहतः या वेणसुप्तास्सुप्तां
६६ प्रजाः पुरोहितादयश्च विचिक्युः अन्वेषितवंतः तं स्तुतं त्येव संततमपि न पश्यन्निति दृष्टांतेना हयथेति ६७ ॥ ५०

नन्वतितुष्यान्कामान्हरिः कथं दद्यात् तत्राह तांस्तानिति ३३ प्रजात्यये पुत्रोत्पत्तये शिपिषु विष्टाय पशुषु य
ज्ञरूपेण प्रविष्टाय तथा च श्रुतिः यज्ञो वै विष्णुः पशवः शिपिर्यज्ञ एव पशुषु प्रतितिष्ठतीति ३४ तस्मादिति योग्य
तयाग्नेः ३५ पत्न्यै प्रादात् ३६ पुमांसं सूते नेनेति तथा तत्प्राश्य पत्युः सकाशाद्गर्भमादधे अप्रजासती ३७ मात

तांस्तान्कामान्हरिर्दद्याद्यान्यान्कामयते जनः आराधितो यथैवैष तथा पुंसां फलोदयः ३३ इति
व्यवहिता विप्रास्तस्य राज्ञः प्रजातये पुरोडाशं निरवपन् शिपिविष्टाय विष्णवे ३४ तस्मात्पुरुषउत्त
स्थौ हेममाल्यमलांबरः हिरण्मयेन पात्रेण सिद्धमादाय पायसं ३५ स विप्रानुमतो राजा गृहीत्वां
जलिनौदनं अवघ्राय मुदा युक्तः प्रादात्पत्न्या उदारधीः ३६ सा तत्पुंसवनं राज्ञी प्राश्य वै पत्युराददे
गर्भं काल उपावृत्ते कुमारं सुषुवेऽप्रजा ३७ स बाल एव पुरुषो मातामहमनुव्रतः अधर्मांशोद्भवं मृत्युं
तेनाभवदधार्मिकः ३८ स शरासनमुद्यम्य मृगयुर्वनगोचरः हंत्यसाधुर्मृगान्दीनान्वेनोऽसावि
त्यरौज्जनः ३९ आक्रीडे क्रीडतो बालान्वयस्यानतिदारुणः प्रसह्य निरनुक्रोशः पशुमारममारयत् ४०

मातामहं मृत्युं मृत्योर्हि पुत्री सुनीथा ३८ मृगयुर्लुब्धकः सन् तं दृष्ट्वा वेनोसावागच्छतीति जनः सर्वोप्य
शेवन चुक्रोश ३९ आक्रीडे क्रीडास्थाने बालान् पशुरिवामारयत् ४०

भा० च०
५१

मूलतस्माग्रतस्थदीप्तप्रज्वलितेकाष्ठेतमध्यवर्त्तिनांपिपीलिकादीनांयथाउभयतोव्यसनं एवंतस्करेभ्यःपालका
च्चदुःखंप्राप्तमित्यर्थः ६ तदेवाहुः अराजकभयादिति अतदर्हणः राज्यानर्हः अस्माकमध्यामिदंजातमित्या
हुः अहेर्यथापयःपोषःक्षीरेणपोषणंपोषकस्याप्यनर्थंविभर्त्तिप्रभाति ७ वेणइतिनिरूपितःनिरुक्तोऽस्माभिः

अस्तिउभयतःप्राप्तंलोकस्यव्यसनंमहत् दारुणमुभयतोदीप्ते इवतस्करपालयोः ६ अराजकभया
देषकृतोराजाऽतदर्हणः ततोप्यासीद्भयंतस्य कथंस्यात्स्वस्तिदेहिनां अहेरिवपयःपोषःपोषक
स्याप्यनर्थभृत् ७ वेणःप्रकृत्यैवखलःसुनीथागर्भसंभवः निरूपितःप्रजापालःसजिघांसति
वैप्रजाः ८ तथापिसांत्वयेमामुंनास्मांस्तत्पातकंस्पृशेत् तद्विद्वद्भिरसद्वृत्तोवेणोस्माभिःकृ
तोनृपः ॥ ९ ॥ शांत्वितोयदिनोवाचंनग्रहीष्यत्यधर्मकृत् लोकधिक्कारसंदिग्धंदहिष्यामःस्वतेज
सा ॥ १० ॥ एवमध्यवसायैनंमुनयोगूढमन्यवः उपव्रज्याब्रुवन्वेणंसांत्वयित्वाचसामभिः ११ मुन
य ऊचुः ॥ नृपवर्य्यनिबोधैतद्यत्तेविज्ञापयामभो आयुःश्रीबलकीर्त्तीनांतवतातविवर्द्धनं १२ ध
र्मःआचरितःपुंसांवाङ्मनःकायबुद्धिभिः लोकान्विशोकान्वितरत्यथाऽनंत्यमसंगिनां १३

अस्माभिःसांत्वयेमउपपत्तिभिः ८ प्रार्थयिष्यामः तस्यपातकं स्वस्यतत्पातकस्पर्शेहेतुः तत्पातकस्वंवि
वृद्धिः ९ १० गूढोमन्युर्येषांसामभिःप्रियोक्तिभिः ११ १२ निष्कामानांआनंत्यमोक्षमपि १३ ॥ ॥३

सास्रवः रुदंतः भर्तुर्विप्लवं नाशं अदर्शनमित्यर्थः ॥ ३० ॥ इति चतुर्थे त्रयोदशः ॥ १३ ॥ चतुर्दशे तु दुःपुत्रभयादंगे गतेऽवि
जेः ॥ अभिषिक्तस्य वेनस्य रोषस्तेवै धनं च्युतेः ॥ क्षेमदर्शिनः क्षेमं चिंतकाः ॥ पशुसमान रूपतां पश्यंतः ॥ १ ॥ आमंत्र्यादीनां

अलक्षयंतः पदवीं प्रजापतेर्हतोद्यमाः प्रत्युपसृत्य ते पुरीं ॥ ऋषीन्समेतानभिवंद्य साश्रवो न्यवेदयन्पौ
रव भर्तृर्विप्लवं ॥ ३० ॥ इति श्रीमद्भागवते महापुराणे चतुर्थे स्कंधे अंग प्रव्रज्यं त्रयोदशोध्यायः ॥ १३ ॥ मैत्रेय उ
वाच ॥ भृग्वादयस्ते मुनयो लोकानां क्षेमदर्शिनः ॥ गोप्तर्यसति वै नृणां पश्यंतः पशुसाम्यतां १ वीरमा
तरमाहूय सुनीथां ब्रह्मवादिनः ॥ प्रकृत्यासंमतं वेनमभ्यषिंचत्पतिं भुवः २ श्रुत्वा नृपासनगतं वेन
मत्युग्रशासनं निलिल्युर्दस्यवः सद्यः सर्पत्रस्ता इवाखवः ३ स आरूढो नृपस्थान उन्नद्धोष्टविभू
तिभिः अवमेने महाभागांस्तब्धः संभावितः स्वतः ४ एवं मदांध उत्सिक्तो निरंकुश इव द्विपः पर्य
टन् रथमास्थाय कंपयन्निव रोदसी ५ न यष्टव्यं न दातव्यं न होतव्यं द्विजाः क्वचित् इति न्यवारयद्ध
र्मं भेरीघोषेण सर्वतः वेनस्यावेक्ष्य मुनयो दुर्वृत्तस्य विचेष्टितं विमृश्य लोकव्यसनं कृपयोचुः स्म सत्रि
प॰१ णः ७

प्रकृतीनां असंमतमपि पाठांतरे प्रकृत्या स्वभावेनासंमतं २ चौरालीना बभूवुः ३ आरूढं नृपस्थानं राजास
नं येन अष्टविभूतिभिः लोकपालैश्वर्यैः ४ सत्रिणः मिलिताः संतः ५ ७

भा०च
५२

२१ भर्तृस्नेहविदूराणां येषां २२ देहे भवंति नृपतेः अतो नृपतिरेवेश्वरः इति तद्दृशा इति भावः २३ बलिं च करादिकं अ
ग्रभुक् आराध्य २४ २५ तेनासत्कृताः भग्नायां भव्ययाचायां २६ २७ २८ परिचक्षीत विनिंदेत् अशुभं तेन विना

अवजानंत्यमी मूढा नृपरूपिणमीश्वरं नानुविंदंति ते भद्रमिह लोके परत्र च २१ को यज्ञपुरुषो नाम
यत्र वो भक्तिरीदृशी भर्तृस्नेहविदूराणां यथा जारे कुयोषितां २२ विष्णुर्विरिंचो गिरिश इंद्रो वायुर्यमो
रविः पर्जन्यो धनदः सोमः क्षितिरग्निरपांपतिः एते चान्ये च विबुधाः प्रभवो वरशापयोः देहे भ
वंति नृपतेः सर्वदेवमयो नृपः ॥२४॥ तस्मान्मां कर्मभिर्विप्रा यजध्वं गतमत्सराः बलिं च मह्यं हरत म
त्तोऽन्यः कोऽग्रभुक् पुमान् ॥२५॥ मैत्रेय उवाच इत्थं विपर्ययमतिः पापीयानुत्पथं गतः ॥ अनुनीय
मानस्तद्याच्ञां न चक्रे भ्रष्टमंगलः २५ इति तेऽसत्कृतास्तेन द्विजाः पंडितमानिना भग्नायां भव्यया
च्ञायां तस्मै विदुर चुक्रुधुः २६ हन्यतां हन्यतामेष पापः प्रकृतिदारुणः जीवन् जगदसावाशु कुरुते
भस्मसाद्ध्रुवं २७ नायमर्हत्यसद्वृत्तो नरदेववरासनं योऽधियज्ञपतिं विष्णुं विनिंदत्यनपत्रपः २८
को वैनं परिचक्षीत वेणमेकमृतेऽशुभं प्राप्त ईदृशमैश्वर्यं यदनुग्रहभाजनः २९ इत्थं व्यवसिता
हंतुमृषयो रूढमन्यवः निजघ्नुर्हुंकृतैर्वेणं हतमच्युतनिंदया ३०

कृतघ्नतामाह कः यदनुग्रहविषयः सन् ईदृशमैश्वर्यं यः प्राप्तः २९ इत्थं रूढमन्यवः इति द्वे नीरूढमन्यवः दु

५२

मा विनश्येत् मा विनश्यतु १४ असाधवो ये ऽमात्यास्तेभ्यो यथा यथा स्त्र १५ १६ १७ सर्वान् लोकांश्च तत्पालकानमरांश्च तत्पा
लकान् यज्ञांश्च संगृह्णाति नियच्छतीति तं विचित्रैः यज्ञद्रव्यादिभिः भवाय सम्पदे ये स्वदेशान् तद्वासिनो जनान् अनुरो

स ते मा विनश्येद्वीर प्रजानां क्षेमलक्षणः यस्मिन् विनष्टे नृपतिरैश्वर्यादवरोहति १४ राजन्नसाध्व
मात्येभ्यश्चोरादिभ्यः प्रजा नृपः रक्षन् यथा बलिं गृह्णन्निह प्रेत्य च मोदते १५ यस्य राष्ट्रे पुरे चैव भगवा
न् यज्ञपूरुषः इज्यते स्वेन धर्मेण जनैर्वर्णाश्रमात्मकैः तस्य राज्ञो महाराज भगवान् भूतभावनः
परितुष्यति विश्वात्मा तिष्ठतो निजशासने ॥१६॥ तस्मिंस्तुष्टे किमप्राप्यं जगतामीश्वरेश्वरे लोकाः स
पालाः ह्येतस्मै हरन्ति बलिमादृताः ॥१७॥ तं सर्वलोकामरयज्ञसंग्रहं त्रयीमयं द्रव्यमयं तपोमयं
यज्ञैर्विचित्रैर्यजतो भवाय ते राजन् स्वदेशाननुरोद्धुमर्हसि १८ यज्ञेन युष्मद्विषये द्विजातिभि
र्वितायमानेन सुराः कला हरेः ॥ स्विष्टाः सुतुष्टाः प्रदिशन्ति वांछितं तद्धेलनं नार्हसि वीर चेष्टितुम् १९
वेन उवाच ॥ बालिशा बत यूयं वा अधर्मे धर्ममानिनः ये वृत्तिदं पतिं हित्वा जारं पतिमुपासते २०

द्धुं अनुवर्त्तितुं १८ युष्मद्विषये त्वद्देशे हरेः कलाः अंशाः सुराः तेषां सुराणां हेलनमवज्ञां १९ बालिशाः अ
ज्ञाः वृत्तिदं अन्नादिप्रदम् मां हित्वा २०

भा० च० अतः उपेक्षादोषपरिहाराय नांगस्येत्यादि विनिश्चित्य महीपतेः ॥ ऊरुं तरसा ममंथुरित्यन्वयः संस्थातुं नाशं गंतुं हृदय
५३ द्वा ॥ ऋषय एव लुप्तपतीन् लोकान्नावारयन् ॥ कथंभूताः हुंकारेण तान्निवारयितुं शक्ता अर्पितकिं, तस्मिन्निवारणे तन्मारणा
दिदोषदर्शिनः ॥ न चोदासः न चौरापद्रुते दीनोपेक्षायां तपोहानिप्रसंगात् ॥ न चान्यं तन्निवारकं राजानमकुर्वन् अंगवंशो

नांगस्य वंशो राजर्षेरेष संस्थातुमर्हति ॥ अमोघवीर्या हि नृपा वंशेऽस्मिन्केशवाश्रयाः ॥ विनिश्चित्यैवमृ
षयो विपन्नस्य महीपतेः ॥ ममंथुरूरुं तरसा तत्रासीद्बाहुको नरः ॥ ४३ ॥ काककृष्णोऽतिह्रस्वांगो ह्रस्वबाहु
र्महाहनुः ॥ ह्रस्वपान्निम्ननासाग्रो रक्ताक्षस्ताम्रमूर्धजः ॥ ४४ ॥ तं तु तेऽवनतं दीनं किंकरोमीति वादिनं
निषीदेत्यब्रुवंस्तात स निषादस्ततोऽभवत् ॥ ४५ ॥ तस्य वंश्यास्तु नैषादा गिरिकाननगोचराः ॥ येनाहरज्जा
यमानो वेनकल्मषमुल्बणं ॥ ४६ ॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे नैषादोत्पत्तिर्नाम चतुर्दशोऽध्या
यः ॥ १४ ॥ मैत्रेय उवाच ॥ अथ तस्य पुनर्विप्रैरपुत्रस्य महीपतेः ॥ बाहुभ्यां मथ्यमानाभ्यां मिथुनं समपद्य
त ॥ १ ॥ तद्दृष्ट्वा मिथुनं जातमृषयो ब्रह्मवादिनः ॥ ऊचुः परमसंतुष्टा विदित्वा भगवत्कलां ॥ २ ॥

छेदस्यानर्हत्वादृत्तो वेणस्यैव देहं ममंथुरिति योज्यं ॥ ४१ ॥ बाहुको वामनः तमेवाह ॥ काककृष्णः महत्यौ हनुकपोलप्रांतौ यस्य
ह्रस्वौ पादौ यस्य ॥ ३६ ॥ ३७ ॥ गिरिः कानन च गोचर आश्रयो न तु पुरादिप्रवेशो येषां ॥ तत्र हेतुः येन कारणेनासावहन् ॥ ततस्तस्य
वंश्यास्तथाभूताः ॥ ३८ ॥ इति चतुर्थे चतुर्दशः ॥ १४ ॥ ततः पंचदशे विप्रैर्मथनाद्बाहुतः ॥ जातस्य तु पृथोरुक्तमभिषेकार्हणं ५३

स्वाश्रमपदं प्रति ऋषिभिर्गते गमने कृते विद्यायोगेन मंत्रसहितया युक्त्या ३१ पुंवद्भावश्चार्षः सरस्वत्याः सलिले
आप्लुता इत्यर्थः ३२ तदा उत्पातान्वीक्ष्य भुवो भद्रं न भवेत्किमित्याकुलाश्च ३३ एवं मृशंत ऋषयः प्रोक्त्वा स्थिताः तद
धावतां चोराणां भूरिः पांसुः समुत्थितः ३४ तत्र दा तेषां लोकस्य धनं लुंपतां जिघांसतां चोपद्रवमाज्ञाय तथा चौरप्रायमरा

ऋषिभिः स्वाश्रमपदं गते पुत्रकलेवरं सुनीथापालयामास विद्यायोगेन शोचती ३१ एकदा मुनयस्ते
तु सरस्वत्सलिलाप्लुताः हुत्वाग्नीन्सत्कथाश्चक्रुरुपविष्टाः सरित्तटे ३२ वीक्ष्योत्थितान्महोत्पातानाहुर्लो
कभयंकरान् अप्यभद्रमनाथाया दस्युभ्यो न भवेद्भुवः ३३ एवं मृशंत ऋषयो धावतां सर्वतोदिशं पांसुः
समुत्थितो भूरिश्चोराणामभिलुंपतां ३४ तदुपद्रवमाज्ञाय लोकस्य वसु लुंपतां भर्त्तर्युपरते तस्मिन्नन्यो
न्यं च जिघांसतां चोरप्रायं जनपदं हीनसत्त्वमराजकं लोकान्नावारयं शक्ता अपि तद्दोषदर्शिनः ३५
ब्राह्मणः समदृक् शांतो दीनानां समुपेक्षकः स्रवते ब्रह्म तस्यापि भिन्नभांडात्पयो यथा १

जकं हीनसत्त्वं च जनपदमाज्ञाय शक्ता अप्यवारणे दोषदर्शिनो जनान् लुंपतो लोकान्नैवारयन्नित्यन्वयः ३५
शक्तानां क्षत्रियाणां अवारणे दोष इति किं वक्तव्यं समदृगपि शांतोपि ब्राह्मणोपि यदि दीनानां समुपेक्षको भवेत्तर्हि
गा२ तस्यापि ब्रह्म स्रववति १

श्री

भा०चं० १३ हेवीरवरासनं उत्तमासनं उत्तमासनं सलिलस्रवा वोयस्मात् १४ हे वालव्यजने १५ ब्रह्ममयं वेदमयं वर्म क
५४ वचं तत्पत्नी श्रीः श्रियं संपदं ३ दशचंद्राकारा एणिविंवानि कोशे यस्य तं असिं खड्गं शतचंद्रं चर्म रूपाश्रयं अतिसुंदरं

सोभिषिक्तोमहाराजः सुवासाः साध्वलंकृतः पत्न्यार्चिर्यालंकृतया विरेजेग्निरिवापरः १३ तस्मैजहारधन
दोहैमंवीरवरासनं वरुणः सलिलस्रावमातपत्रंशशिप्रभं १४ वायुश्चवालव्यजने धर्मःकीर्त्तिमयींस्र
ड३ जं इंद्रःकिरीटमुत्कृष्टंदंडंसंयमनंयमः १५ ब्रह्माब्रह्ममयंवर्मभारतीहारमुत्तमं हरिःसुदर्शनंचक्रंत
त्पत्न्यव्याहतांश्रियं दशचंद्रमसिंरुद्रःशतचंद्रंतथांबिका सोमोमृतमयानश्वांस्त्वष्टारूपाश्रयंरथं अ
ग्निराजगवंचापंसूर्योरश्मिमयानिषून् भूःपादुकेयोगमय्यौ द्यौःपुष्पावलिमन्वहं नाट्यंसुगीतंवादित्र
मंतर्द्धानंचखेचराः ऋषयश्चाशिषःसत्याःसमुद्रःशंखमात्मजं सिंधवःपर्वतानद्योरथवीथीर्म
हात्मनः सूतोथमागधोवंदीतंस्तोतुमुपतस्थिरे स्तावकांस्तानभिप्रेत्य पृथुर्वैण्यःप्रतापवान् मेघ
निर्ह्रादयावाचाप्रहसन्निदमब्रवीत् १६

अजस्य गोः शृंगाभ्यां निर्मितं चापं योगमय्यौ पादस्पर्शमात्रेण ।
भीष्टदेशप्रापके नाट्यादिकौशलं खेचराः आत्मजं स्वप्रभवं तं स्तोतुमुपस्थिताः स्तावकान् स्तोतुमुद्य
तान् अभिप्रेत्य ज्ञात्वा १६ रामरामरामरामरा ॥ रामरामराम ॥ ऽऽ ॥ ६ ॥ ६ ५ ६ ५ ऽऽ ५४

किमूचुरित्यतआह॥एषइतिचतुर्भिः॥लक्ष्म्याःसंभूतिःकला३॥अत्रयःपुमानसतुपृथुर्महाराजोभविष्यति४सुदतीशो
भनदंष्ट्री॥गुणानांचभूषणा॥दीनांभूषणरूपा॥अवरुंधती॥भर्तृत्वेनभजंती॥भविष्यति॥५॥अत्रहेतुः॥एषइतिलोकस्यरि

रक्षयऊचुः॥एषविष्णोर्भगवतःकलाभुवनपालिनी इयंचलक्ष्म्याःसंभूतिःपुरुषस्यानपायिनी ३ अयंतुप्रथ
मोराज्ञांपुमान्प्रथयितायशः॥पृथुर्नाममहाराजोभविष्यतिपृथुश्रवाः ४ इयंचदेवीसुदतीगुणभूषणभूष
णा॥अर्चिर्नामवरारोहापृथुमेवावरुंधती॥५ एषसाक्षाद्धरेरंशोजातोलोकरिरक्षया इयंचतत्पराहिश्रीर
नुयज्ञेनपायिनी॥६॥श्रीमैत्रेयउवाच॥प्रशंसंतिस्मतंविप्रागंधर्वप्रवराजगुः मुमुचुःसुमनोधाराःसिद्धा
नृत्यंतिस्वःस्त्रियः ७ शंखतूर्यमृदंगाद्यानेदुर्दुंदुभयोदिवि तत्रसर्वउपाजग्मुर्देवर्षिपितृणांगणाः ८ ब्रह्मा
जगद्गुरुर्देवैःसहासृत्यसुरेश्वरैः वैन्यस्यदक्षिणेहस्तेदृष्ट्वाचिह्नंगदाभृतः पादयोररविंदंचतंवैमेनेह
रेःकलां ९ यस्याप्रतिहतंचक्रमंशःसपरमेष्ठिनः १० तस्याभिषेकआरब्धोब्राह्मणैर्ब्रह्मवादिभिः आभि
षेचनिकान्यस्मैआजह्रुःसर्वतोजनाः ११ सरित्समुद्रागिरयोनगागावःखगामृगाः द्यौःक्षितिःसर्वभूतानि
समाजह्रुरुपायनम् १२

रक्षयारि रक्षणेच्छया ६ स्वःस्त्रियः अप्सरसोनृत्यंतिस्म ७ ८ देवैःसहासृत्य आगत्य वैन्यस्यपृथोः चिह्नरेखात्मकंचक्रं ९ अ
प्रतिहतेरेखांतरैरभिन्नंचक्रंयस्य चिह्नंसपरमेश्वरस्यांशः १० अभिषेचनिकानि अभिषेकसाधनानि ११ १२ ॥ ॥

अ

किंच प्रभवोपि विश्रुतोऽपि ह्रीमंतो जुगुप्सितो वेति दृष्टांतेयथा अतिस्तुतौ क्रियमाणाया विगर्हितं ब्राह्मणवधादि पौरुषं
विदंति ॥ तथाउ चितामपि स्तुतिं नसहंत इत्यर्थः ॥ २४ ॥ वरीमभिरिति दीर्घमार्षं ॥ भवितृप्रधानस्त्वायं निर्देशः ॥ वरिष्ठैः कर्मभिरवि
दिता इत्यर्थः ॥ २५ ॥ इति चतुर्थे पंचदशः ॥ १५ ॥ षोडशे सर्वलोकेशैः सत्कृतं भाव्ययायुतं ॥ मुनिप्रयुक्ताः सूताद्याः स्तुवंति स्म ॥
तिवर्ण्यते ॥ गायकाः सूतादयः ॥ १ ॥ नालं नसमर्थाः यो भगवान् अवतारेपि अस्याधिक्यमाह ॥ वेणस्यांगाज्जातस्य ते पौरुषाणि

प्रभवो ह्यात्मनः स्तोत्रं जुगुप्संत्यपि विश्रुताः ॥ ह्रीमंतः परमोदाराः पौरुषं वा विगर्हितं ॥ २४ ॥ वयं त्वविदिता लोके सू
ताद्यापि वरीमभिः ॥ कर्मभिः कथमात्मानं गापयिष्याम बालवत् ॥ २५ ॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कं
धे पृथुचरित्रे पंचदशोध्यायः ॥ १५ ॥ श्रीमैत्रेय उवाच ॥ इति ब्रुवाणं नृपतिं गायका मुनिचोदिताः तुष्टुवुस्तुष्ट
मनसस्तद्वागमृतसेवया १ नालं वयं ते महिमानुवर्णने यो देववर्यो वततार मायया वेणांगजातस्य
च पौरुषाणि ते वाचस्पतीनामपि बभ्रमुर्धियः २ अथाप्युदारश्रवसः पृथोर्हरेः कलावतारस्य कथामृता
दृताः यथोपदेशं मुनिभिः प्रचोदिताः श्लाघ्यानि कर्माणि वयं वितन्महि ३

प्रतिज्ञां निर्वर्त्तयाव ब्रह्मादीनामपि धियो बभ्रमुः कुतः पुनर्वयं तद्वर्णने समर्था भवेम २ अथापि यथाव
द्वर्णयितुमशक्ता अपि कथामृते सादराः मुनिभिरुपदेशो योगबलेन हृदि प्रकाशनं तदनतिक्रम्य वितन्महि
विस्तारयाम ३ रामराम ॥

लोकेऽस्पष्टगुणस्य सतो मे स्तुतिः स्यात् अधुना तु किमाश्रयो मे स्तवो योज्यतां अतो गिरोऽधुना मयि वितथा माभू
वन् यद्वा लोकेऽधुना अस्पष्टगुणस्य मे किमाश्रयः स्तवः स्यात् अत एषः क्रियमाणः स्तवः मे मदन्यस्य योज्यताम्
न तु मे वितथाभिधानापत्तेरित्यर्थः ॥ १७ तस्मात्परोन्तिकास्तोतारे अस्पष्टेषु गुणेषु सत्सु अस्माकमुपश्रुतानि यशांसि
प्रति स्तोत्रं अलमत्यर्थं करिष्यथ हे अपीच्यवाचः मधुरगिरः सभ्यैः प्रेरिता वयं त्वामेव स्तुमः इति चेत्तत्राह उत्तमश्लोक

पृथुरुवाच ॥ भोः सूत हे मागध सौम्य वंदिन् लोकेऽधुनास्पष्टगुणस्य मे स्यात् किमाश्रयो मे स्तव एष योज्य
तां मा मय्यभूवन्वितथा गिरो वः १७ तस्मात्परोक्षेऽस्मदुपश्रुतान्यलं करिष्यथ स्तोत्रमपीच्यवाचः सत्यु
त्तमश्लोकगुणानुवादे जुगुप्सितं न स्तवयंति सभ्याः १८ महद्गुणानात्मनि कर्तुमीशः कः स्ताव
कैः स्तावयतेऽसतोऽपि तेऽस्याभविष्यन्निति विप्रलब्धो जनावहासं कुमतिर्न वेद ॥ १९ ॥

स्य गुणानुवादे कार्ये सति जुगुप्सितमर्वाचीनं न स्तावयंति १८ ननु संभावितैरेव गुणैरात्मानं जनः स्तावयतीति
चेत्तत्राह महद्गुणानात्मनि संपादयितुं शक्तोऽपि सतो गुणाननु संभावनामात्रेण स्तावयते यद्वा आदावेव सतो
ऽपि कः स्तावयते स्वत एव प्रख्यातसिद्धेः अन्यस्तु मिथ्यागुणस्तुतिश्लाघामंद इत्याह तद्वति यद्ययं शास्त्राभ्यासा
दिकमकरिष्यति तर्ह्यस्य ते विद्यादयो गुणा अभविष्यन्निति क्रियातिपत्त्या विप्रलब्धो जनानामवहासं न वेद १९

भा० च०
५६

श्री

मै

नव्यक्तं वर्त्म प्रवेशनिर्गमो मार्गो यस्य निरूढं निष्पन्नं सर्वमपि हितं कार्यं यस्य तच्च कार्यं गंभीरं किमर्थमेतत्कृतमित्यंतस्तत्त्वा
भिप्रायविदं यत्र इति तथा उपगुप्तं संरक्षितं वित्तं यस्य अनंतमाहात्म्यश्चासौ गुणानामेकधाम विष्णुर्यस्मिन् स च अनंत
माहात्म्योपेतानां गुणानां एकं धामस्थानं यस्येति वा संवृतात्मा संयतमूर्त्तिः समुद्रचरत्वेन वरुणस्याप्येते गुणाः द्रष्टव्याः १०

अव्यक्तवर्त्मैष निरूढकार्यो गंभीरवेधा उपगुप्तवित्तः अनंतमाहात्म्यगुणैकधामा पृथुः प्रचेता इव संवृता
त्मा १० हरस्सदोदुर्विषहश्च आसन्नोपि विदूरवत् नैवाभिभवितुं शक्यो वेणारण्युस्थितो नलः ११ अंतर्वहिश्च भू
तानां पश्यन्कर्माणि चारणैः उदासीनइवाध्यक्षो वायुरात्मेव देहिनां १२ नादंड्यं दंडयत्येष सुतमात्मद्विषामपि॥
दंडयत्यात्मजमपि दंड्यं धर्मपथे स्थितः १३ अस्याप्रतिहतं चक्रं पृथोरामानसाचलात् वर्त्तते भगवानर्को
यावन्नपतितो गगनैः १४ रंजयिष्यति यल्लोकमयमात्मविचेष्टितैः अथामुमाहू राजानं मनोरंजनकैः प्रजाः १५
दुरासदः शत्रोर्मनसापि प्राप्तुमशक्यः दुर्विषहः शत्रुभिः सोढुमशक्यः विदूरवर्त्ती रूपेणाभिभवितुमशक्यः वेणारण्या
रण्येः तस्माद्दुस्थितः ११ चारणैश्चारभ्रमणैः पश्यन्नपि सत्स्वपि तत उदासीन इव वर्त्तते वर्त्तिष्यते यथा देहिनामध्यक्षो अविकृतत्रा
त्मभूतो वायुः सूत्रात्मा तद्वत् १२ आत्मद्विषां सुतमिति सुतग्रहणं स्वात्मनसाम्यार्थं धर्मपथे यमस्य वर्त्ते स्थितः १३ चक्रं
आज्ञा सेना वा रथस्य वा चक्रं मानसाचलमभिव्याप्य प्रवर्तते किंपर्यंतमित्यत्रआह अर्को रश्मिगणैर्यावित्यस्ततस्तावत् १४ य

यस्माद्रंजयिष्यति अथ तस्मान्मनोरंजनकैर्हेतुभिरमुं राजा
नमाहुः मनोरंजनकैरिति चेष्टितविशेषणं वा १५ ॥ ऽऽ

५६

४ तनौ स्वदेहे लोकपालानां तनूर्मूर्त्तीः कालेकाले विभर्त्ति यथाभागपालनपोषणानुरंजनादिकार्यानुसारेण यज्ञादिप्रवर्त्त-
नेन स्वर्गस्य हितं वृष्ट्यादिना च भूर्लोकस्य हितं यथा भवति तथा ५ सूर्यादितनुधारणमेवाहाष्टभिः वसु धनं करादानं
काले आदत्ते दुर्भिक्षादिकाले विमुंचति अष्टौ मासान् सूर्यो यथा वसु जलमादत्ते विमुंचति वर्षासु तद्वत् ६ मस्तके पादेना-

एष धर्म्मभृतां श्रेष्ठो लोकं धर्मेनुवर्त्तयन् गोप्ता च धर्मसेतूनां शास्ता तत्परिपंथिनां ४ एष वै लोकपालानां
विभर्त्येकस्तनौ तनूः कालेकाले यथाभागं लोकयोरुभयोर्हितं ५ वसु काल उपादत्ते काले चायं विमुंचति स-
मः सर्वेषु भूतेषु प्रतपन् सूर्य्यवद्विभुः ६ तितिक्षत्यक्रमं वैण्य उपर्याक्रमतामपि भूतानां करुणः शश्वदार्त्तानां
३ क्षितिवृत्तिमान् ७ देवेऽवर्षत्यसौ देवो नरदेववपुर्हरिः कृच्छ्रप्राणाः प्रजा ह्येष रक्षिष्यत्यंजसेंद्रवत् ८ आप्याय-
यत्यसौ लोकं वदनामृतमूर्त्तिना सानुरागावलोकेन विशदस्मितचारुणा ९

क्रमतामप्यार्त्तानां भूतानामतिक्रमं सहिष्यते क्षितेर्वृत्तिः सर्वसहनं सा वृत्तिर्यस्यास्ति स तथा ७ देवेऽवर्षत्येव कृ-
च्छ्रगताः प्राणा यासां ताः प्रजाः स्वयं रक्षकत्वात् रक्षिष्यति अत्र हेतुः असौ नरदेववपुर्हरिरिति ८ वदनमेवामृतमू-
र्त्तिश्चंद्रः तेन सानुरागोऽवलोको यस्मिन् विशदं स्मितं तेन चारुणा अत्र च क्वचिद्वर्त्तमाननिर्देशो वर्त्तमानसामीप्ये वर्त्त-
मानवद्वेति भूतनिर्देशश्च आशंसायां भूतवच्चेति द्रष्टव्यः ९

यत्रप्रादुरभाविप्रादुर्भूताकर्मकर्त्तारश्चिरात् अहार्षीत् २४ विश्रुताविक्रमायस्यगाथाःप्रबंधान् २६ उपगीयमा
नोमहानुभावोयस्य ॥ २७ ॥ इतिचतुर्थेषोडशः ॥ १६ ॥ ततःसप्रदर्शेलोकदृष्टधांप्रशमयन्पृथुःप्रस्तबीजामहीं हंतुंयतोभी

एषोऽश्वमेधान्शतमाजहारसरस्वतीप्रादुरभावियत्र ॥ अहारषीद्यस्यहयंपुरंदरः ॥ शतक्रतुश्चरमेवर्त्तमाने २४
एषःस्वसद्मोपवनेसमेत्यसनत्कुमारंभगवंतमेकं आराध्यभक्त्यालभतामलंतंतज्ज्ञानंयतोब्रह्मपरंविदंति
२५ तत्रतत्रगिरस्तास्ताइतिविश्रुतविक्रमः श्रोष्यत्यात्माश्रितागाथाःपृथुःपृथुपराक्रमः ॥ २६ ॥ दिशोविजित्या
प्रतिरुद्धचक्रःस्वतेजसोत्पाटितलोकशल्यः ॥ सुरासुरेंद्रैरनुगीयमानोमहानुभावोभवितापतिर्भुवः ॥ २७ ॥ इ
ति श्रीमद्भागवतेमहापुराणेचतुर्थस्कंधेपृथुचरित्रेषोडशोध्यायः ॥ १६ ॥ श्रीमैत्रेयउवाच ॥ एवंसभगवान्वैण्यःख्यापितोगु
णकर्मभिः छंदयामासतान्कामैःप्रतिपूज्याभिनंद्यच ॥ १ ॥ ब्राह्मणप्रमुखान्वर्णान्भृत्यामात्यपुरोधसः पौरा
ज्ञानपदान्श्रेणीःप्रकृतीःसमपूजयत् ॥ २ ॥ विदुरउवाच ॥ कस्माद्दधारगोरूपंधरित्रीबहुरूपिणी यांदुदोहपृ
थुस्तत्रकोवत्सोदोहनंचकिं ३ प्रकृत्याविषमादेवीकृतातेनसमाकथं तस्यमेध्यंहयंदेवःकस्यहेतोरपाहर
त् ४ सनत्कुमाराद्भगवतोब्रह्मन्ब्रह्मविदुत्तमात् लब्ध्वाज्ञानंसविज्ञानंराजर्षिःकांगतिंगतः ५ यच्चान्यदपि
कृष्णस्यभगवान्भगवतःप्रभोः श्रवःसुश्रवसःपुण्यंपूर्वदेहकथाश्रयं ६ था

न्पातयास्तुतः छंदयामासतोषितवान् १ भृत्यानमात्यान्पुरोधसः पुरोहितांश्च श्रेणीःतैलिकतांबूलिकादीन् पौरविषान्
प्रकृतीःनियोगतः २ दोहनंपात्रं ३ मेध्यंयज्ञार्हं ४ सविज्ञानं अपरोक्षज्ञानेनसहितं ५ पूर्वदेहः एतद्वतारः तत्कथा

१६ मातरीवभक्तिर्भजनंयस्य आत्मनोदेहस्याइवपत्न्यांप्रीतिमान् १७ नंदिसुखंवर्द्धयतीति तथामुक्तसंगेषुप्रकृष्टंसंगोयस्यादंड
पाणिरित्यपराधानुपेक्षणमुच्यते नोदंडभित्यत्रतुपक्षपाताभावउक्तः १८ अयंत्विति तुशब्देननिरुपमत्वंदर्शयति अस्यचात्म
तामाह यस्मिन्प्रतीतमपिनानात्वमर्थेनांपश्यंति १९ आउदयाद्रेस्तत्पर्य्यंतं गोप्तागोपायिष्यातितदर्थंपर्य्यस्यत्तेपर्य्यलि

दृढव्रतःसत्यसंधोब्रह्मण्योवृद्धसेवकः शरण्यःसर्वभूतानांमानदोदीनवत्सलः १६ मातृभक्तिःपरस्त्रीषुपत्न्या
मर्द्धइवात्मनः प्रजासुपितृवत्स्निग्धःकिंकरोब्रह्मवादीनां १७ देहिनामात्मवत्प्रेष्ठःसुहृदानंदवर्द्धनः मुक्तसंगप्रसं
गोयंदंडपाणिरसाधुषु १८ अयंतुसाक्षाद्भगवांस्त्र्यधीशःकूटस्थआत्माकलयावतीर्णः यस्मिन्नविद्यारचितंनति
रर्थंकंपश्यंतिनानात्वमपिप्रतीतं १९ अयंभुवोमंडलमोदयाद्रेर्गोप्तैकवीरोनरदेवनाथः आस्थायजैत्रंरथमात्तचापः
पर्य्यस्यतेदक्षिणतोयथार्कः २० अस्मैनृपालाःकिलतत्रतत्रबलिंहरिष्यंतिसलोकपालाः मंस्यंतएषांस्त्रियआदि
राजंचक्रायुधंतद्यशउद्धरंत्यः २१ अयंमहींगांदुदुहेधिराजःप्रजापतिर्वृत्तिकरःप्रजानां योलीलयाद्रीन्स्वस
रासकोट्याभिंदन्समामागमकरोद्यथेन्द्रः २२ विस्फूर्जयन्नाजगवंधनुःस्वंपदाचरन्क्ष्मामविसह्यमाजौ तदानिलि
ल्युर्दिशिदिश्यसंतोलांगूलमुद्यम्ययथामृगेंद्रः २३

स्पातिरित्यर्थः २० अस्मैतथाप्रदक्षिणंकुर्वंते मंस्यंते तस्ययशउद्धरंत्यउदाहरंत्यकीर्तयंत्यः २१ इंद्रइवाद्रीन्
विभिंदन् २२ लांगूलमुन्नमय्ययथामृगेंद्रश्चरति तथाधनुर्विस्फूर्जयन् पदाक्ष्मामचरत् २३ रामरामरामराम

१५
भा० चं० रोदसीद्यावापृथिव्यौतयोरंतरमंतरिक्षंअनुपृष्ठतः उद्यतमायुधंयेनतं १६ १७ योधर्मज्ञइतिमतः सभगवान्‌
५८ योषांमांकथंअहनिष्यत्‌ हनिष्यति १९ २० अजरांदृढांधास्यसिधारयिष्यसि २१ बर्हिषियज्ञेयाभवतीदेवतारू

तामन्वधावत्तद्वैण्यःकुपितोत्यरुणेक्षणः शरंधनुषिसंधाययत्रयत्रपलायते १५ सादिशोविदिशो
देवीरोदसीचांतरंतयोः धावंतीतत्रतत्रैनंददर्शानूद्यतायुधं १६ लोकेनाविदितत्राणंवैण्यन्मृत्योरिव
प्रजाःत्रस्तातदानिववृतेहृदयेनविदूयता १७ उवाचचमहाभागंधर्मज्ञापन्नवत्सल त्राहिमामपि
भूतानांपालनेवस्थितोभवान्‌ १८ सत्वंजिघांससेकस्माद्दीनामकृतकिल्बिषां अहनिष्यत्कथंयो
षांधर्मज्ञइतियोमतः १९ प्रहरंतिनवैस्त्रीषुकृतागस्स्वपिजंतवः किमुतत्वद्विधाराजन्करुणा
दीनवत्सलः ॥२०॥ मांविपाट्याजरांनावंयत्रविश्वंप्रतिष्ठितं आत्मानंचप्रजाश्चेमाःकथमंभसिधास्यसि
२१ पृथुरुवाच ॥ वसुधेत्वांवधिष्यामिमच्छासनपराङ्मुखीं भागंबर्हिषियावृंक्तेनतनोतिचनोवसु
२२ यवसंजग्ध्यनुदिनंनैवदोग्ध्यौधसंपयः तस्यामेवंहिदुष्टायांदंडोनात्रनशस्यते २३ यां१

सती भागंवृंक्तेभजतेवसुधान्यादि २२ गोरूपेणतुयवसंतृणंजग्धिअत्तीत्यर्थः पयस्तुनैवदोग्धि दुग्धंनस्र
वति अस्मिन्नपराधे २३

५८

अदुह्यत् दुग्धवान् ७ ८ जनतायास्त्वं पालकस्त्वया मंत्रितो नियुक्तः तदा निरन्ने क्षितितले सति क्षुधा क्षामा क्षीणदेहा
यासां ताः प्रजाः एतत् पतिं पृथुमब्रुवन् ९ जठरेणाग्निनाभितप्ताः यः साधितः विप्रैर्मथनेन संपादितः तं त्वां श

भक्त्यायमेनुरक्ताय तव चाधोक्षजस्य च वक्तुमर्हसि योऽदुह्यद्वैन्यरूपेण गामिमां ७ सूत उवाच ॥ चोदितो विदुरे
णैवं वासुदेवकथां प्रति प्रशंस्य तं प्रीतमना मैत्रेयः प्रत्यभाषत ॥ ८ ॥ मैत्रेय उवाच ॥ यदाभिषिक्तः पृथुरंग
विप्रैरामंत्रितो जनतायाश्च पालः प्रजा निरन्ने क्षितिपृष्ठ एत्य क्षुत्क्षामदेहाः पतिमभ्यवोचन् ९ वयं राज
ञ्जाठरेणाभितप्ता यथाग्निना कोटरस्थेन वृक्षाः त्वामद्य याताः शरणं शरण्यं यः साधितो वृत्तिकरः पतिर्नः
१० तन्नो भवानीहतु रातवेन्नं क्षुधार्दितानां नरदेवदेव यावन्न नंक्ष्यामह उज्झितोर्जा वार्तापतिस्त्वं किल लो
कपालः ११ मैत्रेय उवाच ॥ पृथुः प्रजानां करुणं निशम्य परिदेवितं दीर्घं दध्यौ कुरुश्रेष्ठ निमित्तं सोन्वपद्यत
१२ इति व्यवसितो बुद्ध्या प्रगृहीतशरासनः संदधे विशिखं भूमेः क्रुद्धस्त्रिपुरहा यथा १३ प्रवेपमाना धर
णी निशाम्योदायुधं च तं गौः सत्यपाद्रवद्भीता मृगीव मृगयुद्रुता १४

रणं याताः १० तत् तस्मात् नोऽस्माकं रातवे दातुं
ईहतु यत्नं करोतु उज्झितोर्जः त्यक्तान्नाः सत्यः वार्तायाः जीविकायाः पतिः ११ परिदेवितं विलापं निमित्तं हेतुः अन्व
पद्यत ज्ञातवान् १२ पृथिव्या औषधिवीर्याणि ग्रस्तानीति व्यवसितो निश्चितवान् १३ मृगयुना द्रुता अनुगता मृगीव १४

सृष्टिसंहारकर्त्रे कोऽहमेवेतिचेति तथाप्रजापालेनप्रवृत्तस्य मद्वधोनुचितएवेत्याह एतदिति आत्माश्रयया जिवरूपिण्याः ३१
अतोदुर्ज्ञेयमीश्वरचेष्टितमित्याह नूनमिति अकृतात्मभिः विद्विष्टचित्तैः यः ईश्वरः स्वतंत्रः अकरोद्ब्रह्माणं परतश्चेति तेनब्र
ह्मणाचराचरमकारयत् यश्चस्वतएकः परतोमाययानेकः ३२ तस्मादचिंत्यशक्तये केवलेनमः इत्याह सर्गादिउत्पत्तिस्थिति

य एतदादावसृजच्चराचरं स्वमाययात्माश्रययाविर्तक्यया तयैवसोयंकिलगोप्तुमुद्यतः कथंनुमांधर्मपरोजि
घांसति ३२ नूनंबतेशस्यसमीहितंजनैस्तन्मायया दुर्जययाकृतात्मभिः नलक्ष्यतेयस्त्वकरोदकारयद्योनेकएकः
परतश्चईश्वरः ३२ सर्गादियोस्यानुरुणद्धिशक्तिभिर्द्रव्यक्रियाकारकचेतनात्मभिः तस्मैसमुन्नद्धविरुद्धश
क्तयेनमः परस्मैपुरुषायवेधसे ३३ सवैभवानात्मविनिर्मितंजगद्भूतेंद्रियांतःकरणात्मकंविभो सं
स्थापयिष्यन्नजमांरसातलादभ्युज्जहारांभसआदिसूकरः ३४ अपामुपस्थेमयिनाव्यवस्थिताः प्र
जाभवानद्यरिरक्षिषुः किल सवीरमूर्तिःसमभूद्धराधरोयोमांपयस्युग्रशरोजिघांससि ३५

भंगं अस्यजगतः अनुरुणद्धि अनुवर्त्ततेकरोति द्रव्याणिमहाभूतानि क्रियाइंद्रियाणि कारकादेवाः चेतनाबुद्धिः आत्माहंकारः ते
स्वशक्तिरूपैः समुन्नद्धासमुत्कटाविरुद्धाः शक्तयो यस्य ३३ प्राणिनांधारणाय मांरसातलादुद्धृत्येदानींप्रजारक्षणेप्रवृत्तस्यमद्व
धोनयुक्तइतिसकरुणमाह द्वाभ्यां हे अज यः सृष्टवान् स्वनिर्मितंचराचरंजगत्सम्यक्स्थापयितुं आदिसूकरः सन् मामुज्जहा
र ३४ सएवधरोवराहोयं अपामुपस्थउपरि मयिनावि आधारभूतायामवस्थिताः प्रजारक्षितुमिच्छुः वीरमूर्तिःरूपः समभू
त् यः स एवंभूतः सत्वंपयसिनिमित्ते मांजिघांससीतिचित्रमित्यर्थः ३५

आत्मनिर्देहे कृच्छ्राणि २४ मद्वधे सर्वथा अन्नं न स्यादिति चेत्तत्राह अमूषां प्रजानां मेदसा मांसेन २५ यदुक्तं योषां कथं ह
निष्यसीति तत्राह पुमानिति तस्य वधोऽवध एव २६ यच्चोक्तं कथं मां भूः सं धास्यतीति तत्राह त्वामिति तिलशः तिलप्रमा
णानि खंडानि इत्येवंभूतामनवस्थानीत्वा २७ मन्युमयीं मूर्त्तिं बिभ्रंतं कृतांततुल्यमुच्यते नन्वहंतोमस्य मन्युमयी मूर्ति

त्वं खल्वोषधिबीजानि प्राक्सृष्टानि स्वयंभुवा न मुंचस्यात्मरुद्धानि मामवज्ञाय मंदधीः २४ अमूषां क्षुत्परी
तानामार्त्तानां परिदेवितं शमयिष्यामि मद्बाणैर्भिन्नायास्तव मेदसा २५ पुमान्योषिदुत क्लीव आत्मसंभाव
नोऽधमः भूतेषु निरनुक्रोशो नृपाणां तद्वधो वधः २६ त्वां स्तब्धां दुर्मदां नीत्वा मायागां तिलशः शरैः आत्म
योगबलेनेमा धारयिष्याम्यहं प्रजाः २७ एवं मन्युमयीं मूर्त्तिं कृतांतमिव बिभ्रतं प्रणता प्रांजलिः प्राह मही
संजातवेपथुः २८ धरोवाच नमः परस्मै पुरुषाय मायया विन्यस्तनानातनवे गुणात्मने नमः स्वरूपानु
भवेन निर्धुतद्रव्यक्रियाकारकविभ्रमोर्मये २९ येनाहमात्मायतनं विनिर्मिता धात्रा यतोऽयं गुणसर्गसंग्रहः
स एव मां हंतुमुदायुधः स्वराडुपस्थितोऽन्यं शरणं कमाश्रये ३०

रिति २८ शुद्धसत्वतनुं देवं कस्मादिति तदाह एवं वी
क्षमाणं पृथुं पृथ्वी तुष्टाव करुणोक्तिभिः मायया विन्यस्ता रचिता नाना घोरादि तनवो येन गुणात्मने गुणमूर्त्तित्वेन प्रतीय
मानायापि वस्तुतस्तु निर्धूता निरस्ता द्रव्यक्रियाकारकेषु अधिभूताध्यात्माधिदैवेषु विभ्रमो अहंकारः तन्निमित्ता ऊर्मयो रागद्वे
षादयो यस्मिन् तस्मै २९ अहो सर्वजीवाश्रयत्वेन स्रष्टा मां कथं हंतुं प्रवर्त्तत इत्याह येन विधात्रा आत्मनां जीवानामायतनं गे
हं निर्मिता यतः यस्यां मयि गुणस्य सर्गस्य च निर्धृतग्रामस्य संग्रहः धारणं स्वराट् स्वतंत्रः ३० ॥

यमे

अविद्वान् विद्वान् अपि इति वा अभिचरंति नाशं प्राप्ति ५ सहेतुकमुपायमापुरेतिषड्भिः ६ भवद्भिरिति राजसामान्याभि
प्रायेण अपालिता चोराधीनचौरणात् अनादृता च यज्ञादिप्रवर्त्तनाभावात् अग्रसं गिलीतवती अन्यथाऽधृतव्रतै
र्भुक्ताः न प्रसोष्यते ततश्च यज्ञादयो न सिद्धेरन्निति भावः ७ क्षीणाः जीर्णाः ८ वत्संदोहनं पात्रं दोग्धारं चोपकल्पयत

ताननादृत्य यो विद्वानर्थानारभते स्वयं तस्य व्यभिचरंत्यर्था आरब्धाश्च पुनःपुनः ५ पुरा सृष्टा ह्योषधयो
ब्रह्मणा या विशांपते भुज्यमाना मया दृष्टा असद्भिरधृतव्रतैः ६ अपालितानादृता च भवद्भिर्लोकपालकैः
चौरीभूतेऽथ लोकेऽहं यज्ञार्थेऽग्रसमोषधीः ७ नूनं ता वीरुधः क्षीणा मयि कालेन भूयसा तत्र दृष्टेन योगेन
भवानादातुमर्हति ८ वत्सं कल्पय मे वीर येनाहं वत्सला तव धोक्ष्ये क्षीरमयान्कामाननुरूपं च दोह
नं दोग्धारं च महाबाहो भूतानां भूतभावन अन्नमीप्सितमूर्जस्वद्भगवान्वाञ्छते यदि ९ समां च कु
रु मां राजन्देववृष्टं यथा पयः अपर्तावपि भद्रं ते उपावर्तेत मे विभो १० इति प्रियं हितं वाक्यं भुव आ
दाय भूपतिः वत्सं कृत्वा मनुं पाणावदुहत्सकलौषधीः ११ तथा परे च सर्वत्र सारमाददते बुधाः १२
ततोऽन्ये च यथाकामं दुदुहुः पृथुभाविताम् १३

धोक्ष्ये पूरयिष्यामि ९ भूतानामभीप्सितमन्नं ऊर्जस्वत् बलप्रदं १० अपर्तावपि वर्षर्तो यथाभिघ सर्वत्रोवर्त्तते
११ प्रसंगादर्थांतरमाह यथेति यथा पृथुः एवं सर्वत्र वाक्ये परे सारमाददते १२ ततोऽन्ये च ऋष्यादयः पंचदश दुदुहुः पृथुना भाविताँ वशीकृता १३

तस्मादीश्वरचेष्टितं दुर्ज्ञेयमिति किं मृत्यन्यायेनोपसंहरति नूनमिति तस्येश्वरस्य गुणसर्गरूपया मायया मोहितं चित्त
मेव वर्त्म येषामिति वा तैर्जनैः ईश्वराणां हरिभक्तानामेव तावदीहितं न ज्ञायते किंपुनस्तस्य परमेश्वरस्य च अतः परमेश्व
राएव तेभ्योपि नमः एवं केवलं वीराणां जितेंद्रियाणां यशः कुर्वंति ये तेभ्यः यथा वीराणां यशो वदन्ति तथा चेष्टितानन्तु यथे
ष्टमिति भावः ॥३६॥ इति चतुर्थे स प्रद था० ॥१७॥ अष्टादशे महीवाक्याद्वत्सपात्रादिभेदतः पृथ्वादिभिस्तु क्रमशः सा

नूनं जनैरीहितमीश्वराणामस्मद्विधैस्तद्गुणसर्गमायया ॥ न ज्ञायते मोहितचित्तवर्त्मभिस्तेभ्यो नमो वीरयश
भ्यः २ स्करेभ्यः ॥३६॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे पृथुचरित्रे सप्तदशोध्यायः ॥१७॥ श्रीमैत्रेय उवाच ॥ इत्थं
नि ३ पृथुमभिष्टूय रुषा प्रस्फुरिताधरं पुनराहावनिर्भीता संस्तभ्यात्मानमात्मना १ संनियच्छाभिभो मन्युं निबोध श्रावि
तं च मे सर्वतः सारमादत्ते यथा मधुकरो बुधः २ अस्मिंल्लोके थवामुष्मिन्मुनिभिस्तत्त्वदर्शिभिः दृष्टा योगाः २
प्रयुक्ताश्च पुंसां श्रेयः प्रसिद्धये ३ तानातिष्ठति यः सम्यगुपायान्पूर्वदर्शितान् अवरः श्रद्धयोपेत उपायान्वि
न्दते ञ्जसा ४

चतुर्धा क्षितीरितं हे अभिभो प्रभो यद्वा भो देव अभिभयं यथा भवत्येवं मन्युं संयच्छ
श्रावितं विज्ञापितं न मद्वाक्येनादरः कर्तव्य इत्याह बुधो हि सर्वतः सारमादत्ते २ मयि जीर्णा ओषधीरुपाये एव यद्य
पेति वक्तुं उपायेन सर्वं सिध्यति नान्यथेत्याह अस्मिन्निति त्रिभिः पुंसां श्रेयसः पुरुषार्थस्य प्रसिद्धये अस्मिंल्लोके कृष्या
दयः अमुष्मिंश्च लोके अनीहोत्रादयो योगा उपाया दृष्टाः प्रयुक्ताः अनुष्ठिताश्च ३ पूर्वैर्दर्शितान् अवरोर्वाचीनः ४

भा० च० यवसं तृणं गोवृषं रुद्रवाहं वृषभं मृगेंद्रेणेत्युत्तरेणान्वयः २३ क्रव्यं मांसं चरं कीटादि अचरं फलादि २४ २५ अ
६१ नुक्तसंग्रहार्थमाह सर्वे इति सजातीयो मुख्यः तेन वत्सेन २६ उपसंहरति एवमिति स्वतंत्रमभीष्टमन्नं तमेव
क्षीरभेदं दुदुहुः दोहपात्रं २७ इमां पृथ्वीं २८ धनुषाऽग्रेण गिरिशृंगाणि चूर्णयन् राजा २९ ग्रामाद्यादिस्वन्याः

पशवो यवसं क्षीरं वत्सं कृत्वा च गोवृषं अरण्यपात्रे चद्दुधन्मृगेंद्रेण च दंष्ट्रिणः २३ क्रव्यादः प्राणिनः क्रव्यं दुदुहुः स्वे कलेवरे सुपर्णवत्सा विहगाश्चरं चाचरमेव च २४ वटवत्सा वनस्पतयः पृथग्रसमयं पयः गिरयो हिमवद्वत्सा नानाधातून्स्वसानुषु २५ सर्वे स्वमुख्यवत्सेन स्वे स्वे पात्रे पृथक्पयः सर्वकामदुघां पृथ्वीं दुदुहुः पृथुभाविता २६ एवं पृथ्वादयः पृथ्वीमन्नादाः स्वन्नमात्मनः दोहवत्सादिभेदेन क्षीरभेदं कुरूद्वह २७ ततो महीपतिः प्रीतः सर्वकामदुघां पृथुः दुहितृत्वे चकारेमां प्रेम्णा दुहितृवत्सलः २८ चूर्णयन्स्वधनुष्कोट्या गिरिकूटानि राजराट् भूमंडलमिदं वैण्यः प्रायश्चक्रे समं विभुः २९ अथास्मिन्भगवान्वैण्यः प्रजानां वृत्तिदः पिता निवासान्कल्पयांचक्रे तत्र तत्र यथाऽर्हतः ग्रामान्पुरः पत्तनानि दुर्गाणि विविधानि च घोषान्व्रजान्सशिबिरानाकरान्खेटखर्वटान् ३०

पुरोऽट्टादिमत्यः ता एव महत्यः पत्तनानि दुर्गाणि विविधानि यथाह बृहस्पतिः औदकं पा
र्वतं वार्क्षमैरिणं धान्वनं तथेति घोषान् आभीराणां निवासान् व्रजान् गवां निवासान् शिबिरं सेनानिवासस्थानं तत्सहि
तान् आकरान् स्वर्णादिस्थानानि खेटाः कर्षकग्रामाः खर्वटाः पर्वतप्रांतग्रामाः तांश्च ३० रामराम रामराम रामराम ६१

देवीं पृथिवीं वाङ्मनश्चवत्सौ वैदूग्रहणादिंद्रियाणांपात्रंत्वं १४ सोमममृतं वीर्य्यंमनःशक्तिरोजंइंद्रियशक्तिबलंदे
हशक्तिचतदेवपयः १५ सुराणांआसवंचतालादिमयं १६ मधुवाक्माधुर्य्यंसौभगंसौंदर्य्यंतत्सहितं १७ कव्यंपि
णामन्नंआमपात्रेअपक्वमृतमये अधुक्षत दुदुहुः १८ संकल्पनामयीं अणिमादिसिद्धिं येविद्याधरादयस्तेचतमे

स्तपयोदुदुहुर्देवीमिंद्रियेष्वथसत्तम वत्संबृहस्पतिंकृत्वापयश्छंदोमयंशुचिः १४ कृत्वावत्संसुरगणा
इंद्रंसोममदुदुहन् हिरण्मयेनपात्रेणवीर्य्यमोजोबलंपयः १५ दैत्यायादानवावत्सं प्रह्लादमसुरर्ष
भं विधायादूदुहन्क्षीरमयःपात्रेसुरासवं १६ गंधर्वाप्सरसोधुक्षन्पात्रेपद्ममयेपयः वत्संविश्वावसुंकृत्वा
गंधंमधुससौभगं १७ वत्सेनपितरोऽर्य्यम्णाकव्यंक्षीरमधुक्षत आमपात्रेमहाभागाःश्रद्धयाश्राद्धदेवताः
१८ प्रकल्प्यवत्संकपिलंसिद्धाःसंकल्पनामयीं सिद्धिंनभसिविद्यांचयेचविद्याधरादयः १९ अन्येचमायि
नोमायामंतर्धानाद्भुतात्मनां मयंप्रकल्प्यवत्संतेदुदुहुर्धारणामयीं २० यक्षरक्षांसिभूतानिपिशाचाःपि
शिताशनाः भूतेशवत्सादुदुहुः कपालेक्षतजासवम् २१ तथाहयोदंदशूकाःसर्पानागाश्चतक्षकं विधाय
पात्रंदुदुहुर्बिलपात्रेविषंपयः २२

वत्सं प्रकल्प्यनभस्येवपात्रेखेचरत्वादिरूपांविद्यांदुदुहुः १९ अन्येवकिंपुरुषादयः अंतर्धानेनाद्भुतात्मनां संबंधिनीमायां
धारणामयींसंकल्पमात्रप्रभवां २० भूतेशोरुद्रः सएववत्सोयेषांक्षतजंरुधिरंतदेवासवं २१ अहयोनिष्फणाः दंदशूकाद

यः सर्पाः सफणास्तएव कद्रुसंततिज्ञा नागाः विलपात्रेमु
खे २२

भा० चं०
६२

ऊहुर्वहंतिस्मसर्वरसान् इक्षुद्राक्षादिरसान् क्षीरंच दधिच अन्नंचपानकादिगोरसघृतंतक्रंच तांश्च भूरीणिवर्ष्मा
णिवर्ष्माणिशरीराणियेषांते फलादिप्रासूयंत मधुच्युतः मधुस्राविणःसंतः ६ चतुर्विधंभक्ष्यंभोज्यंचोष्यंलेह्यंच ७
अधोक्षजः ईशोनाथोयस्य परमउदयोभिवृद्धिर्यस्मिन्तत्कर्म असहमानः प्रतिघातंविघ्नंचकारेत्यर्थः ८ यजमाने

ऊहुःसर्वरसान्नद्यःक्षीरदध्यन्नगोरसान् तरवोभूरिवर्ष्माणःप्रासूयंतिमधुच्युतः ६ सिंधवोरत्ननिकरान्गिर
योन्नंचतुर्विधं उपायनमुपाजह्रुःसर्वेलोकाःसपालकाः ७ इतिचाधोक्षजेशस्यपृथोस्तुपरमोदयं ॥
असूयन्भगवानिंद्रःप्रतिघातमचीकरत् ८ चरमेणाश्वमेधेनयजमानेयजुष्पतिं वैण्येयज्ञपशुंस्पर्द्ध
न्नपोवाहतिरोहितः ९ तमत्रिर्भगवानैक्षत्त्वरमाणंविहायसा आमुक्तमिवपाषंडंयोधर्मेधर्मविभ्रमः
१० अत्रिणाचोदितोहंतुंपृथुपुत्रोमहारथः अन्वधावतसंक्रुद्धस्तिष्ठतिष्ठेतिचाब्रवीत् ११ तंतादृशाकृतिं
वीक्ष्यमेनेधर्मंशरीरिणं जटिलंभस्मनाछन्नंतस्मैबाणंनमुंचति १२ वधान्निवृत्तंतंभूयोहंतवेत्रिरचोद
यत् जहियज्ञहनंतातमहेंद्रंविबुधाधमं १३ एवंवैण्यसुतःप्रोक्तस्त्वरमाणंविहायसा अन्वद्रवदभिक्रुद्धो
रावणंगृध्रराडिव १४

वैण्ये यजुष्पतिंविष्णुं यजमाने सति स्पर्द्धमान इंद्रस्तिरोहितःसन्नपहृतवान् ९
त्वरमाणंधावंतं आमुक्तःप्रतिमुक्तश्च पिनद्धश्चापिनद्धवत् सन्नद्धोवर्मितःसज्ज इत्यमरः पाषंडवेषंकवचमिवगृहीत
वंतमित्यर्थः अधर्मेधर्मविभ्रमः धर्मोयमितिकरोय तं १० ११ नमुंचतिस्म १२ हंतवेहंतुं यज्ञहनंयज्ञहतवं ६२

इति चतुर्थे टीकायामष्टादशः ॥ १८ ॥ ऊनविंशे श्वमेधांगहयापहरणात्पृथोः इंद्रं हंतुं प्रवृत्तस्य धात्रा वारणमुच्यते हयमेधशतेन निर्मितेन दीक्षितोऽभूत् शताश्वमेधसंकल्पमकरोदित्यर्थः ब्रह्मावर्त्ते सरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरं तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते १ आत्मनः स्वस्य कर्मातिशयत्वं इति संज्ञायं अभिप्रेत्य ज्ञात्वा तदिति तत्पृथोर्यज्ञमहोत्सवं नम

प्राक्पृथोरिह नैवैषा पुरग्रामादिकल्पना यथासुखं वसंति स्म तत्र तत्राकुतोभयाः ३१ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे पृथ्वीदोहनं अष्टादशोऽध्यायः ॥ १८ ॥ श्रीमैत्रेय उवाच ॥ अथादीक्षत राजा तु हयमेधशतेन सः ब्रह्मावर्त्ते मनोः क्षेत्रे यत्र प्राची सरस्वती १ तदभिप्रेत्य भगवान्कर्मातिशयमात्मनः शतक्रतुर्न ममर्षे पृथोर्यज्ञमहोत्सवम् २ यत्र यज्ञपतिः साक्षाद्भगवान्हरिरीश्वरः अन्वभूयत सर्वात्मा सर्वलोकगुरुः प्रभुः अन्वितो ब्रह्मशर्वाभ्यां लोकपालैः सहानुगैः उपगीयमानो गंधर्वैर्मुनिभिश्चाप्सरोगणैः ३ सिद्धविद्याधरा दैत्या दानवा गुह्यकादयः सुनंदनंदप्रमुखाः पार्षदप्रवरा हरेः कपिलो नारदो दत्तो योगेशाः सनकादयः तमन्वीयुर्भागवता ये च तत्सेवनोत्सुकाः ४ यत्र धर्मदुघा भूमिः सर्वकामदुघा सती दोग्धि स्माभीप्सितानर्थान्यजमानस्य भारत ५

मर्षे न सेहे २ अतिशयमेव दर्शयति यत्रेति त्रिभिः साक्षादन्वभूयत प्रत्यक्षेणादृश्यत ३ सिद्धादयश्च तं हरिमन्वीयुरित्युत्तरेणान्वयः ४ धर्मदुघा हविर्दोग्ध्री धेनुः सती ५ रामरामरामराम ॥ ६ ॥ रामरामराम

भा०च०४ ६२

२३

शक्रवधेऽभिसंधितं कृताभिप्रायं प्रचोदितात् यज्ञे वधादन्यस्य वधस्तेन युज्यते २४ तद्वधं तु वयं करिष्याम इत्याहुः व
यमिह अर्थनाशकं त्वत्कीर्त्या हततेजसं मरुत्वंतमिंद्रमाह्वयामहे कैः अयातयामैरगतवीर्यैराह्वानमंत्रैः अनंतरं च
तवाहितं जुहुयाम होष्यामः २५ अस्य पृथोः स्रुक्हस्ते येषां तान् २६ यमिंद्रं यज्ञेन जिघांसथ यज्ञेनेष्टाः सुरायाः

तदभिज्ञाय भगवान् पृथुः पृथुपराक्रमः इंद्राय कुपितो बाणमादत्तोद्यतकार्मुकः २३ तमृत्विजः शक्रवधाभि
संधितं विचक्ष्य दुःप्रेक्ष्यमसह्यरंहसं निवारयामासुरहो महामते न युज्यतेऽत्रान्यवधः प्रचोदितात् २४ वयं
मरुत्वंतमिहार्थनाशनं ह्वयामहे त्वच्छ्रवसा हतत्विषं अयातयामोपहवैरनंतरं प्रसह्य राजन् जुहवाम
तेऽहितं २५ इत्यामंत्र्य क्रतुपतिं विदुरास्यर्त्विजो रुषा स्रुक्हस्तान् जुह्वतोऽभ्येत्य स्वयंभूः प्रत्यषेधत २६
न वध्यो भवतामिंद्रो यद्यज्ञो भगवत्तनुः यं जिघांसथ यज्ञेन यस्येष्टास्तनवः सुराः २७ तदिदं पश्यत मह
द्धर्मव्यतिकरं द्विजाः इंद्रेणानुष्ठितं राज्ञः कर्मैतद्विजिघांसता २८ पृथुकीर्तेः पृथोर्भूयात्तर्ह्येकोनशतक्रतुः
अलं ते क्रतुभिः स्विष्टैर्यद्भवान्मोक्षधर्मवित् २९

स्यतनवः स इंद्रो भवता वधार्हो न भवति यद्यस्माद्यज्ञो नामायमिं
द्रो भगवतस्तनुरवतारः तत्तत्स्वप्रमस्याकूत्यां रुचेर्यज्ञोऽवतारोऽभ्यजायत स यामाद्यैः सुरगणैरपात्स्वायंभुवांतरमित्युक्तत्वात्
२७ अतो बलीयसाऽनेन सख्यमेव कर्तव्यमिति अन्यथा भूयः पाषंडं स्रक्ष्यतीत्याशयेनाह तदिदमिंद्रेणानुष्ठितं महदन्याय्यं प
श्यत किमित्यपेक्षायामाह धर्मस्य व्यतिकरं विपर्ययं पाषंडपथं २८ तर्हि किमत्र युक्तं इत्यत आह पृथुकीर्तेरिति एकेनोनं
शतं यस्मिन् तादृशः क्रतुप्रयोगः पृथोर्भूयात् पृथुरिति पाठे एकोनशतं क्रतवो यस्य तादृशोऽपि महेंद्रात्पृथुकीर्तिर्भूयात्

इत्यर्थः एवमृत्विजः प्रत्युः पृथुं प्रत्याह अलमिति २९

६२

तस्मैहित्वात्तद्रूपमुत्सृज्य १५ विचक्ष्य दृष्ट्वा १६ उपसृज्य सृष्ट्वा तेन छन्नः सन् चषालो यूपाग्रे निक्षिप्तः काष्ठकंटकः त
च्छुक्तात् यूपात् हिरण्यनिर्मिता रसना यस्य तं रसनायाः दृढत्वेन छेदाशक्त्या सह नासहितमेवोद्धृत्य यूपाग्रान्नीतवानित्यर्थः १७

सोऽश्वं रूपं च तद्धित्वा तस्थावंतर्हितः स्वराट् वीरः स्वपशुमादाय पितुर्यज्ञमुपेयिवान् १५ तत्तस्य चाद्भुतं कर्म विच
क्ष्य परमर्षयः नामधेयं ददुस्तस्मै विजिताश्व इति प्रभो १६ उपसृज्य तमस्तीव्रं जहाराश्वं पुनर्हरिः चषाल
यूपतश्छन्नो हिरण्यरसनं विभुः १७ अत्रिः संदर्शयामास त्वरमाणं विहायसा कपालखट्वांगधरं वीरो नैनमबाध
त १८ अत्रिणा चोदितस्तस्मै संदधे विशिखं रुषा सोऽश्वं रूपं च तद्धित्वा तस्थावंतर्हितः स्वराट् १९ वी
रश्चाश्वमुपादाय पितृयज्ञमथाव्रजत् तदवद्यं हरे रूपं जगृहुर्ज्ञानदुर्बलाः २० यानि रूपाणि जगृहे इं
द्रो हयजिहीर्षया तानि पापस्य खंडानि लिंगं खंडमिहोच्यते २१ एवमिंद्रे हरत्यश्वं वैण्ययज्ञजिघांसया॥
तद्गृहीतविसृष्टेषु पाखंडेषु मतिर्नृणां धर्म इत्युपधर्मेषु नग्नरक्तपटादिषु प्रायेण सज्जते भ्रांत्या पेश
लेषु च वाग्मिषु २२

१८ १९ अवद्यं निंदितं रूपं मंदप्रज्ञा जगृहुः २० तदेव पाखंडानामाविरुक्त्या दर्शयति यानीति वक्तुर्वचनेन चोन्यान्य
पि गृहीतानीत्युक्तं २१ तत्र भ्रांतिः पाखंडमार्गप्रवृत्तिरित्याह एवमिति तेन गृहीतेषु पुनर्विसृष्टेषु नग्ना जैना रक्तपटा बौद्धाः
आदिशब्देन कापालिकादयः तेषु उपधर्मेषु धर्माभासेषु अधर्म एवायमिति सज्जत इति द्वयोरन्वयः पेशलेषु आपातनो

तथा कृत्वा यज्ञाग्रहं हित्वा वात्सल्यं स्नेहं च कृत्वा इंद्रेण सह संधानं च कृतवान् ३६ कृतमवभृथस्नानं येन तस्मै ३७ ३८ मु
ख्यानां वाक्यत्वेयेति ३९ ॥ इति चतुर्थे एकोनविंशाध्याये ॥ विंशे तु विष्णुना साक्षात् पृथोर्यज्ञेनुशासनं ॥ वरदानप्रसंगेन प्रीतिश्चान्या

श्रीमैत्रेय उवाच ॥ इत्थं स लोकगुरुणा समादिष्टो विशांपतिः तथा च कृत्वा वात्सल्यं मघोनापि च संदधे ३६ कृताव
भृथस्नानाय पृथवे भूरिकर्मणे वरान्ददुस्ते वरदा ये तद्बर्हिषि तर्पिताः ३७ विप्राः सत्याशिषस्तुष्टाः श्रद्धया लब्ध
दक्षिणाः आशिषो युयुजुः क्षत्तरादिराजाय सत्कृताः ३८ त्वयाहूता महाबाहो सर्व एव समागताः पूजिता दानमाना
भ्यां पितृदेवर्षिमानवाः ३९ ॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे एकोनविंशोध्यायः ॥ १९ ॥ मैत्रेय उवाच ॥
भगवानपि वैकुंठः साकं मघवता विभुः यज्ञैर्यज्ञपतिस्तुष्टो यज्ञभुक्तमभाषत १ ॥ श्रीभगवानुवाच ॥ एष तेकार
षीद्भंगं हयमेधशतस्य ह क्षमापयत आत्मानममुष्य क्षंतुमर्हसि २ सुधियः साधवो लोके नरदेव नरोत्तमाः ना
भिद्रुह्यंति भूतेभ्यो यर्हि नात्मा कलेवरं ३ पुरुषा यदि मुह्यंति त्वादृशा देवमायया श्रम एव परं जातो दीर्घया वृद्ध
सेवया ४ अतः कायमिमं विद्वानविद्याकामकर्मभिः आरब्ध इति नैवास्मिन्प्रतिबुद्धोनुषज्जते ५ असंसक्तः शरीरे

न्यमीर्यते मघवता साकं इंद्रेण सह वर्त्तमानः १ आत्मानं त्वां क्षमां कारयतोऽमुष्य २ यर्हि यस्मात्कलेवरमात्मा न भ
वति अतस्तदभिमानेन भूतानि नाभिद्रुह्यंति ३। ४ अविद्यास्वरूपाज्ज्ञानं ततः कामं ततः कर्म तैरारब्ध इति विद्वान् अत
एव प्रतिबुद्धः [illegible] आत्मज्ञः अस्मिन्नेवानुषज्जते न यापि पुत्रादिममत्वेन भूतद्रोहेण च संगो भवेत्तत्राह असंसक्त इति ६

आत्मनैव आत्मने महेंद्राय रोषं कर्तुं नार्हसि इति तत्र हेतुः उभावपीति ३० तथापि क्रतुसमाप्तिप्रतिध्यायंतं प्रत्याह ।
अस्मिन् यज्ञविघ्नचिंतां मा स्म कृथाः यद्यस्मादेव तत्र कार्यं कर्तुं ध्यायतो मनः नुनिश्चितरुष्टं सत् अंधतमो मोहं विश
तन्न तु शांतिं लभते ३१ अत एव तत्क्रतुर्विरमतु नन्विंद्रः किं न निवार्यते अत आह यतो देवेषु दुराग्रहो भवतीति यत्र क्र

नैवात्मने महेंद्राय रोषमाहर्तुमर्हसि उभावपि हि भद्रं ते उत्तमश्लोकविग्रहौ ३० मास्मिन्महाराज कृथाः स्म
चिंतां निशामयास्मद्वच आदृतात्मा यद्ध्यायतो देवहतं नु कर्तुं मनो निरुष्टं विशते तमोऽधं ३१ क्रतुर्विरमतामेष
देवेषु दुरवग्रहः धर्मव्यतिकरो यत्र पाषंडैरिंद्रनिर्मितैः ३२ एभिरिंद्रोपसंसृष्टैः पाषंडैर्हारिभिर्जनम् ह्रियमाणं वि
चक्ष्वैनं यस्ते यज्ञध्रुगश्वमुट् ३३ भवान् परित्रातुमिहावतीर्णो धर्मं जनानां समयानुरूपं वेनापचारादवलुप्तम
द्य तद्देहतो विष्णुकलासि वैन्यः ३४ स त्वं विमृश्यास्य भवं प्रजापते संकल्पनं विश्वसृजां पिपीपृहि ऐंद्रीं च
मायामुपधर्ममातरं प्रचंडपाषंडपथं प्रभो जहि ३५ नो ३२ इंद्रदुराग्रहं कर्तुमनर्थप्रयेत्याह एभिरिंद्रेण प्रसृष्टैरधि
ष्ठितैः हरिभिश्चित्ताकर्षकैः यदिंद्रस्ते अश्वं मुष्णातीति तथा यज्ञाय द्रुह्यतीति तथा तेन सृष्टैः ३३ ततो मम किमिति चेत्तत्राह भ
वानिति द्वाभ्यां सांख्ययोगादिनानासिद्धांतरूपं धर्मं जनानां स्यात् पापोल्लुप्तं परित्रातुं तद्देहाद्विष्णोः कलेव त्वमवतीर्णोसि ३४ अ
स्य विश्वस्याऽद्भवं विचार्य वैहत्यादितोऽसि तेषां विश्वसृजां संकल्पं पिपीपृहि आर्षप्रयोगः पूरयेत्यर्थः प्रचंडो यः पाषंडमार्गः

भा० च० त्वंचसूरिः अतःसुखदुःखेचसमःसन् समानाउत्तममध्यमाधमायस्यजितानींद्रियाण्यासायश्चयेनसत्त्वं अखिललोकर
६५ क्षणंविधत्स्वकथमेकेनमयाकर्तुंशक्यंतत्राह मयेश्वरेणोपक्लृप्ताःसंपादिताःअखिललोकाअमात्यादयःतैःसंयु
तः १३ ननुरक्षणंदंडादिक्ष्मादिपंचअतस्तपोन्यद्वापुण्यंकरिष्यामीतिचेदतआह श्रेयइति यद्यस्मात्सांपरायेप
रलोकेप्रजाभिःकृतात्षष्ठमंशंहर्त्तीहरति अरक्षणेदोषमाह अन्यथाप्रजाभिर्हृतंपुण्यंयस्यसःप्रजानामघमत्ति

समःसमानोत्तममध्यमाधमःसुखेचदुःखेचजितेंद्रियाशयः मयोपक्लृप्ताखिललोकसंयुतोविधत्स्व
वीराखिललोकरक्षणं १३ श्रेयःप्रजापालनमेवराज्ञोयत्सांपरायेसुकृताद्धृष्ठमंशं हर्त्तान्यथाहृतपुण्यः
प्रजानामरक्षिताकरहारोघमत्ति १४ एवंद्विजाग्र्यानुमतानुवृत्तधर्मप्रधानोन्यतमोवितास्याः इत्येनका
लेनगृहोपयातान्द्रक्ष्यसिसिद्धाननुरक्तलोकः १५ वरंचमत्कंचनमानवेंद्रवृणीष्वतेहंगुणशीलयंत्रितः
नाहंमखैर्वैसुलभस्तपोभिर्योगेनवासमचित्तवर्ती १६ पापंभुंक्ते अन्यथेत्यस्यविवरणंकरहारः संरक्षिताचेत् धर्म
यत१ एवंचमोक्षोप्यनायासेनभविष्यतीत्याह द्विजाग्र्याणामनुमतश्चासावनुवृत्तश्चपरंपराप्राप्तोयोधर्मःसएवप्र
धानअर्थकामोप्रासंगिकोअन्यतमःअतिशयेनान्यःधर्मादिष्वनासक्तइत्यर्थः एकपद्यपाठेधर्मप्रधानोवन्यतमोअर्थ
कामोयस्येत्यर्थः अस्याःपृथिव्याःअवितासन् अल्पेनकालेनगृहागतान्सनकादीन्द्रक्ष्यसि अनुरक्तोलोकोयस्मिन्
स१ सः १५ मत्तोमत्तःसकाशात्किंचिद्वरंवृणीष्व गुणोमादयःशीलंनिर्मत्सरादिभावः नैरहंयंत्रितोवशीकृतः तद्रहितैस्तुम
त्वो१

प्रतिबोधकक्रमं विवृण्वन् देहेनुषंगाभावमाह एकइति द्वाभ्यां असावात्मा आत्मनो देहात्परो भिन्नः तत्र नवधा वैलक्षण्यं
नभेदं साधयति एक इति नवभिः पदैः देहोहि बालयुवादिभेदादनेकः मलिनश्च जडश्च सगुणश्च स्वकारणाभृतगुणा
श्रितश्च परिछिन्नश्च गृहादिभिरावृतश्च दृश्यश्च सात्माचे आत्मातुनैवं अतो भिन्नः ७ आत्मस्य देहस्थ स्वस्मिन् स्थितं
प्रकृतिस्थोपितद्विकारैर्न लिप्यते समयिब्रह्मणि स्थितः ८ इयमवस्थाकस्यात्स्यादित्यपेक्षायामाह यःस्वधर्मेणेति

एकः शुद्धः स्वयंज्योतिर्निर्गुणोसौ गुणाश्रयः सर्वगोऽनावृतः साक्षीनित्यात्मात्मात्मनः परः ७ यएवं संतमात्मा
नमात्मस्थं वेद पूरुषः नाज्यते प्रकृतिस्थोपि तद्गुणैः समयिस्थितः ८ यःस्वधर्मेण मां नित्यं निराशीः श्रद्धयान्वि
तः भजते शनकैस्तस्य मनो राजन्प्रसीदति ९ परित्यक्तगुणः सम्यकूदर्शनो विशदाशयः शांतिं मे समवस्था
नं ब्रह्मकैवल्यमश्नुते १० उदासीनमिवाध्यक्षं द्रव्यज्ञानक्रियात्मनां कूटस्थमिममात्मानं योवेदाप्नोति शोभनं
११ भिन्नस्य लिंगस्य गुणप्रवाहो द्रव्यक्रियाकारकचेतनात्मनः दृष्टासु संपत्सु विपत्सु सूरयो नैवक्रियंते मयि
बद्धसौहृदाः १२

चतुर्भिः ९ यहि विशदाशयः प्रसन्नमनाः तदा परित्यक्तगुणः सम्यग्दर्शनो भूत्वा शांतिमश्नुते
शांतिमेवाह ममसम्यगौदासीने नावस्थानमेवब्रह्म तदेव कैवल्यमश्नुते १० सम्यग्दर्शनमेवाह उदासीनमेवात्मानं
द्रव्यज्ञानक्रियात्मनां देहज्ञानकर्मेंद्रियमनसामध्यक्षमिवस्थितमात्मानं योवेद ११ संसारिणं कथं कूटस्थत्वमतआह
भिन्नस्य लिंगदेहस्य गुणप्रवाहः संसारः भिन्नत्वेहेतुः द्रव्याद्यात्मकस्य तत्र चेतनाचिदाभासः अतो दृष्टासु हर्षशोकादि

स१

भा० च० वरं वृणीष्वेति यदुक्तं तत्राह नमान्श्वाह हे विभो वरदानां ब्रह्मादीनामीश्वरात् वरप्रदात् त्वत्तः सकाशाद्बुधः कथं वरा

६६ न् वृणीते कीदृशान् गुणे विक्रिया यत इति गुणविक्रियोऽहंकारः स एवात्मा येषां तेषां ब्रह्मादीनां संबंधिनः देहाभिमा

निनां भोग्यानि तानि वा तथाचेद्बुध एवं न भवतीत्यर्थः जुगुप्सितत्वादपीत्याह यइति बुध एवाहमपि न वृणे इति समु

च्चयाय कारः २२ कैवल्यपते इति संबोधनात् कैवल्यं वरिष्यतीति माशंकीत्याह नेति महत्तमानामंतः हृदयान्मुखद्वा

रेण निर्गतो भगवत्पदांभोजमकरंदो यशःश्रवणादिसुखं यत्र नास्ति तादृशं चेत्कैवल्यं तर्हि तत् क्वचित् कदाचिदपि न

पृथुरुवाच ॥ वरान्विभो त्वद्वरदेश्वराद्बुधः कथं वृणीते गुणविक्रियात्मनां येनारकाणामपि संति देहि

नां तानीश कैवल्यपते वृणे न च २२ न कामये नाथ तदप्यहं क्वचित् न यत्र युष्मच्चरणांबुजासवः महत्त

मांतर्हृदयान्मुखच्युतो विधत्स्व कर्णायुतमेष मे वरः २३ स उत्तमश्लोक महन्मुखच्युतो भवत्पदांभोज

त१ सुधाकणानिलः स्मृतिं पुनर्विस्मृततत्त्ववर्त्मनां कुयोगिनां नो वितरत्यलं वरैः २४

कामयेतर्हि किं कामयसे तत्राह यशःश्रवणाय कर्णायुतं विधत्स्व ननु कोपि एवं न वृणीतवान् किमप्यन्यं चिं

तयेत्याह एष मे वरः मम त्वेष एव वर इति २३ ननु तर्हि कैवल्याभावे रागद्वेषाद्याकुलानां भक्तिसुखमपि न स्यादित्या

शंक्याह इति भगवत्पदांबुजसुधायाः कणो लेशः तत्संबंधी योऽनिलः स एव दूराद्यपि किंचिद्यशःश्रवणमात्रमित्य

र्थः विस्मृतं तत्त्ववर्त्म यैः कुयोगिभिः तेषामपि पुनः स्मृतिं आत्मज्ञानं वितरति ततो न खलु भक्तानां रागादिसंभवः अतो ना

साकं सारग्राहित्वं त्वन्यैर्वैरिरलं भक्तावेव मोक्षादिसर्व सुखांतर्भावादिति भावः २४ ॥ ६६

१७ तमापयितुं पादयोः स्पृशंतं स्वेन कर्मणा पापहरेण व्रीडितं प्रेम्णा परिषज्य १८ भगवान् प्रस्थानाभिमुखोऽप्यनुग्रह
लोभविलंबितः सन्नप्रतस्थे प्रयाणं न कृतवान् इति द्वयोरन्वयः कथंभूतः उपहृतं अर्पितमर्हणं यस्मै स समुज्जिहानया
समुद्गछत्या वर्द्धमानया भक्त्या गृहीतं चरणांबुजं यस्य पद्मपलाशवद्दृशौ यस्य तथाभूतः सन्नैव पृथुं पश्यन् १९

मैत्रेय उवाच ॥ स इत्थं लोकगुरुणा विष्वक्सेनेन विश्वजित् अनुशासित आदेशं शिरसा जगृहे हरेः १७ स्पृशं
तं पादयोः प्रेम्णा व्रीडितं स्वेन कर्मणा शतक्रतुं परिषज्य विद्वेषं विससर्ज ह १८ भगवानथ विश्वात्मा पृथु
नोपहृतार्हणः ॥ समुज्जिहानया भक्त्या गृहीतचरणांबुजः प्रस्थानाभिमुखोऽप्येनमनुग्रहविलंबितः पश्यन्
पद्मपलाशाक्षो न प्रतस्थे सुहृत्सतां ॥ १९ स आदिराजो रचितांजलिर्हरिं विलोकितुं नाशकदश्रुलोचनः ॥
न किंचनोवाच स बाष्पविक्लवो हृदोपगुह्यामुमधाद् अवस्थितः २० अथावमृज्याश्रुकलावलोकयन्नतृप्तदृ
ग्गोचरमाह पूरुषं पदा स्पृशंतं क्षितिमंस उन्नते विन्यस्तहस्ताग्रमुरंगविद्विषः २१

भगवतस्तत्कृपातिरेकमुक्त्वा तस्य भक्त्युद्रेकमाह स इति द्वाभ्यां बाष्पविक्लवत्वेन तूष्णीं स्थितः सन्नमुं हरिं हृदोप
गुह्याधात् धृतवान् २० अतृप्तयोर्दृशोर्गोचरं विषयभूतं पदा क्षितिं स्पृशंतमित्ययं भावः न खलु देवाः पदा भु
वं स्पृशंति अतः कृपापरवशो नूनं हरिरात्मानं विस्मृतवानिवेत्यतः एव स्खलनपरिहारायैव गरुडस्योन्नते स्कंधे
विन्यस्तहस्ताग्रं येन तं २१

भा० च० ६७

यतस्त्वं दीनवत्सलः अतएव साधवो निष्कामाः अथ ज्ञानानंतरमपि त्वां भजंति कथंभूतं मायागुणानां विभ्र।
मोविलासस्तस्योदयः कार्यं स निरस्तो यस्मिन् तं ते किमर्थं भजंतीति तत्राह भवत्पदानुस्मरणाद्विना अन्यत्ते
षां निमित्तं फलं विद्मः २८ वरैः प्रलोभनं च कृपालोस्तवानुचितमित्याशयेनाह मन्य इति नु अहो ते वाचा त

भजंत्यथ त्वामत एव साधवो व्युदस्तमायागुणविभ्रमोदयं भवत्पदानुस्मरणादृते सतां निमित्तम
न्यद्भगवन्न विद्महे २८ मन्ये गिरं ते जगतां विमोहिनीं वरं वृणीष्वेति भजंतमात्थ यत् वाचानुतंत्या
यदि ते जनोऽसितः कथं पुनः कर्म करोति मोहितः २९ त्वन्माययाद्धा जन ईश खंडितो यदन्यदासास्त
ऋतात्मनो बुधः यथारिद्वालहितं पिता स्वयं तथा त्वमेवार्हसि नः समीहितुं ॥३०॥ श्रीमैत्रेय उवाच ॥ इ
त्यादिराजेन नुतः स विश्वदृक् तमाह राजन्मयि भक्तिरस्तु ते दिष्ट्येदृशी धीर्मयि ते कृता यया मायां
मदीयां तरति स दुस्त्यजां ३१ तत्त्वं कुरु मयादिष्टमप्रमत्तः प्रजापते मदादेशकरो लोकः सर्वत्राप्नोति शोभ
नम् ३२

त्या यदि जनोऽयं असितः अबद्धः स्यात् तर्हि पुनः पुनः फलैर्मोहितः सन् कथं कर्म करोति २९
त्वन्माययाखंडितस्य त्वया पुनः खंडनं न कर्त्तव्यं किंतु हितं चेष्टितव्यमित्याह त्वन्माययाद्धातोदात्मानः चेतः खं
डितः पृथक्कृतः यदन्यत् स्वर्गादिकमाशास्त अतः स्वयं अविज्ञापित एव हितं चेष्टितुमर्हसि ३० ३१ ३२

६७

ननुभुक्तिमुक्तिफलेवंश्रुतःफलंविहायसाधनेभवतःकोयमाग्रहइत्याशंक्याह हेसुश्रवमंगलकीर्तेतेशि वंयशःस
कृदपिउपशृणोति यदृच्छयापिगुणज्ञस्त्वेतःपशुंविनाअन्यःकथंविरमेत् गुणज्ञतिशायंसूचयति श्रीर्यद्यशएवप्रव
व्रेवृतवती गुणानांसर्वपुरुषार्थानांसंग्रहस्तस्मिन्समाहारस्तादिच्छया २५ अतोलक्ष्मीरित्यात्यागेनत्वामेवाहंभ
जेइत्याह अथेतिलालसउत्सुकःसन् कर्मणिक्रियमाणेयथेद्रेणसहकलिः एवंभक्तावपिकिंलक्ष्म्यासह

यशःशिवंसुश्रवआर्यसंगमेयदृच्छयाचोपशृणोतितेसकृत् कथंगुणज्ञोविरमेद्विनापशुंश्रीर्य
त्प्रवव्रेगुणसंग्रहेच्छया २५ अथाभजेत्वाखिलपूरुषोत्तमंगुणालयंपद्मकरेवलालसः अप्यावयोरे
कपतिस्पृधोःकलिर्नस्यात्कृतत्वच्चरणैकतानयोः २६ जगज्जनन्यांजगदीशवैशसंस्यादेवयत्कर्मणि
नःसमीहितं करोषिफल्ग्वप्युरुदीनवत्सलःस्वएवधिष्ण्याभिरतस्यकिंतया २७

कलिःस्यादितिवितर्कयन्ति एकस्मिन्पत्यौस्पर्द्धमानयोरावयोः अपिकिंकलिर्नस्यादितिकाक्वापितर्कः न
तुपरस्परंसेवयानस्यात् कुतस्त्वच्चरणयोरेवैकस्तानोमनोविस्तारोयाभ्यांतयोः २६ भवतुवाकलिस्त
थापिभजेयमेवाह जगज्जनन्यांवैशसंविरोधःस्यादेव तत्रहेतुःयस्याःकर्मणिनःसमीहितंइच्छाभव
ति तथापीन्द्रविरोधेनतुपक्षपातवदत्रापितवपक्षपातएवस्यादित्याह फल्ग्वल्पमपिउरुबहुकरोषिय
तोदीनेषुवत्सलःस्वेस्वरूपएवतस्यतयाकिंप्रयोजनंतांनाद्रियसइत्यर्थः २७

प्रियान् वरान् प्रददातीति तथा ६ गुणैर्महान् अत एव महत्तमः पुण्यतमः ५ गुणैर्विजृंभितं ऊर्जितं गुणावृद्धिः
सभाजितं सत्कृतं यशो यस्य तथा इति अर्चयन् आह सदस्पते शौनक ६ लब्धान्यशेषसुरेशेण महेशानि येन सः किमकरो दि
तिशेषः ७ अधर्मणो स्तुकर्माविः कुर्वन्नार्थयते को न्विति यस्य विक्रमः पृथ्वीदोहनं तस्योच्छिष्टतुल्यकामं तत्स्य कर्म

पूजितः पूजयामास तत्र तत्र महायशाः पौरान्जानपदांस्तांस्तान्प्रीतः प्रियवरप्रदः ॥६॥ स एवमादीन्यनव
द्यचेष्टितः कर्माणि भूयांसि महान्महत्तमः ॥ कुर्वन् शशासावनिमंडलं यशः स्फीतं निधायारुरुहे परं प
दं ॥५॥ सूत उवाच ॥ तदादिराजस्य यशो विजृंभितं गुणैरशेषैर्गुणवत्सभाजितं ॥ क्षत्ता महाभागवतः स
दस्पते कौषारविं प्राह गृणंतमर्चयन् ॥६॥ विदुर उवाच ॥ सोऽभिषिक्तः पृथुर्विप्रैर्लब्धाशेषसुरार्हणः ॥ बि
भ्रत्स वैष्णवं तेजो बाह्वोर्याभ्यां दुदोह गां ७ को न्वस्य कीर्तिं न शृणोत्यभिज्ञो यद्विक्रमोच्छिष्टमशेषभूपाः
लोकाः सपाला उपजीवंति काममद्यापि तन्मे वद कर्म शुद्धं ॥८॥ मैत्रेय उवाच ॥ गंगायमुनयोर्नद्योरंतरा
क्षेत्रमावसन् आरब्धानेव बुभुजे भोगान् पुण्यजिहासया ९ सर्वत्रास्खलितादेशः सप्तद्वीपैकदंडधृक् अ
न्यत्र ब्राह्मणकुलादन्यत्राच्युतगोत्रतः १० वद ८ प्राचीनकर्मभिः प्रारब्धानेव बुभुजे न तु भोगांतरार्थं कर्माणि

करोति तदपि भोगेन पुण्यक्षपणेच्छया न तु सुखाशयेत्यर्थः ९ अस्खलितः अप्रतिहत आदेश आज्ञा यस्य स
सप्तद्वीपेष्वेक एव दंडं धारयतीति तथा किं सर्वत्र नेत्याह ब्रह्मकुलव्यतिरेकेण अच्युतगोत्रे प्रवर्तकात्तुल्यो येषां वैष्ण

३३ वाग्भिश्चितांजलिभिर्भक्तितः पूजिताः संतः वैकुंठमनुगताः पार्षदाश्च ॥ ३४ ॥ ३५ ॥ अदृष्टायलोचनेनयथामतिक्रांतायसंदर्शि
तआत्मायेनतस्मै ॥ ३६ ॥ इति चतुर्थे विंशोध्या २० ॥ एकविंशेतुपृथुनाप्रजानामनुशासनं महासत्रेसुरादीनांमहासदसिवर्ण्यते
श्रीमैत्रेय उवाच ॥ इतिवैन्यस्यराजर्षेः प्रतिनंद्यार्थवद्वचः पूजितोनुगृहीत्वैनं गंतुंचक्रेच्युतोमतिं ३३ देवर्षिपितृगं
धर्वाःसिद्धचारणपन्नगाः किन्नराप्सरसोमर्त्याः खगाभूतान्यनेकशः यज्ञेश्वरधियाराज्ञावाग्वित्तांजलिभक्तितः
सभाजिताययुःसर्वेवैकुंठानुगतास्ततः ३४ भगवानपिराजर्षेःसोपाध्यायस्यचाच्युतः हरन्निवमनोमुष्यस्वधा
मप्रत्यगात्प्रभुः ३५ अदृष्टायनमस्कृत्यनृपःसंदर्शितात्मने ॥ वासुदेवायदेवानांदेवायस्वपुरंययौ ॥ ३६ ॥ इति श्रीम
द्भागवते महापुराणे चतुर्थस्कंधे पृथुचरित्रे विंशोध्यायः ॥ २० ॥ श्रीमैत्रेय उवाच ॥ मौक्तिकैःकुसुमैःस्रग्भिर्दुकू
लैःस्वर्णतोरणैः महासुरभिभिर्धूपैर्मंडितंतत्रतत्रवै चंदनागुरुतोयार्द्ररथ्याचत्वरमार्गवत् पुष्पाक्षतफ
लैस्तोक्मैर्लाजैरर्चिर्भिरर्चितं सवृंदैःकदलीस्तंभैःपूगपोतैःपरिष्कृतं तरुपल्लवमालाभिःसर्वतःसमलं
कृतम् १ प्रजास्तंदीपावलिभिःसंभृताशेषमंगलैः अभीयुर्मृष्टकन्याश्चमृष्टकुंडलमंडिताः २ शंखदुं
दुभिघोषेणब्रह्मघोषेणचर्त्विजां विवेशभवनंवीरःस्तूयमानोगतस्मयः ३
पुरंययावित्युक्तं तत्पुरमनुवर्णयति मौक्तिकैरितित्रिभिः चंदनागुरुयुक्तैस्तोयैरार्द्रारथ्यादयस्तद्युक्तं तोक्मैर्हरित
पल्लवैःअंकुरैरितिवा अर्चिर्भिःदीपैः १ संभृतानिअशेषाणिमंगलानिदध्यादीनितैः सह अभिजग्मुः मृष्टाउज्व

भा० च०
६९

शिशिरं संतापहरं स्निग्धे तारे ययोस्ते अक्षिणी यस्य इदं वक्ष्यमाणं वाक्यमुक्तवांश्च चारु श्रोत्रप्रियं चित्राणि पदा
नि यस्मिन् श्लक्ष्णं प्रशस्तं मृष्टं शुद्धं गूढं गंभीरार्थं अविक्लवं अव्याकुलं १२ भाषणे हेतुः धर्मं जिज्ञासुभिः पुं
भिः सत्सु स्वमनीषितमावेद्यं वक्तव्यं अतः प्रजानुशासनमिषेण जिज्ञासे वक्रियतो न युष्मान् प्रधर्मवचनामिति

शिशिरः स्निग्धतारात्तः समैक्षत जनं ततः ॥ उवाच निदमुर्वीशः सदः संहर्षयन्निव चारु चित्रपदं श्ल
क्ष्णं मृष्टं गूढमविक्लवं १२ राजोवाच ॥ सभ्याः शृणुत भद्रं वः साधवो य इहागताः सत्सु जिज्ञासुभि
र्धर्ममावेद्यं स्वमनीषितं १३ अहं दंडधरो धाता प्रजानामिह योजितः रक्षिता वृत्तिदः स्वेषु सेतुषु स्था
पिता पृथक् १४ तस्य मे तदनुष्ठानाद्यदाहुर्ब्रह्मवादिनः लोकाः स्युः कामसंदोहा यस्य तिदिष्टदृ तुष्य २
क् १५ य उद्धरेत्करं राजा धर्मेष्वशिक्षयन् प्रजानां शमलं भुंक्ते भगं च स्वं जहाति सः १६
प्रजा १

भाव: १३ इदानीं प्रजाः शिक्षयिष्यन् प्रजाशिक्षणादिकं ममावश्यकमित्याह अहमिति त्रिभिः पृथक् सेतु
षु स्थापिता १४ दिष्टदृक् प्राक्कर्मसाक्षी ईश्वरो यस्य तुष्यति तस्य वेदवादिनो यान् लोकानाहुः प्रजारक्षण
दनुष्ठानात् ते लोका मे स्युः कथंभूताः कामानां सम्यग्दोहः प्रपूरणं येषु १५ अन्यथा त्वनिष्टं स्यादित्या
ह य इति शमलं पापं भगमैश्वर्यम् १६
६९

एकदा तस्य महासत्रदीक्षा आसीत् तत्र सत्रे देवादीनां समाज आसीदित्यर्थः ११ तस्मिन् इज्येषु स्वर्चितेषु सत्सु सद
सोमध्ये उत्थितः सन् स मंततः समैक्षतेति षष्ठेनान्वयः १ प्रांशु उन्नतः पीनावायतौ भुजौ यस्य कंजवत् अरुणे ईक्षणे
यस्य शोभना द्विजाः स्मितं च यस्य २ व्यूढं विस्तीर्णं वक्षो यस्य वलिभिस्तिसृभिर्वेष्टितः सुंदरं दलवत् अधोग्रमश्वत्थ
पत्रमिव परिविस्तृतमध्यस्तात्संकुचितमुदरं यस्य आवर्त्तवन्निम्ना नाभिर्यस्य कांचनवदुज्ज्वलावुरू यस्य उदग्रौ

एकदासीन्महासत्रेदीक्षा तत्र दिवौकसां समाजो ब्रह्मर्षीणां च राजर्षीणां च सत्तम ११ तस्मिन्नर्हत्सु सर्वेषु
स्वर्चितेषु यथार्हतः उत्थितः सदसोमध्ये ताराणामुडुराडिव १ प्रांशुः पीनायतभुजो गौरः कंजारुणेक्ष
णः सुनसः सुमुखः सौम्यः पीनांसः सुद्विजस्मितः २ व्यूढवक्षो बृहच्छ्रोणिर्वलिवल्गुदलोदरः आव
र्तनाभिरोजस्वी कांचनोरुरुदग्रपात् ३ सूक्ष्मवक्रासितस्निग्धमूर्धजः कंबुकंधरः महाधने दुकूलाग्रे
परिधायोपवीय च ४ व्यंजिताशेषगात्रश्री

उन्नताग्रौ पादौ यस्य ३ सूक्ष्माश्च ते वक्राश्चासिताश्च स्निग्धाश्च
नियमे न्यस्तभूषणः कृष्णाजिनधरः श्रीमान्कुशपा

मूर्धजा यस्य कंबुवत् त्रिरेखांकिता कंधरा यस्य परिधाय वसित्वा उपवीय उत्तरीकृत्वा ४ नियमे निमित्ते न्य
स्तानि त्यक्तानि भूषणानि येन सः अत एव तरसावृतत्वात् व्यंजिता अशेषेषु गात्रेषु श्रीः स्वाभाविकी
शोभा येन कृतानि उचितानि कर्माणि येन ५ एमरामरामरामरामराम रामरामरामरामरामराम

भा० च०
७०

मृत्योर्दौहित्राद्वेणादीन्विनाधर्मैर्विमोहितान् अतः शोच्यान् ननु कर्मणैव फलस्याति विध्युद्देशात्तावा देवता
किं परमेश्वरेणेत्याह वर्ग इति वर्ग्यो अत्र त्रिवर्गः स्वर्गो धर्मस्य फलं अपवर्गो मोक्षः तेषामैकात्म्येन एकरू
पेण सर्वानुगतेन हेतुना तत्रापि प्रायेण हेतुना अयं भावः न तावज्जडस्य कर्मणः फलदातृत्वं घटते न चार्वा
ग्देवतानां स्वातंत्र्यं अंतर्यामिश्रुतेः न च तदा कर्मसाम्ये फलतारतम्यं कचित्तदसिद्धिश्च संभवति अतः स्वातं

दौहित्रादीनृते मृत्योः शोच्यान्धर्मविमोहितान् वर्गः स्वर्गापवर्गाणां प्रायेणैकात्म्यहेतुना २० य
त्पादसेवाभिरुचिस्तपस्विनामशेषजन्मोपचितं मलं धियः सद्यः क्षिणोत्यन्वहमेधती सती यथा प
दांगुष्ठविनिःसृता सरित् २१ विनिर्धुताशेषमनोमलः पुमानसंगविज्ञानविशेषवीर्यवान् यदंघ्रिमू
लेकृतकेतनः पुनर्न संसृतिं क्लेशवहां प्रपद्यते २२ त्र्येण कर्तुमकर्तुमन्यथाकर्तुं समर्थेन परमेश्वरेण

भाव्यमिति २० किंच जीवानां मोक्षदः परमेश्वर एव न त्वार्वाग्देवताः तासामपि जीवत्वाविशेषात् इत्याशयेना
ह त्रिभिः यस्य पादयोः सेवायामभिरुचिस्तपस्विनां संसारतप्तानां अशेषजन्मभिः संवृद्धं धियो मलं सद्यः क्ष
पयति तमेव भजतेति त्रितीयेनान्वयः कथंभूता अहन्यहनि वर्द्धमाना सती सा त्विकीत्त्यादसंबंधस्यैव ष
महिमेति दृष्टान्तेनाह यथेति २१ विनिर्धूता अशेषा मनोमला यस्य असंगो वैराग्यं तेन विज्ञानस्य विशेषः सा
क्षात्कारस्तदेव वीर्यं यस्य अंघ्रिमूले कृतमाश्रयः सन् २२ ७८

तत्तस्मात् हे प्रजाः भर्तुर्मम पिंडार्थं पिंडदानवत् परलोकहितार्थं स्वकार्य्यमेव कुरुत धर्ममेवानुतिष्ठत अधोक्षजे धी
येषां तादृशाः संतः वासुदेवार्पिताशया इत्यर्थः अनुग्रहकृतो भवेदिति शेषः १७ शास्तुः शिक्षयितुः अनुज्ञातुरनुमोदि
तुश्च प्रेत्य परलोके यत्फलं तत्तुल्यं १८ कर्मकर्त्तव्यमित्यनुमोदामहे न तु वासुदेवे अर्प्पणीयमिति वेणादिभिस्तद
नंगीकारादित्येवंवादिनः शनैः संबोधयन्नाह हे अर्हत्तमाः यज्ञपतिर्नाम परमेश्वरः केषांचिन्मते तावद

तत्प्रजाभर्तुः पिंडार्थं स्वार्थमेवानुसूयवः कुरुताधोक्षजधियस्तर्हि मेनुग्रहः कृतः १७ यूयं तदनुमो
दध्वं पितृदेवर्षयोऽमलाः कर्त्तुः शास्तुरनुज्ञातुस्तुल्यं यत्प्रेत्य तत्फलं १८ अस्ति यज्ञपतिर्नाम के
षांचिदर्हसत्तमाः इहामुत्र च लक्ष्यंते ज्योत्स्नावत्यः क्वचिद्भुवः १९ मनोरुत्तानपादस्य ध्रुवस्यापि
महीपतेः प्रियव्रतस्य राजर्षेरंगस्यास्मत्पितुः पितुः १९ ईदृशानामथान्येषामजस्य च भवस्य च प्र
ह्लादस्य बलेश्चापि कृत्यमस्ति गदाभृता २०

स्ति तथापि विप्रपन्नैर्न तत्सिद्धिरित्याशंक्य जगद्वैचित्र्यान्यथानुपपत्तिं प्रमाणयति इहामुत्र च ज्योत्स्नावत्यः को
तिमत्यः भुवो भोगभूमयः शरीराणि च १९ नन्विदं कर्मवैचित्र्यादेव सेत्स्यति तथापि विद्वदनुभवेनेश्वरसिद्धिरित्या
ह मनोरिति त्रिभिः अस्मात्पितामहस्यांगस्य कृत्यमस्ति अवश्यं कर्मफलदात्राभाव्यमिति तेषामननमित्यर्थः २०

भा० च०
७१

तदेवमप्रवृत्तान्भगवज्जने प्रवर्त्त्य स्वतःप्रवृत्तानां प्रवृत्तिमभिनंदनेन दृढयति अहो इति वितरंति विस्तारं कुर्वंति २४ इ
दानीं हरिभक्तिद्वारभूतायब्राह्मणभक्तिं विधत्ते माजात्विति त्रिभिः महत्तपदस्य तास्वप्यन्वयः यश्च ताभिर्युक्ताद्राजकुलस्य
तेजः तत्तस्मात्सकाशात् द्विजानां कुलेऽजितोदेवतायेषां तेषां कुले माजातु प्रभवेत् कदाचिदपिप्रभावंन
करोतु कथंभूते समृद्धिभिर्विनापिस्वयमेव तितिक्षादिभिर्दीप्यमाने २५ ब्राह्मणान्स्तुवन्नाह यच्चरणाभि

अहो ममामी वितरंत्यनुग्रहं हरिं गुरुं यज्ञभुजामधीश्वरं स्वधर्मयोगेन यजंति मामका निरंतरं
क्षोणितले दृढव्रताः २६ माजातु तेजः प्रभवेन्महर्द्धिभिस्तितिक्षया तपसा विद्यया च देदीप्यमानेऽजित
देवतानां कुले स्वयं राजकुलाद्द्विजानां २७ ब्रह्मण्यदेवः पुरुषः पुरातनो नित्यं हरिर्यच्चरणाभिवंद
नात् अवाप लक्ष्मीमनपायिनीं यशो जगत्पवित्रं च महत्तमाग्रणीः २८ यत्सेवयाशेषगुहाशयः स्वराट्
विप्रप्रियस्तुष्यति काममीश्वरः तदेव तद्धर्मपरैर्विनीतैः सर्वात्मना ब्रह्मकुलं निषेव्यतां २९ पुमांल्ल
भेतानतिवेलमात्मनः प्रसीदतोऽत्यंतशमं स्वतः स्वयं यन्नित्यसंबंधनिषेवया ततः परं किमत्रास्ति मुखं हविर्भु
जाम् ३०
वंदनाद्धरिर्लक्ष्मीं यशश्च अवाप यत्सेवया चेश्वरस्तुष्यति तदेव ब्रह्मकुलं निषेव्यतामिति द्वयोरन्व
यः २८ हरेर्लोकसंग्रहरूपो धर्मस्तत्परैः २९ ननु ब्रह्मकुलमेव नित्यं सेव्यमाने सर्वदेवतामुखभूतेऽग्नौ यज्ञाद्यनु
ष्ठानं स्यात्तच्चेतनां विना चित्तशुद्धिः न च तया विना मोक्षः स्यादित्याशंक्याह पुमानिति द्वाभ्यां यस्य ब्रह्मकुलस्य ७१

क्रियो२
प२

आत्मवृत्तिभिः ऽध्ययनादिभिः मनोवचःकायानां गुरोः ध्यानस्तुतिपरिचर्याभिः अमायिनः निष्कपटाः सन्तः ननु ब्र
ह्मादिभिः सेव्ये किमस्मद्भक्त्या भविष्यतीति तत्राह यथाधिकारमेवावसिता निश्चिताः समाप्ता वा यासिद्धिर्येषां २३ स्वक
र्मभिर्यागादिभिर्भजन्ते त्युक्तं तत्र ब्रह्मार्पणं ब्रह्म हविरिति न्यायेन सर्वेषु यागतदंगतत्फलेषु भगवद्दृष्ट्या कर्मैक
त्वं न भिन्नदृष्ट्येति वक्तुं तेषां भगवद्रूपतामाह द्वाभ्यां असौ भगवानेव स्वरूपेणो विशुद्धविज्ञानघनो पि अगुणो

तमेव यूयं भजतात्मवृत्तिभिर्मनोवचःकायगुणैः स्वकर्मभिः अमायिनः कामदुघाङ्घ्रिपंकजं यथाधि
कारावसितार्थसिद्धयः २३ असाविहानेकगुणोऽगुणोऽध्वरः पृथग्विधद्रव्यगुणोक्तिभिः संपद्यते
र्थाशयलिंगनामभिर्विशुद्धविज्ञानघनः स्वरूपतः २४ प्रधानकालाशयधर्मसंग्रहे शरीर एष प्रति
पद्य चेतनां क्रियाफलत्वेन विभुर्विभाव्यते यथानलो दारुषु तद्गुणात्मभिः २५

निर्विशेषगुणोऽपि सन्निह कर्ममार्गेऽनेकगुणः नानाविशेषवान् अध्वरो यज्ञः संपद्यते यज्ञो वै विष्णुरिति श्रुतेः अने
कगुणत्वमेवाह पृथग्विधानि यानि द्रव्यादीनि तैः तत्र द्रव्याणि व्रीह्यादीनि गुणाः शुक्लादयः क्रिया अवघातादयः उ
क्तयो मंत्राः अर्थो यागसाध्यं तत्प्रकारः आशयः संकल्पः लिंगं पदार्थानां शक्तिः नाम ज्योतिष्टोमादि तैः अध्वरः संपद्यते
२४ यागफलस्यापि भगवद्रूपतामाह प्रधानेति एष विभुः परमानंदोऽपि शरीरे चेतनां विषयाकारां बुद्धिं प्रतिपद्य तत्तदभिव्यं
ग्यानेकरूपः सन् क्रियाफलत्वेन प्रतीयते एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः यथानलो दारुषु स्थि
स्थितस्तद्गुणात्मकः दारुधर्मैर्वक्रत्वादिमान् तद्वत् कथंभूते शरीरे प्रधानमव्यक्तं कालः क्षोभकः आशयो वासना

धर्मोऽदृष्टः तैः संगृह्यते जन्यत इति तद्यातस्मिन् २५

भा० च०
७२

हे आर्य्याः आयुर्यावज्जीवं अधि किरीटं मुकुटस्योपरि वहेयेति प्रार्थनायां लिङ् यं रेणुं ३२ गुणभाजस्य फलमाह
गुणायनं अन्वनुसंपदः संवृणुते सम्यग्भजंतीति तस्मात् प्रसीदतां प्रसीदतु गवां च कुले ३२ ३३ साधुवादमाहुः

तेषामहं पादसरोजरेणुमार्य्या वहेयाधिकिरीटमायुः यं नित्यदा विभ्रत आशु पापं नश्यत्यमुं स
र्वेगुणा भजंति ३२ गुणायनं शीलधनं कृतज्ञं वृद्धाश्रयं संवृणुतेनु संपदः प्रसीदतां ब्रह्मकुलं गवां
च जनार्द्दनः सानुचरश्च मह्यं ॥३३॥ श्रीमैत्रेय उवाच ॥ इति ब्रुवाणं नृपतिं पितृदेवद्विजातयः तुष्टुवु
र्हृष्टमनसः साधुवादेन साधवः ३४ पुत्रेण जयते लोकानिति सत्यवती श्रुतिः ब्रह्मदंडहतः पापो
यद्वेनोत्यतरत्तमः ३५ विविक्षुरत्यगात्सूनोः प्रह्लादस्यानुभावतः हिरण्यकशिपुश्चापि भगवन्निं
दयातमः ३६ वीरवर्य्य पितः पृथ्व्याः समाः संजीव शाश्वतीः यस्येदृश्यच्युते भक्तिः सर्वलोकैकभर्त
रि ३७ अहो वयं ह्यद्य पवित्रकीर्त्ते त्वयैव नाथेन मुकुंदनाथाः य उत्तमश्लोकतमस्य विष्णोर्ब्रह्म
ण्यदेवस्य कथां व्यनक्ति ३८ नात्यद्भुतमिदं नाथ तवाजीव्यानुशासनं प्रजानुरागो महतां प्रकृतिः करुणा
त्मनाम् ३९

पुत्रेणेति षड्भिः यद्यतः वेणः पितृ सोनरकमत्तरत् अतिततार ३५ ३६ ३७ मुकुंदनाथाः
स्म त्वं नाथ त्वमेव मुकुंदनाथस्त्वमेव मुकुंदनाथत्वे पर्य्यवसितमित्यर्थः तत्र हेतुः य इति ३८ आजीविनां से

७२

नित्यसंबंधेन निषेवया पुमान्स्वयमेव ज्ञानाभ्यासादिकं विना अत्युत्तमं शमं लभेत् कुतः यत्सेवया स्वत एव अनन
तिर्विलंपी घं प्रसीदतः स्पृश्यते आत्मनश्चित्वात् ततः परं श्रेष्ठं देवानां किंमुखमस्ति ब्राह्मणसेवयैव यज्ञादिफलं
च तत्सर्वं भवंतीत्यर्थः ३० हरेरपित देव परं मुखमित्याह अश्नातीति इज्यानां यज्ञानां इंद्रादीनां नामभिर्यस्य मुखे श्रद्ध
या हुतं हविरनंतो यथाश्नाति तथा चेतनया रहिते हुताशने हुतं नाश्नाति केर्हुतमश्नाति तत्वकोविदैः सर्वदे
वमयः अन्येन्यमृत्रि रत्तरात्तित्वे विद्भिः कृत एवं भूतोऽसौ तत्राह पारमहंस्यं ज्ञानं तत्परानर्हति अधिकुर्वंतीति

अश्नात्यनंतः खलु तत्त्वकोविदैः श्रद्धाहुतं यन्मुख इज्यनामभिः न वै तथा चेतनया बहिष्कृते हुता
शने पारमहंस्यपर्यगुः ३१ यद्ब्रह्म नित्यं विरजं सनातनं श्रद्धातपोमंगलमौनसंयमैः समाधिना
बिभ्रति हार्थदृष्टये यत्रेदम् [illegible] आदर्श इवावभासते ३२ तेभ्यो महं पादसरोजरेणुमार्या दहेऽधिकिरी
टमायुः यं नित्यदा बिभ्रत आशु पापं नश्यत्यमुं सर्वगुणा भजंति ३३

पारमहंस्यपर्य्यास्ता गावो वाचो यस्मिन् उपनिबद्धा ज्ञानघनत्वेनोक्त इत्यर्थः यद्वा परमहंसानां ज्ञाननिष्ठानां
गम्यः पारमहंस्यः परितो नगच्छंति गावो वाचो यस्मात्तेस पर्य्यगुः इंद्रियनियंतासचासौसच पारमहंस्यपर्य्यगुः ज्ञान
रूपः सर्वांतर्यामीत्यर्थः ३१ न केवलं चेतनत्वेन हुताशनाद्विशेषः किंतु वेदज्ञानादपीत्याह यदिति व्ययं ये ब्रह्म वेदं
नित्यं बिभ्रति तेषामित्युत्तरेणान्वयः मंगलं नाम प्रशस्ताचरणं नित्यमप्रशस्तस्य वर्ज्जनं एतद्धि मंगलं प्रोक्तमृषिभि
स्तत्वदर्शिभिः मौनमध्ययनाविरोधिवाक्त्यागः समाधिना चित्तस्थैर्येण अर्थदृष्टये वेदार्थमपिचारयंतीत्य

भा०च० मार्ज्जितं क्षालितमलकबंधनं यस्य मानयन्निव स्वयं चकार ५ भवस्याग्रजत्वेन मान्यान् ६ प्रीतः प्राहेत्युक्तं तदेव
७२ प्रीतिपूर्वकवचनमाह अहो इत्ति दशभिः हे मंगलायनाः मयो किं मंगलमाचरितं यस्य मे योगिभिरपि दुर्दर्शनानां ७
८ दुर्दर्शनत्वमाह नैवेति सर्वदृशमात्मानं यथा सर्वदृश्यान लीयंते येऽस्य विश्वस्य हेतवो महदादयो मन्वादयो वा यहा

तत्पादशौचसलिलैर्मार्ज्जितालकबंधनः तत्र शीलवतां वृत्तमाचरन्मानयन्निव ५ हाटकासन
मासीनान्स्वधिष्ण्येष्विव पावकान् श्रद्धासंयमसंयुक्तः प्रीतः प्राह भवाग्रजान् ६ पृथुरुवाच अ
हो आचरितं किं मे मंगलं मंगलायनाः यस्य वो दर्शनं ह्यासीद्दुर्दर्शानां च योगिभिः ७ किं तस्य दुर्लभं भत्र
रमिह लोके परत्र च यस्य विप्राः प्रसीदंति शिवो विष्णुश्च सानुगः नैव लक्षयते लोको लोकान्पर्यटतोपि
यान् यथा सर्वदृशं सर्व आत्मानं येऽस्य हेतवः ९ अधना अपि ते धन्याः साधवो गृहमेधिनः यद्गृहा ह्यर्ह
वर्याम्बुतृणभूमीश्वरावराः १० व्यालालयद्रुमा वैते ह्यरिक्ताखिलसंपदः यद्गृहास्तीर्थपादीयपादतीर्थ
विवर्ज्जिताः ११
कथंभूतान् येऽस्य सर्वदृगात्मदर्शनस्य हेतवस्तान् ९ येषां साधूनां गृहाः अर्हाणां पूज्या
नां वर्याः वरणीयाः स्वीकारार्हाः अंबादयो येषु ताद्दृशाः अंबु च तृणं च भूमिश्च ईश्वरो गृहस्वामी अवरा भृत्यादयश्च १०
व्यालानागालयाद्रुमा एवते अरिक्ताः पूर्णाः अखिलासंपदा येषु ताद्दृशा अपि ते गृहाः तीर्थपादीयाः वैष्णवास्तेषां पादतीर्थ

[illegible] ४८
७२

उपासादितः प्रापितः ॥ कर्मभिर्भ्राम्यतां ॥ ४७ ॥ ईश्वरदृष्ट्यापि विप्रादयोपि प्रणमंति ॥ ब्रह्मादिविषयब्राह्मणजातिमधिष्ठाय
स्थितं तत्त्वत्रयं विभर्त्ति तदुभयं वा विषयद्वंद्वं विश्वं विभर्त्ति ॥ ४९ ॥ इति चतुर्थे एकविंशः ॥ २१ ॥ द्वाविंशे तु परं ज्ञानं पृथवे हरिशा
पासा १ सद्यनसत्तमसः पारस्त्वयोदितः प्रभो ॥ भ्राम्यतां नष्टदृष्टीनां कर्मभिर्दैवसंज्ञितैः ॥ ४७ ॥ नमो विवृद्धसत्वाय.
पुरुषाय महीयसे ॥ यो ब्रह्मक्षत्रमाविश्य बिभर्त्तीदं स्वतेजसा ॥ ४९ ॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कं
धे एकविंशोध्यायः ॥ २१ ॥ श्रीमैत्रेय उवाच ॥ जनेषु प्रगृणत्स्वेवं पृथुं पृथुलविक्रमं तत्रोपजग्मुर्मुनय
श्चत्वारः सूर्यवर्च्चसः १ तांस्तु सिद्धेश्वरान्राजा व्योम्नोऽवतरतोऽर्च्चिषा लोकानपापान्कुर्वत्या सानुगोऽच
ष्टलक्षितान् २ तद्दर्शनोद्गतान्प्राणान् प्रत्यादित्सुरिवोत्थितः ससदस्यानुगो वैण्य इंद्रियेशो गुणानि
व ३ गौरवाद्यंत्रितः सभ्यः प्रश्रयानतकंधरः विधिवत्पूजयांचक्रे गृहीताध्यर्हणासनान् ४ ॥ ऽऽ

सनात् सनत्कुमारो भगवानुपादिशदितीर्यते १ अर्च्चिषालक्षितान् सनकादय इति ज्ञापितान् अचष्ट अपश्यत् २
तेषां दर्शनोद्गतान् प्राणान् प्राप्तुमिच्छुरिव अयं भावः ऊर्द्ध्वं प्राणा ह्युत्क्रामंति यूनः स्थविर आयति प्रत्युत्थानाभि
वादाभ्यां पुनस्तान्प्रतिपद्यते इति स्मृतेः प्राणास्तु वर्त्ततेजसा हित्वांस्तान् प्रत्युद्गच्छंति अतः स्वयमनुगच्छत्तः
सं प्राणहानिः स्यादिव संभ्रमं प्रत्युद्गमं च करोति सहसदस्यैरनुगैश्च वर्त्तमानः इंद्रियेशो जीवः गुणान् गंधादीन् प्र
तियथोद्गच्छतीत्युत्सुकेन दृष्टांतः ३ यंत्रितो वशीकृतः गृहीतमध्यर्हणमर्घ्यमासनं च यैस्तान् ४ ॥ ऽऽ ॥

भा०च० स्वयमपि पृथोः संगममभिनंदति संगमइति उभयेषांवक्तॄणांचयेषांसंभाषणसहितः संप्रश्नः ससर्वेषांशंसु
७४ खंविस्तारयति १९ तदेवसंगंप्रश्नंचाभिनंद्यानुवादमुखेनैवमोक्षसाधनमुपदिशति अस्त्येवेति गुणानामनु
वादेनप्रश्नद्वारेणानुवादेप्रवृत्तेनश्रवणमित्यर्थः आत्मनोमनसोऽन्तस्थंकामात्मकंविधुनोति कषायंधातुरागवद्
निवर्त्त्यं २० चित्तशुद्ध्यैवबहिर्वैराग्यमात्मन्यात्मनिरतिश्चभवति नचतमोधिकंसाधनमस्ति शास्त्रेष्वुक्तयोरेवमोक्षहे

संगमः खलुसाधूनामुभयेषांचसंमतः यत्संभाषणसंप्रश्नः सर्वेषांवितनोतिशं १९ अस्त्येवम
ङ्गभवतोमधुद्विषः पादारविंदस्यगुणानुवादने रतिर्दुरापाविधुनोतिनैष्ठिकीकामंकषायंमलमंतरात्म
नः २० शास्त्रेष्वियानेवसुनिश्चितोनृणांक्षेमस्यसध्र्यग्विमृशेषुहेतुः असंगआत्मव्यतिरिक्तआत्मनिदृ
ढारतिर्ब्रह्मणिनिर्गुणेचया २१ साश्रद्धयाभगवद्धर्मचर्ययाजिज्ञासयाध्यात्मिकयोगनिष्ठया योगे
श्वरोपासनयाचनित्यंपुण्यश्रवःकथयापुण्ययाच २२

तुत्वनिश्चयादित्याह शास्त्रेष्विति सध्र्यग्विमृशेषुसम्यग्विचारवत्सुक्षेमस्यहेतुरेतावानेवसुनिश्चितः कोसौ
आत्मव्यतिरिक्तेऽसंगोवैराग्यंआत्मनिचरतिः आत्मनोविशेषणंनिर्गुणेब्रह्मणीति २१ नन्वेतदेवातिदुर्लभमित्या
शंक्योत्तमाधिकारिणः श्रवणमात्रेणभवति अन्यस्यतुचित्तशुद्ध्यनुसारेणसाधनतारतम्यतोवर्द्धमान
याभक्त्याभिप्रेत्याह सेतिचतुर्भिः सावैराग्यरतिःसंगमश्रद्धादिभिःस्यादितिचतुर्थेनान्वयः जिज्ञास
तत्त्वद्विशेषबुभुत्सया पुण्यंश्रवोयस्यतस्यहरेःपुण्ययाकथयाच २२ ७४

स्वागतं भद्रमागमनं जातं यद्यस्माद्बाला एव भवंतो वृहंति व्रतानि अन्ये वालाश्चरंति १२ इंद्रियार्थे ये विंदंति मेषां
नः व्यसनान्युत्पत्ते यस्मिन् तस्मिन् संसारे १३ नत्वभ्यागतानां कुशलं पृच्छते लोके न त्वात्मनस्तत्राह भवत्स्विति
१४ तत्तस्मात्कृतविश्वासः सन् तपस्विनां संततृष्णानां सुहृदो युष्मान् पृच्छामि १५ न खल्वन्ययेति तुल्या प्रश्न किंतु

स्वागतं वो द्विजश्रेष्ठा यद्व्रतानि मुमुक्षवः चरंति श्रद्धया धीरा बाला एव वृहंति वै १२ कच्चिन्नः कुशलं ना
था इंद्रियार्थार्थवेदिनां व्यसनावाप एतस्मिन् पतितानां स्वकर्मभिः १३ भवत्सु कुशलप्रश्न आत्मारामे
षु नेष्यते कुशलाकुशला यत्र न संति मतिवृत्तयः १४ तदहं कृतविश्रंभः सुहृदो वस्तपस्विनां संपृच्छे
भव एतस्मिन् क्षेमः केनांजसा भवेत् ॥१५॥ व्यक्तमात्मवतामात्मा भगवानात्मभावनः स्वानामनुग्र
हाये मासिद्धरूपी चरत्यजः १६ श्रीमैत्रेय उवाच ॥ पृथोस्तत्सूक्तमाकर्ण्य सारं सुष्टु मितं मधु स्मयमा
न इव प्रीत्या कुमारः प्रत्युवाच ह ॥१७॥ सनत्कुमार उवाच ॥ साधु पृष्टं महाराज सर्वभूतहितात्मना
भवता विदुषा चापि साधूनां मतिरीदृशी १८

साक्षाद्भगवानेवेत्याह व्यक्तं निश्चितं आत्मवतां धीराणां आत्मत्वेन प्रकाशमानः आत्मानं भावयति प्रका
शयतीति तथा इमां पृथ्वीं चरति १६ सूक्तं शोभनं वचनं सारं न्याय्यं सुष्टु गंभीरार्थं मितमल्पाक्षरं मधु श्रोत्र
प्रियं मुखप्रसत्त्या स्मयमान इव प्रतीयमानः १७ १८

भा० च० भवत्वन्यथा संगत्रात्मरतिश्च ततः किमत आह यदा निष्ठां प्राप्ता रतिर्भवति तदा आचार्यवान् सन् ज्ञानवैरा
७ पू ग्ययोर्वेगेन अवीर्यमिवासं सत् जीवस्य कोशमावरकं हृदयं पुमान् दहति कथंभूतम् पंचमहाभूतप्रधाने २४
यद्वा अविद्यास्मितारागद्वेषाभिनिवेशाः एवं पंचात्मकं उत्थितः प्रज्वलितो ऽग्निर्योनिमरणिमिव यद्वा रतिरा
चार्यानुग्रहश्च तदा ज्ञानविरागयोर्वेगेनोत्थितः साक्षात्कारः अवीर्यं पुनः प्ररोहसमर्थं यथा न भवत्येवं हृदयं दहति
शेषं समानं २६ ततः किमत आह दग्धः आशयो हृदयमुपाधिर्यस्य अत एव मुक्ताः समस्तास्तद्गुणाः कर्तृत्वादयो

न्य यदा रतिर्ब्रह्मणि [illegible] नैष्ठिकी पुमानाचार्यवान्ज्ञानविरागरंहसा दहत्यवीर्यं हृदयं जीवकोशं पंचा
त्मकं योनिमिवोत्थितोऽग्निः २६ दग्धाशयो मुक्तसमस्ततद्गुणो नैवात्मनो बहिरंतर्विचष्टे परात्मनो
यद्व्यवधानं पुरस्तात्स्वप्ने यथा पुरुषस्तद्विनाशे २७ आत्मानमिंद्रियार्थं च परं यदुभयोरपि सत्याश
य उपाधौ वै पुमान्पश्यति नान्यदा २८

येन आत्मनः सकाशाद्बहिर्विषयादिरंतः सुखदुःखादिर्नैव विचष्टे न पश्यति एवं कुतः इत्यपेक्षायां दृष्टृदृश्यप्रतीतिरंतःकरण
हेतुत्वादित्याह परो दृश्यः आत्मा द्रष्टा तयोर्यद्व्यवधानं भेदकं पूर्वमासीत् तस्य विनाशे सति यथा स्वप्ने राजाहमि
त्यारोपितं सैन्यादि द्रष्टारं दृश्यं सैन्यं च स्वप्नावस्थानाशेन पश्यति तद्वत् २७ दृष्टृदृश्यभेदप्रतीतेरंतःकरणहे
तुसमन्वयव्यतिरेकाभ्यामुपपादयति आत्मानमिति आत्मानं द्रष्टारं इंद्रियार्थं दृश्यं उभयोस्तयोः परं संबंधहेतुं
महंकारं चाशयो ऽन्तःकरणे सत्येव जाग्रत्स्वप्नयोः पश्यति अन्यदा सुषुप्तौ तदुक्तं दृश्यानुरंजितं द्रष्टुरनुरंजितं च

[illegible]

७५

अर्थारामा अर्थेनिष्ठास्तामसाः इंद्रियारामाः कामनिष्ठाः राजसाः तैः सह या गोष्ठी तस्याः स्मयात् तेषां च ये संमता अ
र्थाः कामाश्च तेषामपरिग्रहेण विविक्ते विजनया रुचिस्तया आत्मन्येव परितुष्टेच मतिः स्यात् किंतु हरेर्गुणपीयूषपा
नाद्विना तस्मिन्सति विविक्ते सरुचिर्नकार्या आत्मनि परितोषः कार्य इत्यर्थः २३ पारमहंस्यचर्यया उपशमादिप्र
धानया च स्मृत्यास्मृत्या आत्मविहितानुसंधानेन मुकुंदाचरितमेवाग्र्यसीधु तेन श्रेष्ठममृतं तच्चरितस्तुतिस्तवेनेत्य

नाम अर्थेंद्रियारामसगोष्ठ्यतृष्णया तत्संमतानामपरिग्रहेणच विविक्तरुच्यापरितोषआत्मन्विनाह
रेर्गुणपीयूषपानात् २३ अहिंसयापारमहंस्यचर्ययास्मृत्यामुकुंदाचरिताग्र्यसीधुना यमैरका
मैर्नियमैश्चाप्यनिंदयानिरीहयाद्वंद्वतितिक्षयाच २४ हरेर्मुहुस्तत्परकर्णपूरगुणाभिधानेन
नविजृंभमाणया भक्त्याह्यसंगः सदसत्यनात्मनिस्यान्निर्गुणेब्रह्मणिचांजसारतिः २५

र्थः मार्गोत्तरस्या निंदया निरीहया योगक्षेमार्थे क्रियारहितेन शीतोष्णादिद्वंद्वसहनेन २४ क
थयेत्यत्रोक्तमपि कथनं भक्त्यावांतरगत्वे पुनरुच्यते तत्परा हरिभक्ताः तेषां कर्णपूराः कर्णपूरालंका
रभूतापि हरेर्गुणाः तेषामभिधानेन सदसति कार्यकारणरूपे २५ रामराम रामराम रामराम

भा

भा० च० अनात्मरतेरनर्थहेतुत्वमुक्तं संगस्याप्याह नेति यद्वस्तु धर्मादीनां विघातकं तस्मिन्संगं तमः संसारं ३४ तुल्यवन्निर्दे

७६ शात्पुरुषार्थसाम्यमित्यतिवारयति तत्रापीति कृतांतः कालः ३५ भयसंयुतत्वमेवाह परे ब्रह्मादयः गुणव्यतिकराद्भावादनु पश्चा

द्भवंति ईशः कालः ततो न विध्वंसिता आशिषो येषां ३६ यस्मादनात्मरतिरनर्थहेतुः तत्तस्मात् जगतां जंगमानां तस्थुषां

स्थावराणां च देहादिभिरात्मनाहंकारेण चावृतानां हृदि यश्चकास्ति प्रकाशते तमवेहि कथं सोऽस्मीति सोऽस्तीति पा

न कुर्यात्कर्हिचित्संगं तमस्तीव्रं तितीरिषुः धर्मार्थकाममोक्षाणां यदत्यंतविघातकं ३४ तत्रापि मोक्ष ए

वार्थ आत्यंतिकतयेष्यते त्रैवर्ग्योर्थो यतो नित्यं कृतांतभयसंयुतः ३५ परे वरे च ये भावा गुणव्यतिकरा

दनु न तेषां विद्यते क्षेमम् ईशविध्वंसिताशिषां ३६ तत्त्वं नरेंद्र जगतामथ तस्थुषां च देहेंद्रियासुधिष

णात्मभिरावृतानां । यः क्षेत्रवित्तपतया हृदि विष्वगाविः प्रत्यक् चकास्ति भगवांस्तमवेहि सोस्मि ३७

हि स एवैकोस्ति ततोऽन्यदसदित्यर्थः ननु जीवो हृदि चकास्ति नान्यस्तत्राह क्षेत्रविदं जीवं तपति नियमयतीति

क्षेत्रवित्तपस्तस्य भावस्तत्ता तया अंतर्यामिरूपेण यद्वा क्षेत्रवित्तोऽहं ममतास्पदे पातीति क्षेत्रवित्तपः तेन रू

पेण जीवस्तु परतंत्र्यान्नपति ननु कर्म जीवं नियच्छति न आविः प्रत्यक्तः तर्हि बुद्धिः न प्रत्यक् प्रतिलोमं च चकास्ति बु

द्धिपराग्विषयाकारेण तर्ह्यहंकारः न विषकृ प्राप्तत्वेन स तु परिच्छिन्नः एवंभूतो यो भगवान्तमवेहीति ३७॥ ७६

एकस्मिन्नात्मनि दृश्यादिभेदप्रतीतिरौपाधिकीति दृष्टांतेन स्पष्टयति निमित्त इति लोकेऽपि च सर्वत्र जलदर्पणादौ भे
दनिमित्ते सत्येव आत्मनो बिंबभूतस्य परस्य प्रतिबिंबस्य च भेदं पश्यति न तु जलाद्यभावे २९ तदेवं [illegible] चतुर्भिरसंग
स्मारत्यो मोक्षहेतुत्वमुक्तं इदानीं मनोऽस्मरतेः संसारहेतुत्वमाह इंद्रियैरिति चतुर्भिः ध्यायतां गुणरूपेण स्मरतां पुंसामिंद्रि
यैर्विषयैराकृष्यते तैश्च मन आकृष्यते विषयाशक्तिं प्राप्यते तच्च बुद्धेः सकाशात्स्वधर्मं चेतनां विचारसामर्थ्यं ह

निमित्ते सति सर्वत्र जलादावपि पुरुषः आत्मनश्च परस्यापि भिदां पश्यति नान्यदा २९ इंद्रियैर्विषयाकृ
ष्टैराक्षिप्तं ध्यायतां मनः चेतनां हरते बुद्धेः स्तंबस्तोयमिव ह्रदात् ३० भ्रंशत्यनुस्मृतिश्चित्तं ज्ञानभ्रंशः स्मृ
तिक्षये तद्रोधं कवयः प्राहुरात्मापह्नवमात्मनः ३१ नातः परतरो लोके पुंसः स्वार्थव्यतिक्रमः यदध्यन्य
स्य प्रेयस्त्वमात्मनः स्वव्यतिक्रमात् ३२ अर्थेंद्रियार्थाभिध्यानं सर्वार्थापह्नवो नृणां भ्रंशितो ज्ञानविज्ञा
नाद्येनाविशति मुख्यतां ३३

रति एतच्चाविवेकिनामनुलक्ष्यमिति दृष्टांतेनाह स्तंबः कुशादिस्तंबो यथा मूलैस्तोयं ह्रदादपहरति तद्वत् ३० चित्तं चेतना
मनु तस्यामपहृतायां स्मृतिः पूर्वापरानुसंधानं भ्रश्यति एवं तद्रोधं ज्ञानभ्रंशमात्मनः स्वहेतो रात्मनोऽपह्नवं नाशं प्राहुः ३१ एवं ७२
भूतो नाशो भवतु ततश्च किमित्यत आह यदधीयमधिकृत्यान्यस्य विषयस्य प्रियतमत्वं आत्मनस्तु कामाय सर्वं प्रियं भवती
ति श्रुतेस्तस्यात्मनः स्वेनैव यो व्यतिक्रमोऽपह्नवः तस्मात् यः स्वार्थनाशः अतः परतरः स्वार्थनाशो नास्ति ३२ केन इत्यत आ
ह अर्थस्याभिधानं इंद्रियार्थकामस्तस्याभिध्यानं सर्वार्थनाशः ज्ञानं च परोक्षं अपरोक्षं येन ध्यानेन मुख्यतां स्थावरतां ३३

भा.

भा० चं० ७७

आत्ममेधसा ब्रह्मविदा दर्शिता आत्मनो गतिस्त्वं यस्मै सः ६१ ब्रह्मन्निति संबोधनं प्राधान्यादेकस्य स्वयमित्युक्तेः स
र्वान्प्रति ६२ आत्मना देहेन सर्वराज्यादिकं मदीयं साधुच्छिष्टं साधुभिः स्वीयं सन्मह्यं प्रसादरूपेण दत्तं अतस्तत्र मम
सत्वाभावात् गुरुदक्षिणार्थं किं ददे न हि पित्रा दत्तं मोदकं तस्मै दानरूपेण प्रत्यर्प्यते ६३ निवेदनं तु तदीयस्यैव सम

मैत्रेय उवाच ॥ स एवं ब्रह्मपुत्रेण कुमारेणात्ममेधसा ॥ दर्शितात्मगतिः सम्यक्प्रशस्योवाच तं नृपः ॥ ६१ ॥ रा
जोवाच ॥ कृतो मेऽनुग्रहः पूर्वं हरिणार्त्तानुकंपिना तमापादयितुं ब्रह्मन्भगवन्यूयमागताः ६२ निष्पा
दितश्च कार्त्स्न्येन भगवद्भिर्घृणालुभिः साधूच्छिष्टं हि सर्वं मे आत्मना सह किं ददे ६३ प्राणा दाराः सुता
ब्रह्मन्गृहाश्च सपरिच्छदाः राज्यं महीबलं कोश इति सर्वं निवेदितम् ६४ सैनापत्यं च राज्यं च दंडने
तृत्वमेव च सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति ६५ स्वमेव ब्राह्मणो भुंक्ते स्वं वस्ते स्वं ददाति च
तस्यैवानुग्रहेणान्नं भुंजते क्षत्रियादयः ६६

र्पणं यथा भृत्यो राज्ञो सेवारूपेण तांबूलादिकमर्पयति तथा मयापि सर्वं निवेदितं स्वीकुरुतेत्याह प्राणा इति ६४ आत्मनः स्व
भावं प्रपंचयति सेनापत्यं चेति द्वाभ्याम् ६५ वस्ते परिधत्ते अन्नमात्रम् केवलं भुंजते न स्वतंत्राः ६६
रामराम ॥ रामराम ॥ ० ॥ ० ॥ राम राम ॥ ० ॥ ० ॥ रामराम ॥ ऽऽ ६६

७७

स्थावरजंगमादीनां हृदि चकास्तीत्युक्ते तेषां सत्वं तत्त्वं धीश्वरस्य भातिरिन्यं च प्रसक्तं निराकुर्वन्नुद्रिक्तभक्त्या तं प्रपद्य
ति यस्मिन्निदं विश्वं सदसदात्मतया उत्कृष्टनिकृष्टभावेन कार्यकारणभावेन वा मायैव विभातीति तं प्रपद्ये मायात्वे हेतुः
विवेकेन विधुतिर्निराकृतिर्यस्मात्तत् स्रजि वेति वा शब्दो हि दृष्टान्ते नित्यमुक्तं यतः परिशुद्धं तत्कुतः विशुद्धं तत्त्वं सत्यं श्रेत
एवं प्रत्यूढा अभिभूता कर्मभिः कलिलामलिना प्रकृतिर्येन तं ३८ तमेवं हीति ज्ञानमुपदिश्य तस्य दुष्करत्वेन भक्तिमु
पदिशति द्वाभ्यां यस्य पादपंकजयोः पलाशानि अंगुलयः तेषां विलासः कांतिः तस्य भक्त्या कर्माशयं अहंकार

यस्मिन्निदं सदसदात्मतया विभाति माया विवेकविधुति स्रजि वाहिबुद्धिः तं नित्यमुक्तपरिशुद्ध
विबुद्धतत्वं प्रत्यूढकर्मकलिलप्रकृतिं प्रपद्ये ३८ यत्पादपंकजपलाशविलासभक्त्या कर्माशयं
ग्रथितमुद्ग्रथयंति संतः तद्वन्न रिक्तमतयो यतयोपि रुद्धस्रोतोगणास्तमरणं भज वासुदेवं ३९ कृ
च्छ्रो महानिह भवार्णवमप्लवेशां षड्वर्गनक्रमसुखेन तितीर्षयंति तत्त्वं हरेर्भगवतो भजनीयमंघ्रिं कृत्वो
डुपं व्यसनमुत्तर दुस्तरार्णं ४० त १

रूपं हृदयग्रंथिं कर्मभिरेव ग्रथितं रिक्तानि विषयाभावतिर्येषां रुद्धः प्र
त्याहृतः स्रोतोगणः इंद्रियवर्गो यैः अरणं शरणं ३९ ननु ब्रह्मविदाप्नोति परमिति श्रुतेः कथं यतयो नोद्ग्रथयंतीत्यु
च्यते तत्राह कृच्छ्र इति अप्लवेशां न प्लवस्तरणहेतुः ईट् ईशो येषां तेषां महानिह तरणे कृच्छ्रः क्लेशः ते हि असु
खेन योगादिना इंद्रियषड्वर्गग्राहं भवार्णवं तितीर्षन्ति तत्तस्मादुडुपं प्लवं दुस्तरार्णवमित्यर्थः यद्वा अर्णशब्देन स

कारलोपश्चार्षः दुस्तरोदकरूपं व्यसनमित्यर्थः ४०

भा० च०
७८

अर्चिष्मां भार्य्यायां ५३ ५४ ५५ सोमश्चासीद्राजा च सइ व भुवो वसु धनं गः हत्त्वा विसृजंश्चासौ सूर्य्यवत् सहः
प्रतपनमाज्ञाकरणं ५६ अग्निरिव दुर्द्धर्षः यः सर्ग इव ५७ समुद्रो यथा गांभीर्य्येणैतावानिति न बुध्यते तथा

एवमध्यात्मयोगेन कर्म्माण्यनुसमाचरन् पुत्रानुत्पादयामास पंचार्चिष्मा[illegible]त्मसंमतान् ५३ विज
यास्वं धूम्रकेशं हर्य्यक्षं द्रविणं वृकं सर्वेषां लोकपालानां दधारैकः पृथग्गुणान् ५४ गोपीथाय ज
गत्सृष्टेः काले स्वे स्वेऽच्युतात्मकः मनोवाग्वृत्तिभिः सौम्यैर्गुणैः संजयन् प्रजाः ५५ राजेत्यछानाम
धेयं सोमराज इवापरः सूर्य्यवद्विसृजन्नर हन्न प्रतपंश्च भुवो वसु ५६ दुर्द्धर्षस्तेजसेवाग्निर्महें
द्र इव दुर्ज्जयः तितिक्षया धरित्रीव द्यौरिवाभीष्टदो नृणां ५७ वर्षति स्म यथाकामं पर्जन्य इव त
र्पयन् समुद्र इव दुर्बोधः सत्त्वेनाचलराडिव ५८ धर्मराडिव शिक्षायामाश्चर्य्ये हिमवानिव कुवेर इव
कोशाढ्यो गुप्तार्थो वरुणो यथा ५९ मातरिश्वेव सर्वात्मा बलेन सहसौजसा अविषह्यतया देवो भगवा
न्भूतराडिव ६०

स्वाव भिप्रायतो दुर्बोधः अचलराडिव मेरुरिव ५८ ५९ सर्वात्मा संचारशक्तिवत्त्वादि मिर्मातरिश्वेव भूतराड्

श्रीराम
७८

सत्यपि सर्वस्वेनापि न गुरोः प्रत्युपकर्तुं शक्यमित्याह यैरिति आत्मवादे अध्यात्मविवादे एकांततः निश्चयेन निगमभिः वेदविद्भिः ते नित्यमनल्पकरुणाः स्वकृतेनैव दीनेकरुणां तुष्यंतु को नाम तत्कृतमुपकारं प्रति स्वयमुपकरोति उदपात्रं अंजल्लिं विना मया जल्लिमेव तेभ्यो ददतु इत्यर्थः यद्वा विनोदपात्रं उपहासास्पदं प्रत्युपका

यैरीदृशी भगवतो गतिरात्मवादे एकांततो निगमिभिः प्रतिपादिता नः तुष्यंत्वदभ्रकरुणाः स्वकृतेन नित्यं को नाम तत्प्रतिकरोति विनोदपात्रं ४७ तत्रात्मयोगपतय आदिराजेन पूजिताः शीलं तदीयं शंसंतः खेभूवन्मिषतां नृणां ४८ वैन्यस्तु धुर्यो महतां संस्थित्याध्यात्मशिक्षया आप्तकाममिवात्मानं मेन आत्मन्यवस्थितः ४९ कर्माणि च यथाकालं यथादेशं यथाबलं यथोचितं यथावित्तमकरोद्ब्रह्मसात्कृतं ५० फलं ब्रह्मणि विन्यस्य निर्विषंगः समाहितः कर्माध्यक्षं च मन्वान आत्मानं प्रकृतेः परं ५१ गृहेषु वर्तमानोपि स साम्राज्यश्रियान्वितः नासज्जतेंद्रियार्थेषु निरहंमतिरर्कवत् ५२

कारं प्रवृत्ते जनानामुपहासास्पदं भवेदित्यर्थः ४७ खेऽभवन् आकाशमार्गेण ययुः ४८ धुर्यो मुख्यो ऽध्यात्मशिक्षया संस्थितिरेकाग्रतातया आत्मन्यवस्थितः सन् मेने ४९ ब्रह्मसात्कृतं ब्रह्मण्यर्पितं यथा भवति ५० निर्विषंगः कर्मस्वनासक्तः कर्माध्यक्षं कर्मसाक्षिणं उदासीनं मन्वानो ऽकरोदिति पूर्वेणान्वयः नासज्ज

भागवतटीका ५२

भा० चं० अदाभ्याविघ्नैर्नाशयितुमशक्यानियमायस्य वानप्रस्थानांसुसंमतेउग्रेतपसि आरब्धःप्रवृत्तः कर्त्तरिक्तः

७६ स्वस्यधरामंडलस्यवि जयेपूर्वंयथामहतायत्नेनप्रवृत्तः ४ उग्रंतपोदर्शयति कंदमूलेतित्रिभिः क्वचित्क्व

चित्त ५ चतुर्दिक्षुचत्वारोग्नयः उपरिसूर्यइतिपंचाग्नितपःसंतापोयस्यसः पंचतपाः आसारंसहतेइ

तत्राप्यदाभ्यनियमोवैखानससुसंमते आरब्धउग्रतपसियथास्वविजयेपुरा ४ कंदमूलफ

लाहारःशुष्कपर्णाशनःक्वचित् अब्भक्षःकतिचित्पक्षान्वायुभक्षस्ततःपरं ५

ग्रीष्मेपंचतपावीरोवर्षास्वासारषाण्मुनिः आकंठमग्नःशिशिरेउदकेस्थंडिलेशयः ६ तितिक्षु

र्यतवाग्दांतऊर्ध्वरेताजितानिलः आरिराधयिषुःकृष्णमचरत्तपउत्तमं ७ तेनक्रमानुसिद्धेन

ध्वस्तकर्मामलाशयः प्राणायामैःसंनिरुद्धषड्वर्गश्छिन्नबंधनः ८ सनत्कुमारोभगवान्यदाहा

ध्यात्मिकंपरम योगंतेनैवपुरुषमभजत्पुरुषर्षभः ९ भगवद्धर्मिणःसाधोःश्रद्धयायततःसदा

श्री २ भक्तिर्भगवतिब्रह्मण्यनन्यविषयाभवत् १० तस्यानयाभगवतःपरिकर्मशुद्धसत्वात्मनस्तदनुसंस्मरणा

नुपूर्त्या ज्ञानंविरक्तिमदभून्निशितेनयेनचिच्छेदसंशयपदंनिजजीवकोशं ११

तिआसारषाट् शिशिरेकंठंमग्नःस्थंडिलेशयनःसर्वदा ६ तेनतपसाक्रमानुसिद्धेनशनैःप्राप्तेन ध्वस्तानिकर्माणियस्य अ

तःअमलआशयोयस्य छिन्नानिबंधनानिवासनायस्य ८ ९ १० परिकर्मणापरिचर्ययाशुद्धंसत्वंआत्मा

मनोयस्यतस्यज्ञानमभूत् कीदृशं येन निजउपाधिंजीवको

शंहृदयग्रंथिंसंशयानांअसंभावनादीनांपदमाश्रयं

७६

अज्ञोब्रह्मेव ६१ आत्मवत्वेजितेंद्रियत्वेभक्त्यादिभिःपरार्थोद्यमेआत्मनेवतुल्यःनिरूपमः॥६२॥पुंभिःसत्पुरुषैः
रामःसीतापतिर्यथासतांकर्णरंध्रेषुप्रविष्टः॥६३॥इतिचतुर्थेद्वाविंशः॥२२॥तयोर्विंशेषसभार्यस्यवनेनित्यसमाधि
तः विमानमभिरुह्याथवैकुंठगतिरीर्यते प्रवयसंदृष्ट्वात्मानंतपोवनमगादितितत्तीयेनान्वयः स्वविहतोनुसर्गः

कंदर्पइवसौंदर्येमनस्वीमृगराडिव वात्सल्येमनुवन्नृणांप्रभुत्वेभगवानजः ६१ बृहस्पतिर्ब्रह्मवा
देआत्मवत्वेस्वयंहरिः भक्त्यागोगुरुविप्रेषुविष्वक्सेनानुवर्तिषु॥ह्रियाप्रश्रयशीलाभ्यामात्मतुल्यःप
रोद्यमे ६२ कीर्त्योर्द्ध्वगीतयापुंभिस्त्रैलोक्येतत्रतत्रह प्रविष्टःकर्णरंध्रेषुस्त्रीणांरामःसीतामिव॥६३॥
इतिश्रीमद्भागवतेमहापुराणेचतुर्थस्कंधेद्वाविंशोध्यायः॥२२॥मैत्रेयउवाच॥दृष्ट्वात्मानंप्रवयसमे
कदावैएषआत्मवान् आत्मनावर्द्धिताशेषःस्वानुसर्गःप्रजापतिः १ जगतस्तस्थुषश्चापिवृत्तिदो
धर्मभृत्सतां निष्पादितेश्वरादेशोयदर्थमिहजज्ञिवान्॥२॥आत्मजेष्वात्मजांन्यस्यविरहाद्रुदतीमि
व॥ प्रजासुविमनस्स्वेकःसदारोगात्तपोवनं ३
पुरग्रामादिसर्गेश्चवर्द्धितःअशेषःस्वानुसर्गोयेन १ निष्पादितईश्वरादेशःप्रजापालनादिर्येन जज्ञिवा
न्जातः २ आत्मजांपृथ्वीविमनस्सुचिंतातुरास्सुसदारःसभार्यः ३ ॥

भा॰च॰ स्वानींद्रियच्छिद्राणि द्रवंतो ये तदेवं देहं प्रविलाप्य द्वितीयात्मप्रतिपत्त्यर्थं महाभूतानामपि लयमाह क्षितिं अंभस्येकीकृ

८० तवान् तत्र अंभः अधस्तेजः अमुं वायुं ३६ तदेवं तामसाहंकारकार्यस्याकाशपर्यंतस्य लयमुक्त्वा सात्विकराजसाहंकार

कार्याणां लयमाह इंद्रियेषु मन इति देवानामुपलक्षणं सविकल्पज्ञानेन मनसः इंद्रियेष्वेकधीणाहुते पुत्वाभिधानं

न तु कार्यत्वात् तदुक्तं गीतासु इंद्रियाणां हि चरतां यन्मनोऽनुविधीयत इति इंद्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतो

मन इति इंद्रियेषु नभ इति पाठेप्ययमर्थः भूतादीनां मतेन भस्मात्पुष्पकेपाचिन्मानसं अनुमानिकत्वमपींद्रियवा

स्वान्याकाशे द्रवंतो ये यथास्थानं विभागशः क्षितिमंभसि तत्तेजस्यदो वायौ नभस्यमुं ३६ इंद्रियेषु
मनस्तानि तन्मात्रेषु यथोद्भवं भूतादिनामून्युत्कृष्य महत्यात्मनि संदधे ३७ तं सर्वगुणविन्यासं जी
वे मायामये न्यधात तं चानुशयमात्मस्थमसावनुशयी पुमान् ज्ञानवैराग्यवीर्य्येण स्वरूपस्थोजहा
त्प्रभुः ३८

पारोऽस्त्येव नभोगुणत्वं शब्दः श्रोत्रग्राह्यः अत इंद्रियग्राह्यत्वादिंद्रियेषु नभो विलापितमिति तानीं

द्रियाणि यथोद्भवं उद्भवोऽत्र उत्पत्तिलाभः स च विषयाधीन इति श्रोत्रादीनां विशेषेण शब्दादिषु लयः यद्वा तन्मात्रका

र्याण्येवेंद्रियाणि मनोप्यपंचीकृतद्धीनत्वविवक्षयेत्यविरोधः भूतादिनाहंकारेण प्राग्वशिष्टनभःसहितानींद्रियाणि

उत्क्षिप्य परतो नीत्वा भूतादौ क्षिप्तेन सह महत्तत्वे संदध इत्यर्थः ३७ सर्वेषां गुणानां कार्याणां विन्यासः स्थितिर्यस्मिन्

तं महांतं मायामये मायोपाधिप्रधाने जीवे तं चानुशयमुपाधिं यः सर्वमनुशयी पुमान् जीवः असौऽपि पुष्ट्रस्तानिस्य ८०

४ स्कं [illegible]

मु ३

त्विच्छेद कीदृशेन अनयाभक्त्याशितेन कथंभूतया अस्यभवतअनुसंस्मरेणनुवृत्तिः संवृत्तिर्यस्याः तयानिशितेन
११ किंच छिन्नान्यधीर्देहात्मबुद्धिर्यस्य यतोधिगतात्मगतिः अतएवनिरीहः प्राप्तासुसिद्धिषुनिस्पृहः येनवयुने
नज्ञानेनइदंसंशयपदंचिच्छेद तत् तत्यजे त्यक्तवान् तत्त्वयत्नोदयपरामेत्यर्थः तस्ययोगसिद्धिष्वपिनिस्पृ
हत्वंयुक्तमेवेत्याह तावन्नाप्रमत्तः किंतु प्रमत्तोभवति तस्यश्रीकृष्णस्यकथारतेत्वान्नतासुलोभोजातइत्यर्थः १२ १३

छिन्नान्यधीरधिगतात्मगतिर्निरीहस्तत्तत्यजेछिन्नदिदं वयुनेनयेन तावन्नयोगगतिरप्रमत्तोयावद्ग
दाग्रजकथासुरतिंनकुर्यात् १२ एवंसवीरप्रवरःसंयोज्यात्मानमात्मनि ब्रह्मभूतोदृढकालेतत्याजस्
कलेवरं १३ संपीड्यपायुंपार्ष्णिभ्यांवायुमुत्सारयन्शनैः नाभ्यांकोष्ठेष्ववस्थाप्यहृदुरःकंठशीर्षणि १४
उत्सर्पयंस्तुतंमूर्ध्निक्रमेणविश्वयनिस्पृहः वायुंवायोक्षितौकायंतेजस्तेजस्ययूयुजत् १५

देहत्यागप्रकारमाह संपीड्येति पंचभिः पायुंगुदंसंपीड्येतिमुक्तासनंसूचितं संपीड्यसीवनीसूक्ष्मांगुल्फेनै
वतुमध्यतः सव्येदक्षिणगुल्फेनमुक्तासनमितीरितं मूलाधाराद्वायुमुत्सारयन् ऊर्ध्वंनयन् नाभ्यामवस्थाप्य
पूर्वंदित्युत्तरेणान्वयः कोष्ठान्येवाह हृदादीनाहृदैकं शीर्षंमध्यंतस्मिन् १४ तंवायुं पाठांतरे एवमसून्प्राणानुत्सा
रयन् क्रमेणमूर्ध्निब्रह्मरंध्रेआवेश्य ततोदेहारंभकपंचभूतानिसमष्टिभूतेविलापितवान् तदाह वायुंवायोअस युजत् एकीकृतवान् [illegible] वायुंदेहगतंकरिणां
शांतितो १५

भा०च २५॥२६॥ भगवानुपधृतेराम्यतेऽनेनेति वितयातन्नैष्कर्म्यं ज्ञानं॥ ये च चलायुषोपि तेषामन्यद्देवादिपदं किमु दुर्लभं
८१॥ नकिंचिदित्यर्थः॥२७॥ अमत्कं शोचति॥ सर्वं वंचितं इति यतः आत्मनेदुर्हरितियोऽपवर्गः साधनं मानुष्यं लब्ध्वापि वि
देव्युवाच॥ अहो इयं वधूर्धन्या याचैवं भूभुजां पतिं॥ सर्वात्मना पतिं भेजे यज्ञेशं श्रीर्वधूरिव॥२५॥ सैषा नू
नं व्रजत्यूर्द्धमनुवैण्यं पतिं सती॥ पश्यतास्मानतीत्यार्चिर्दुर्विभाव्येन कर्मणा॥२६॥ तेषां दुरापं किं त्वन्य
न्मर्त्यानां भगवत्पदं॥ भुवि लोलायुषो ये वै नैष्कर्म्यं साधयन्त्युत॥२७॥ स वंचितो वतात्मध्रुक् कृच्छ्रेण म
हता भुवि॥ लब्ध्वापवर्ग्यं मानुष्यं विषयेषु विषज्जते॥२८॥ श्रीमैत्रेय उवाच॥ स्तुवतीष्वमरस्त्रीषु पति
लोकं गता वधूः॥ यं वा आत्मविदां धुर्यो वैण्यं प्रापाच्युताश्रयः॥२९॥ इत्थंभूतानुभावोसौ पृथुः स भग
वत्तमः॥ कीर्तितं तस्य चरितमुद्दामचरितस्य ते॥३०॥ य इदं सुमहत्पुण्यं श्रद्धयावहितः पठेत्॥ श्रावये
च्छृणुयाद्वापि स पृथोः पदवीमियात्॥३१॥ ब्राह्मणो ब्रह्मवर्चस्वी राजन्यो जगतीपतिः॥ वैश्यः पठन् वि
ट्पतिः स्याच्छूद्रः सत्तमतामियात्॥३२॥ त्रिः कृत्व इदमाकर्ण्य नरो नार्यथवादृताः॥ अप्रजः सुप्रज
तमो निर्धनो धनवत्तमः॥३३॥ अस्पष्टकीर्तिः सुयशा मूर्खो भवति पंडितः॥ इदं स्वस्त्ययनं पुंसाममंगल्यनिवारणं॥३४॥

षयेषासक्तिं याति॥२८॥ २९॥ ३०॥ ३१॥ विशां पश्वादीनां॥ वैश्यानां वा पतिः स्यात्॥३२॥ ३३॥ ३४॥ रामराम ८१

तुर्य्यांचतुर्थी २ शक्राल्लब्ध्वापृथोरश्वमेधेश्वविजयावसरे ३ अपत्यत्रयमेवाह पावकइति पुरावश्शापात्त
स्मान्मनुष्येषूत्पन्नाः सन्तः योगगतिं अग्नितत्त्वं प्राप्ताः ४ नभस्वत्यां अन्यासां भार्य्यायां अन्तर्द्धानविशेष

हर्य्यक्षायादिशत्प्राचींधूम्रकेशायदक्षिणां प्रतीचींवृकसंज्ञाय तुर्य्यांद्रविणसेविभुः २ अन्तर्द्धा
नगतिंशक्राल्लब्ध्वान्तर्द्धानसंज्ञितः अपत्यत्रयमाधत्त शिखण्डिन्यांसुसम्मतं ३ पावकः पवमानश्च शुचि
रित्यग्नयः पुरा वशिष्ठशापादुत्पन्नाः पुनर्योगगतिंगताः ४ अन्तर्द्धानोनभस्वत्यां हविर्द्धानम
विंदत यंइन्द्रमश्वहर्त्तारं विद्वानपि नजघ्निवान् ५ राज्ञांवृत्तिंकरादानदंडशुल्कादिदारुणं मन्य
६५ मानोदीर्घसत्रव्याजेनविससर्ज्जह ६ तत्रापिहंसंपुरुषंपरमात्मानमात्मदृक् यजंस्तल्लोकतामा
प कुशलेनसमाधिना ७ हविर्द्धानाद्धविर्द्धानी विदुरासूतषट्सुतान् वर्हिषदंगयंशुक्लंकृष्णंस
त्यंजितव्रतं ८ वर्हिषत्सुमहाभागोहाविर्द्धानिः प्रजापतिः क्रियाकांडेषुनिष्णातोयोगेषुचकुरूद्वह ९

णं यज्ञ इति एतेनशक्रादन्तर्द्धानगतिलाभेकारणमुक्तं ५ सचान्तर्द्धानोराज्ञांवृत्तिंकरादानादिभिर्दारुणींपर
पीडात्मिकांमन्यमानोविससर्ज्ज ६ हंतिस्वानांक्लेशमितिहंसः तंपुरुषंपूर्णंकुशलंपुण्यं तद्रूपेणसमाधिना ७८

३५॥ ३६॥ यद्यपि वर्ह्निफलानि भवंति तथापि मुक्तान्यसंग एवं श्रवणादि कुर्यात् ॥ ३७॥ महतो भगवतो माहात्म्य
स्य सूचकं पार्थिवीमिति पाठः ॥ ३५॥ प्रयच्छन्कीर्तयन्भव सिंधौ पोतः पादो यस्य ॥ ३८॥ इति चतुर्थे त्रयोदशः ॥ २३

धन्यं यशस्यमायुष्यं स्वर्ग्यं कलिमलापहं ॥ धर्मार्थकाममोक्षाणां सम्यक्सिद्धिमभीप्सुभिः ॥ ३५॥
श्रद्धयैतदनुश्राव्यं चतुर्णां कारणं परं ॥ विजयाभिमुखो राजा श्रुत्वैतदभियाति यान् ॥ बलिं तस्मै हरंत्य
ग्रे राजानः पृथवे यथा ॥ ३६॥ मुक्तान्यसंगो भगवत्यमलां भक्तिमुद्वहन् ॥ वैण्यस्य चरितं पुण्यं शृणुयाच्छ्रा
वयेत्पठेत् ॥ ३७॥ वैचित्रवीर्याभिहितं महन्माहात्म्यसूचकं ॥ अस्मिन्कृतमतिमर्त्यः पार्थिवीं गतिमाप्नु
यात् ॥ ३८॥ अनुदिनमिदमादरेण शृण्वन्पृथुचरितं प्रथयन्विमुक्तसंगः ॥ भगवति भवसिंधुपो
तपादे स च निपुणां लभते गतिं मनुष्यः ॥ ३९॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे त्रयोविंशो
ध्यायः ॥ २३ ॥ श्रीमैत्रेय उवाच ॥ विजिताश्वोऽधिराजासीत्पृथुपुत्रः पृथुश्रवाः यवीयोभ्यो ददात्काष्ठा
भ्रातृभ्यो भ्रातृवत्सलः १
एकादशभिरध्यायैः पृथोश्चरितमीरितं प्रचेतसामथाष्टाभिस्तन्मध्ये पंचभिः पितुः चतुर्विंशे
प्रपौत्रात्तु पृथोः प्राचीनबर्हिषः प्रचेतसां जनिस्तेभ्यो रुद्रगीतं च वर्ण्यते अधिराज आसीत्पृथोः यवीय

१५ १६ मुनयोपिसंत्यागेनात्मुमिष्टंयंदध्युरेवकेवलंनतुप्रापुः तेनशिवेन १७ ननुमुनीनांकिंतद्ध्यानेनघोरत्वादि
त्याशंक्याह आत्मारामोलोकरचनायाःपालनाय १८ गुर्वाज्ञाकारिणांशिवदर्शनंस्वतएवभवतीत्याशयेनाह
प्रचेतसइति १९ समुद्रमुपसमुद्रात्किंचिन्न्यूनं उपःअधिकेचितिकर्मप्रवचनीयः प्रसन्नाःसलिलाशयामत्स्यादयोय
२०
यदुक्तंपथिदृष्टेनगिरिशेनप्रसीदता तंध्यायंतोजपंतश्चपूज्यंतश्चयतोः॥ १४॥ विदुर उवाच॥ प्रचेत
सांगिरित्रेणयथासीत्पथिसंगमः यद्वाचाहहरःप्रीतस्तन्नोब्रह्मन्वदार्थवत्॥ १६॥ संगमःखलुविप्र
र्षेप्रिविनहिशरीरिणां दुर्लभोमुनयोदध्युरसंगाद्यमभीप्सितं॥ १७॥ आत्मारामोपियस्त्वस्यलोककल्पस्य
राधसे शक्त्यायुक्तोविचरतिघोरायाभगवान्भवः॥ १८॥ मैत्रेय उवाच॥ प्रचेतसःपितुर्वाक्यंशिरसादा
यसाधवः दिशंप्रतीचींप्रययुस्तपस्यादृतचेतसः॥ १९॥ सामुद्रमुपविस्तीर्णमपश्यन्सुमहत्सरः॥ मह
न्मनइवस्वच्छंप्रसन्नसलिलाशयं २० नीलरक्तोत्पलांभोजकह्लारेंदीवराकरं हंससारसचक्राह्वकारं
डवनिकूजितं २१ मत्तभ्रमरसौस्वर्यहृष्टरोमालतांघ्रिपं पद्मकोशरजोदिक्षुविक्षिपत्पवनोत्सवं २२

यस्मिन् २० नीलोत्पलादीनामाकरंजन्मस्थानं उत्पलांभोजकह्लाराणि रात्रिदिनसंध्याविकासीनि इंदीवरंनी
लोत्पलं तस्यपुनरुक्तिःप्राचुर्यज्ञापनार्थं हंसादिभिर्निकूजितं २१ मत्तानांभ्रमराणांसौस्वर्येणहृष्टरामाणांलतां

क्रियाकांडे निष्णातत्वमेवाह यस्येति इदं वसुधातलं देवयजनं यज्ञवाटं वितन्वतः तत्रैको यज्ञः कृतः तत्समीपं एव
यज्ञांतरं कुर्वतः संततः अतएव प्राचीनबर्हिरित्युच्यते १० समुद्रस्य कन्यां देवदेवेन ब्रह्मणोपदिष्टां शतद्रुतिं नाम किशो
रीं वाल्ये परिक्रमंतीं प्रदक्षिणां गच्छंतीं शुकीमिवेति एवं ह्याख्यायते सप्तर्षीणां सत्रे तद्भार्यादर्शनेनाग्निः कामसं
तप्तोऽभूत् तं च तद्भार्या स्वाहा नाम सप्तर्षिभार्यारूपधारिणी सती रमयामास रमयित्वा च तद्रेतः शुकीरूपेण धार

यस्येदं देवयजनमनुयज्ञं वितन्वतः प्राचीनाग्रैः कुशैरासीदास्तृतं वसुधातलं १० सामुद्रीं देवदे
वोक्तामुपयेमे शतद्रुतिं यां वीक्ष्य चारुसर्वांगीं किशोरीं सुष्ठ्वलंकृतां परिक्रमंतीमुद्वाहे चकमेऽग्निः
शुकीमिव ११ विबुधासुरगंधर्वमुनिसिद्धनरोरगाः विजिताः सूर्यया दिक्षु क्वणयंत्यैव नूपुरैः १२
प्राचीनबर्हिषः पुत्राः शतद्रुत्यां दशाभवन् तुल्यनामव्रताः सर्वे धर्मस्नाताः प्रचेतसः १३ पित्रादि
ष्टाः प्रजासर्गे तपसेऽर्णवमाविशन् दशवर्षसहस्राणि तपसार्च्चंस्तपस्पतिम् १४

स्तंभे निधायागच्छत् तां तथा सप्तर्षिभार्याभ्रांत्याऽग्निः कामितवान् तद्वदिति शुकीमिवेति पाठे स्तोकध
तधारामित्यर्थः ११ सूर्यया नवोढयैव विबुधादयो विजिताः अभिभूताः तच्च नूपुरैः पादौ क्वणयंत्यैव ध्व
निमात्रेणेत्यर्थः १२ तुल्यं नाम व्रतमाचारश्च येषां धर्मस्नाताः धर्मपारगाः १३ तपसा तपसांपतिं हरिं अर्चयां

भागः ५८

अथ भागवतत्वाद्यूयं मे प्रियाः स्थ भवद्भिरपि मयि प्रीतिः कार्येत्याशयेनाह मदन्यो भागवतानां च प्रेयान्नास्ति ३०
३० अत इदं जप्यं प्रवक्ष्ये श्रूयतामिति विविक्तमसंकीर्णं यथा भवति ३१ ३२ स्वधाम्नादौ ब्रह्मणा दृष्टा पुत्रेभ्यः प्राक्तमि
दं स्तोत्रं प्राह प्रचेतेभ्यः कृपया भगवान् शिवः ते जितं तत्वोत्कर्षः आत्मविद्धुर्याणां स्वस्तये शोभनसत्तायै स्वानंदला
भायेत्यर्थः अतो मे स्वस्तिः स्वानंदसत्तास्तु ननु ममोत्कर्षो मदर्थ एव किं न स्यात्तत्राह भवता राधसा स्वानंदरूपेण सि

अथ भागवता यूयं प्रियाः स्थ भगवान्यथा न मद्भागवतानां च प्रेयानन्योस्ति कर्हिचित् ॥३०॥ इदं विवि
क्तं जप्तव्यं पवित्रं मंगलं परं नैःश्रेयसकरं चापि श्रूयतां तद्वदामि वः ॥३१॥ मैत्रेय उवाच ॥ इत्यनुक्रो
शहृदयो भगवानाह तान् शिवः बद्धांजलीन् राजपुत्रान् नारायणपरो वचः ॥३२॥ श्रीरुद्र उवाच ॥ जि
तं त आत्मविद्धुर्यस्वस्तये स्वस्तिरस्तु मे भवताराधसा राद्धं सर्वस्मा आत्मने नमः ३३ नमः पंकजना
भाय भूतसूक्ष्मेंद्रियात्मने वासुदेवाय शांताय कूटस्थाय स्वरोचिषे ३४

द्धः स्वपरमानंदरूपेणैव नित्यं स्थित इत्यर्थः अत एवंभूतायात्मने तुभ्यं नमः सर्वस्मै सर्वरूपाय च ३३ सर्वस्वरू
पत्वं प्रपंचयन् प्रणमति सार्द्धदशभिः पंकजं लोकात्मकं नाभौ यस्य तस्मै कारणात्मने नमः कारणत्वादेव
सूक्ष्माणां प्राणिनां उपाधयः भूतानि सूक्ष्माणि इंद्रियाणि च तेषामात्मने नियंत्रे अंतःकरणचतुष्टयाधिष्ठातृत्वेन
प्रणमति चतुर्भिः श्लोकार्द्धैः वासुदेवाय चित्ताधिष्ठात्रे कूटस्थाय निर्विकाराय चित्तस्यैकरूपत्वात्

तत्र मृदंगपणवादिवाद्यमनुपश्चाद्दिव्यैर्मार्गैर्भेदैर्मनोहरं गांधर्वं गानमाकर्ण्य विस्मयं प्राप्ताः पाठांतरे मृदंगप
णवतूर्यस्तत्तु तेषां ध्वनिमतिरस्कुर्वदित्यर्थः २३ ते च त्रिलोचनं वीक्ष्य जाताश्चर्याः प्रणेमुरित्युत्तरेणान्वयः २४ तप्त
हेमराशिसदृशकांतिं शितिनीलः कंठो यस्य तं २५ २६ वेदिषदः बर्हिषदः चिकीर्षितं भगवदाराधनं विदितं

तत्र गांधर्वमाकर्ण्य दिव्यमार्गमनोहरं विसिस्म्यू राजपुत्रास्ते मृदंगपणवाद्यनुः ॥२३॥ तर्ह्येव सरसस्तस्मा
न्निष्क्रामंतं सहानुगं ॥ उपगीयमानममरप्रवरं विबुधानुगैः ॥२४॥ तप्तहेमनिकायाभं शितिकंठं त्रिलोचनं ॥ प्र
सादसुमुखं वीक्ष्य प्रणेमुर्जातकौतुकाः ॥२५॥ स तान्प्रपन्नार्तिहरो भगवान्धर्मवत्सलः ॥ धर्मज्ञान्शील
संपन्नान्प्रीतान्प्रीत उवाच ह ॥२६॥ श्रीमहादेव उवाच ॥ यूयं वेदिषदः पुत्रा विदितं वश्चिकीर्षितं ॥ अनु
ग्रहाय भद्रं व एवं मे दर्शनं कृतं २७ यः परं रंहसः साक्षात्त्रिगुणाज्जीवसंज्ञितात् भगवंतं वासुदेवं प्रप
न्नः स प्रियो हि मे २८ स्वधर्मनिष्ठः शतजन्मभिः पुमान्विरंच्यतामेति ततः परं हि मां अव्याकृतं भागवतोथ वै
क१ ष्णवं पदं यथाहं विबुधाः कलात्यये २९

२७ अनुग्रहे कारणमाह यः साक्षाद्वासुदेवं प्रपन्नः स हि मे प्रियः कथंभूतं रंहसः सूक्ष्मात्प्रधानात् पुरुषाच्च परं प्रकृति
पुरुषयोर्नियंतारमित्यर्थः २८ तर्हि किं तत्साम्यं हन्त मत्त्वादित्याह स्वधर्मनिष्ठः पुमान्नेव द्रुभिर्जन्मभिर्विरंच्यतां प्राप्नोति ततो
पि पुण्यातिशयेन मामेति भागवतस्तु अथ देहांते अव्याकृतं प्रपंचातीतं वैष्णवं पदमेति यथाहं रुद्रो भूत्वा आधिकारिकः प्रव
र्तमानः विबुधा देवाश्चाधिकारिकाः कल्पात्यये अधिकारांते लिंगभंगे सत्येष्यंति २९

स्व२

भा० च० नभसे आकाशाय अर्थानां लिंगाय ज्ञापकाय शब्दगुणत्वात् अंतर्बहिरात्मने अंतर्बहिश्चैव हारालंबनाय एवं महाभूत
८५ रूपत्वमुक्तं अमुष्मै सर्गाय भूरिवर्चसे एषवैज्योतिष्मंतं पुण्यं लोकं यातीति श्रुतेः ४० प्रवृत्ताय च कर्मणे पितृदेवाय यथा
क्रमं पितृदेवप्राप्तिफलाय अधर्मफलरूपाय च मृत्यवे ४१ हे ईश आशिषां कारणात्मने सर्वकर्म्मफलदात्रे मन
वे सर्वज्ञाय मंत्रात्मकायेतिवा विष्णुत्वेन प्रणमति बृहते धर्माय परमधर्मात्मने कृष्णाय ४२ रुद्ररूपेण प्रणम

अर्थलिंगाय नभसे नमोऽन्तर्बहिरात्मने नमः पुण्याय लोकाय अमुष्मै भूरिवर्चसे ४० प्रवृत्ताय निवृत्ता
य पितृदेवाय कर्मणे नमो धर्मविपाकाय मृत्यवे दुःखदाय च ४१ नमस्त आशिषामीश मनवे कार
णात्मने नमो धर्माय बृहते कृष्णायाकुंठमेधसे ४२ पुरुषाय पुराणाय सांख्ययोगेश्वराय च शक्तित्रय चो२
समेताय मीढुषेऽहंकृतात्मने ४३ चेत आकूतिरूपाय नमो वाचो विभूतये दर्शनं नो दिदृक्षूणां देहि भागव
तार्चितं रूपं प्रियतमं स्वानां सर्वेंद्रियगुणांजनं ४४ तिमीढुषे रुद्राय अहंकृतमहदात्मने स च कर्तृकारणकर्मेश

कारस्त्वदा१ क्तित्रयसमेतस्तस्मै ४३ ब्रह्मत्वेन प्रणमति चेतो ज्ञानं आकूतिः क्रियां तद्रूपाय वाचोविविधाभूतिः सृष्टिर्यस्मात्तस्मै ए
वं नमस्कृत्य दर्शनं प्रार्थयते दर्शनमिति नवभिः भागवतैः सत्कृतं दर्शितं देहात्यस्य विचरणं रूपमित्यादि प्रदर्शयेत्यंते
स्वानां भक्तानां प्रियतमं रूपं प्रदर्शयेति नवमेनान्वयः सर्वेषामिंद्रियाणां ये गुणा विषयास्तेषामंजनं व्यंजकं सर्वेंद्रिय ८५
विषयरूपमित्यर्थः सर्वेंद्रियाणि स्वगुणैरनक्ति रंजयतीतिवा ४४

नमः परमहंसाय पूर्णाय निभृतात्मने २

संकर्षणाय अहंकाराधिष्ठात्रे सूक्ष्माय दुरंताय अनंताय अंतकाय मुखाग्निना लोकदाहकाय विश्वस्य प्रकृष्टो बोधो यस्मा
त् अंतरात्मने बुद्ध्यधिष्ठात्रे ३५ हृषीकाणामीशाय दिंद्रियं मनः तदात्म सूर्य्यरूपेण प्रणमति परमहंसाय सूर्य्याय पूर्णा
य तेजसा विश्वव्यापिने निभृतात्मने क्षयवृद्धिशून्याय ३६ स्वर्गापवर्गद्वाराय च शुचिन्यंतःकरणे निषीदतीति शुचिषदे
तस्मै हंसः शुचिषदिति श्रुतेः हिरण्यं वीर्य्यं यस्य तस्मै अग्निरूपाय चातुर्होत्रं कर्म तस्मै तत्साधनायेत्यर्थः कुतः तंतवे

संकर्षणाय सूक्ष्माय दुरंतायांतकाय च नमो विश्वप्रबोधाय प्रद्युम्नायांतरात्मने ३५ नमो नमो निरु
द्धाय हृषीकेशेंद्रियात्मने ३६ स्वर्गापवर्गद्वाराय नित्यं शुचिषदे नमः नमो हिरण्यवीर्य्याय चातुर्हो
त्राय तंतवे ३७ नम ऊर्ज्ज इषे त्रय्याः पतये यज्ञरेतसे तृप्तिदाय च जीवानां नमः सर्वरसात्मने
३८ सर्वसत्वात्मदेहाय विशेषाय स्थवीयसे नमस्त्रैलोक्यपालाय सहओजोबलाय च ३९

तद्विस्तारकाय ३७ सोमत्वमाह ऊर्ज्जे पितॄणामन्नाय इषे देवानामन्नाय यज्ञरेतसे सोमाय सहि पितॄणां
देवानां चान्नं एवं रूपाय त्रय्याः पतये हरये नमः सूर्य्याग्निसोमत्वेनैव तेजस्त्वमुक्तं जलत्वमाह सर्वर
सात्मने जलरूपाय ३८ विशेषाय पृथ्वीरूपाय सर्वेषां सत्वानां प्राणिनां आत्मनस्तेषां देहाय स्थवीयसे विरा
ट्देहाय च त्रैलोक्यपालाय वायवे सहओजादिरूपाय सहि प्राणिरूपेण त्रैलोक्यं पालयति सहओजादिधर्माय ३९

भा० च० श्वासोच्छूभ्यां संविग्ना चंचलायावलयस्ताभिर्वल्गुदलवदश्वत्थपत्रसदृशमुदरं यस्मिन् प्रतिसंक्रामयत् यतो
८६ निर्गतं तेनैव मार्गेण द्वारेण पुनः प्रवेशयदिव ५० श्यामश्रोण्याधिकं रोचिष्णु यत्पीतं दुकूलं तत्र स्वर्णमयी मेखला
यस्मिन् अंघ्री च जंघे च ऊरू च निम्ने अनुन्नते जानुनी च समैः श्लाघ्यैः रुचिरैः शोभनं दर्शनं यस्य समश्चारुवोऽघ्रा
दयो यस्मिन् निम्ने जानुनी यस्मिन् शोभनं दर्शनं यस्येति पदत्रयं वा ५१ पदाद्वीपस्थानीयेन पद्मा एवं भूतेन पदे

कृ पुरैश्चैकसंविग्नवलिवल्गुदरोदरं प्रतिसंक्रामयद्विश्वं नाभ्यावर्तगभीरया ५० श्यामश्रोण्यधिरो
चिष्णुदुकूलस्वर्णमेखलं समचार्वंघ्रिजंघोरुनिम्नजानुसुदर्शनं ५१ पदा शरत्पद्मपलाशरोचि
षा नखद्युभिर्नोऽन्तरघं विधुन्वता प्रदर्शय स्वीयमपास्तसाध्वसं पदं गुरो मार्गगुरुस्तमोजुषाम् ५२
एतद्रूपमनुध्येयमात्मशुद्धिमभीप्सतां यद्भक्तियोगोऽभयदः स्वधर्ममनुतिष्ठतां ५३ भवान्भक्तिम
तां लभ्यो दुर्लभः सर्वदेहिनां स्वाराज्यस्याप्यभिमत एकान्तेनात्मविद्गतिः ५४

पलक्षितं रूपं प्रदर्शयेत्यर्थः शरदि यत्पद्मं तस्य पलाशं तद्वद्रोचिर्यस्य तेन नखद्युतिभिर्मे तमेवमघमज्ञानं विधु
न्वता स्वीयरूपपदं शरणं प्रदर्शय अपास्तं प्रज्ञादादीनां साध्वसं येन तत् हे गुरो यतस्त्वमेव तमोजुषामज्ञानां
मार्गप्रदर्शको गुरुः ५२ अतिदुर्लभमिदं मया प्रार्थितमिति स्तोत्रैवीह एतद्रूपं ध्येयं ध्यानार्हं एवमनु तु प्रत्यहं ततः
प्राप्यमित्यर्थः ५३ नहि किं केनापि न प्राप्यते तत्राह भवानिति दुर्लभत्वमेवाह स्वर्गराज्यं यस्य तस्याप्यभिमतः स्पृह

स्निग्धः प्रावृषि यो धनः तत्श्यामं सर्वेषां सौंदर्याणां संग्रहो यस्मिन् चारवश्चायताश्चत्वारो बाहवो यस्मिन् सुजातं
यथोचितं सर्वावयवं रुचिमाननं यस्मिन् ६५ पद्मस्य कोशमध्ये यानि पलाशानि तद्वदीक्षिणी यस्मिन् सुकपो
लमास्यं यस्मिन् समौ कर्णौ विभूषणं यस्य कुंडलयोरग्रे व्यमाणत्वात् ६६ प्रीत्या प्रहसिता विलापांगो यस्मिन् ६७
स्फुरंति किरीटादीनि यस्मिन् शंखादिमत् उत्तमर्द्धिर्लक्ष्मीः यद्वा एतैरुत्तमा ऋद्धिः उत्कर्षो यस्यास्तित्तत् ६८ सौभग

स्निग्धप्रावृड्घनश्यामं सर्वसौंदर्यसंग्रहं चार्वायतचतुर्बाहुं सुजातरुचिराननं ६५ पद्मकोशप
लाशाक्षं सुंदरभ्रू सुनासिकं सुद्विजं सुकपोलास्यं समकर्णविभूषणं ६६ प्रीतिप्रहसितापांगमल
केरुपशोभितं लसत्पंकजकिंजल्कदुकूलं मृष्टकुंडलं ६७ स्फुरत्किरीटवलयहारनूपुरमेखलं शं
खचक्रगदापद्ममालामण्युत्तमर्द्धिमत् ६८ सिंहस्कंधत्विषो बिभ्रत्सौभगग्रीवकौस्तुभं श्रियानपायि
न्या क्षिप्तनिकषाश्मोरसोल्लसत् ६९

युक्ता ग्रीवा येन सिंहस्य कंधे परितः प्रसरंतः केशरा एव त्विषः ताः दृशीः सर्वतः त्विषा बिभ्रच्चासौ सौभगग्रीवः कौ
स्तुभो यस्मिन् यद्वा सिंहस्येव योस्कंधौ तयोस्त्विषः कुंडलहारादिदीप्तिं बिभ्रदिति पृथग्विशेषणं सौभगयु
क्ता ग्रीवा येन स कौस्तुभो यस्मिन् श्रिया हेतुभूतया क्षिप्तस्तिरस्कृतो निकषाश्मा स्वर्णरेखांकितो निकषणपाषाणो
येन तादृशेनोरसा उल्लसच्छोभमानं ६९

तत्वज्ञानं च त्वद्भक्तसंगाद्भवतीत्याह नयस्येति तेषां सतां भक्तियोगेनानुगृहीतं शुद्धं सत्यस्य चित्तं बाह्यार्थविक्षिप्तं न भ
वति तमोरूपायां गुहायां च नाविशत् लयं न प्राप तत्र तदा स मुनिः तव गतिं तत्वं पश्यति ॥५९॥ कीदृशं तत्वं तदाह यत्रे
ति ॥६०॥ जगत उपादानत्वेन तत्वं विलक्षितं निमित्तत्वेनापि तदेव लक्षयन्नाह इदं विश्वं सदिव परमार्थमिवासृजत् ॥

न यस्य चित्तं बहिरर्थविभ्रमं तमोगुहायां च विशुद्धमाविशत् यद्भक्तियोगानुगृहीतमंजसा मु
निर्विचष्टे ननु तत्र ते गतिं ॥५९॥ यत्रेदं व्यज्यते विश्वं विश्वस्मिन्नवभाति यत् तत्वं ब्रह्म परं ज्योतिराका
शमिव विस्तृतं ॥६०॥ यो माययेदं पुरुरूपयासृजद्बिभर्ति भूयः क्षपयत्यविक्रियः यद्भेदबुद्धिः सदिवात्म
दुःस्थया तमात्मतंत्रं भगवन्प्रतीमहि ॥६१॥ क्रियाकलापैरिदमेव योगिनः श्रद्धान्विताः साधु यजंति
सिद्धये भूतेंद्रियांतःकरणोपलक्षितं वेदे च तंत्रे च त एव कोविदाः ॥६२॥

कथंभूतया यत्तया भेदबुद्धिरन्येषां भवति तया आत्मनि त्वयि दुःस्थया स्वकार्यं कर्तुमसमर्थया तं त्वां निरस्तभेदं प्रतीम
हि जानीमः ॥६१॥ यद्यपि त्वमेव निर्भेदं ब्रह्म तथापि प्रागुक्तं साकारं तव रूपं ये यजंति त एव वेदागमतत्वज्ञा इत्याह क्रिया
कलापैरन्यैः कर्मयोगिनः पूजयंति त एव कोविदाः न त्वेतदनादृत्य केवलज्ञाने प्रवृत्ताः तंत्रे आगमे कथंभूतं इदं भू
तेंद्रियांतःकरणैः स्वतंत्रैर्यदुपलक्षितं तेनियंतृरूपं तत् ॥६२॥ ८७

अतस्त्वद्व्यतिरेकेण न किंचिद्वांछामीत्याह तं त्वामेकांतभक्त्या आराध्य वहिः स्वर्गादिसुखं ५४ तत्र हेतुः यत्र पा
दमूले शरणं प्रविष्टं कृतांतः कालो समायं वश्य इति नाभिमानं करोति किं कुर्वन् वीर्यप्रभावः शौर्यं उत्साहः ताभ्यां वि
स्फूर्जितया भ्रुवा विश्वं विध्वंसयन्नपि ५६ त्वत्पादमूले प्रविष्टस्य कृतांतभयाभावः यावत्तावद्भक्तिसंग एव सक
लेषु पुरुषार्थेश्रो शिशिरशिनरीनतीत्याह भगवतस्तव संगिनां संगस्य क्षणार्द्धेनापि स्वर्गं तुल्यये समं न गणयामि

तं दुराराध्यमाराध्य सतामपि दुरापया एकांतभक्त्या को वांछेत्पाद मूलं विना वहिः ५५ यत्र निर्विष्टम
रणं कृतांतो नाभिमन्यते विश्वं विध्वंसयन्वीर्य्यशौर्य्यविस्फूरितभ्रुवा ५६ क्षणार्द्धेनापि तुलयेन स्वर्गं नापु
नर्भवं भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः ५७ अथानघांघ्रेस्तव कीर्त्तितीर्थयोरंतर्वहिःस्नानवि
धूतपाप्मनां भूतेष्वनुक्रोशसुसत्वशीलिनां स्यात्संगमोनुग्रह एव नस्तव ५८

न चापुनर्भवं मोक्षम् मर्त्यानां आशिषो राज्याद्याः किमुत ५७ अथ अतो हेतोः अनघो अघहरावंघ्री यस्य
तस्य तव कीर्तिर्यशः तीर्थं गंगा तयोः क्रमेणांतर्वहिः स्नानाभ्यां विधूतः पाप्मा येषां अतएव भूतेष्वनुक्रोशः कृ
पा सुसत्वं च रागादिरहितं चित्तं शीलं विचार्य्यवादि विद्यते तेषां संगमोऽस्माकं स्यात् एष एव नस्त्वदनुग्रहः ५८

भा० च०
८८

विकर्षणप्रकारमाह प्रमत्तमिति इति कृत्यं एवमेव कर्तव्यमिति चिंतयोच्चैः प्रमत्तं तत्र हेतुः विषयेषु लालसं
अतिकामुकं प्राप्तेपि विषये प्रवृद्धलोभं अंतकस्त्वमभिपद्यसे आक्रामसि क्षुधा लेलिहानः जिह्वया ओष्ठप्रांतौ स्पृ
शन् सर्पो मूषकमिव ६६ अतः कस्तव पदाब्जं त्यजेत पंडितश्चेत् कथंभूतः यस्तवावमानोऽनादरस्तेन व्ययमानं के

प्रमत्तमुच्चैरितिकृत्यचिंतया प्रवृद्धलोभं विषयेषु लालसं त्वमप्रमत्तः सहसाभिपद्यसे क्षुल्लेलिहानोहिरि
वाखुमंतकः ६६ कस्त्वत्पदाब्जं विजहाति पंडितो यस्तेवमानव्ययमानकेतनः विशंकयास्मद्गुरुरर्चति
स्म यद्विनोपपत्तिं मनवश्चतुर्दश ६७ अथ त्वमसि नो ब्रह्मन् परमात्मन् विपश्चितां विश्वं रुद्रभयध्व
स्तमकुतश्चिद्भया गतिः ६८ इदं जपत भद्रं वो विशुद्धा नृपनंदना स्वधर्ममनुतिष्ठंतो भगवत्यर्पिता
शयाः ६९ तमेवात्मानमात्मस्थं सर्वभूतेष्ववस्थितं पूजयध्वं गृणंतश्च ध्यायंतश्चासकृद्धरिं ७०
योगादेशमुपासाद्य धारयंतो मुनिव्रताः समाहितधियः सर्व एतदभ्यसतादृताः ७१

तनं शरीरं यस्य सः यदस्माकं गुरुर्ब्रह्मा अर्चति स्मेति सर्वेषां स्तोतॄणां वाक्यं विशंकया विनोपपत्तिमिति दृढविश्वा
सेन मनवश्चार्चंति स्म ६७ उपसंहरति अथेति रुद्रभयेन ध्वस्तं अतः कुतः कुतश्चिद्भयं यस्यां तादृशी गतिरसि ६८
६९ ७० योगादेशं नामैतत्स्तोत्रं उपासाद्य पाठतः प्राप्य मनसा धारयंत अभ्यासेन जपत ७१ रामरामराम

ननुअभिन्नेष्वपिभेदंकुर्वतस्संतःकथंतेकोविदाः नहितैर्भेदःक्रियते स्वयैव क्रीडार्थंचेतनाचेतनात्मकोभेदःकृतइ
त्याह त्वमिति आद्यस्त्वमेकएववस्तु प्रामायाख्याशक्तिर्यस्य पश्चात्तयाप्रकृत्यारजःसत्वतमसांद्वैधं यतोरजआदेर्म
हानहंकारः खंचमरुदग्निवार्धराश्च वाःउदकं सुराश्चऋषयश्चभूतगणाश्चएवमिदंजगद्यतोभवतितंहिभि
द्यतइत्यन्वयः ६२ एतदुपपादयति सृष्ट्वेति जरायुजांडजस्वेदोद्भिज्जरूपेण चतुर्विधंस्वांशेनप्रविष्टः अथो
इतिहेतौ पुरस्यांतःसंतमंशंचिदाभासं पुरिशयनात्पुरुषंविदुः तर्हि किमीश्वरमेव संसारिणंविदुःनेत्याह

त्वमेवआद्यंपुरुषःसुप्तशक्तिस्तयारजस्सत्वतमोविभिद्यते महानहंखंमरुदग्निवार्धराःसुरर्षयोभू
तगणाइदंयतः ६३ सृष्टंस्वशक्त्येदमनुप्रविष्टश्चतुर्विधंपुरमात्मांशकेन अथोविदुस्तंपुरुषंसंतमं
तर्भुंक्तेहृषीकैर्मधुसारघंयः ६४ सएवलोकानतिचंडवेगोविकर्षसित्वंखलुकालयानः भूतानिभूतै
रनुमेयतत्वोघनावलीर्वायुरिवाविषह्यः ६५

सरघामधुमक्षिकास्ताभिःसृष्टंमधुइवतुच्छकविषयसुखंअविद्यावृतःसन्योभुंक्तेतंजीवंविदुः तथाचश्रु
तिः तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीतीति निर्गतंच गुहांप्रविष्टावात्मानौहितद्दर्शनादित्य
त्र ६४ तवतुसर्वनियंतुःकुतःसंसारइत्याह स्वशक्त्येदंसृष्टवान् सएवत्वंभूतैर्भूतानिमेघपंक्तीर्वायुरिव
कालयन्विचालयन्लोकान्विकर्षसि संहरसि अनुमेयतत्वः अलक्ष्यस्वरूपः ६५

भा०चं० ८६

पुरंजनकथाव्याजात्पंचविंशे तु नारदः आत्मनो बुद्धिसंगेन विविधामाह संसृतिं १ प्रचेतस्सु तपस्स्वीं प्र
तप्यमानेषु नारदः पुरंजनकथाकूटं प्राह प्राचीनबर्हिषे २ प्रचेतस्सु तपश्चरत्सु नारदः प्राचीनबर्हिषे वी
धितवान् ३ अतः प्रचेतसां कथामेममाप्यैव तत्पितुर्वृत्तमाह प्राचीनबर्हिषमिति श्रेयःफलं ईहसे इच्छसि

मैत्रेय उवाच ॥ इति संदिश्य भगवान्बार्हिषदैरभिपूजितः पश्यतां राजपुत्राणां तत्रैवांतर्दधे हरः १
रुद्रगीतं भगवतः स्तोत्रं सर्वे प्रचेतसः जपंतस्ते तपस्तेपुर्वर्षाणामयुतं जले ॥ २ ॥ प्राचीनबर्हिषं
क्षत्तः कर्मस्वासक्तमानसं ॥ नारदोऽध्यात्मतत्त्वज्ञः कृपालुः प्रत्यबोधयत् ॥ ३ ॥ श्रेयस्त्वं कतम
द्राजन्कर्मणात्मन ईहसे ॥ दुःखहानिः सुखावाप्तिः श्रेयस्तन्नेह चेष्यते ॥ ४ ॥ राजोवाच ॥ न जाना
मि महाभाग परं कर्मापविद्धधीः ॥ ब्रूहि मे विमलं ज्ञानं येन मुच्येत कर्मभिः ॥ ५ ॥ गृहेषु कूटध
र्मेषु पुत्रदारधनार्थधीः ॥ न परं विंदते मूढो भ्राम्यन्संसारवर्त्मसु ॥ ६ ॥ नारद उवाच ॥ भो भोः प्रजा
पते राजन्पशून्पश्य त्वयाध्वरे ॥ संज्ञापितान्जीवसंघान्निर्घृणेन सहस्रशः ॥ ७ ॥

इह कर्मणि तदुभयं नेष्यते विचारकैः ४ परं श्रेयः मोक्षं कर्मभिरपविद्धा विक्षिप्ता धीर्यस्य ५ किंच गृ
हेषु स्थितः पुत्रादिष्वेव पुरुषार्थधीर्यस्य ६ कर्मफलेषु वैराग्यमुत्पाद्य ब्रह्मविद्यामुपदेष्टुं योगान्तु भावेन

यज्ञपशून्प्रत्यक्षं प्रदर्श्याह भोभोइति संज्ञापि
तान् मारितान् ७

८६

विश्वसृजां पतिर्ब्रह्मा ७२ सिसृक्षवः स्रष्टवंतः ७३ युक्तः एकाग्रचित्तः ७४ ज्ञानमेव नौर्यस्य ७५ योधीयानो भवति
असौ ७६ अमुष्माद्धरेः असत्वरन् मद्गीतं स्तोत्रं तेन गीतात् स्तुतात् एक एव वल्लभः प्रियः आश्रयस्तस्मात् ७७ कल्ये

इदमाह पुरास्माकं भगवान्विश्वसृक्पतिः भृग्वादीनामात्मजानां सिसृक्षुः संसिसृक्षतां ७२ ते वयं
चोदिताः सर्वे प्रजासर्गे प्रजेश्वराः अनेन ध्वस्ततमसः सिसृक्ष्मो विविधाः प्रजाः ७३ अथेदं नित्यदा युक्तो
धि जपन्नवहितः पुमान् अचिराच्छ्रेय आप्नोति वासुदेवपरायणः ७४ श्रेयसामिह सर्वेषां ज्ञानं निःश्रेयसं रा ४
परं सुखं तरति दुष्पारं ज्ञाननौर्व्यसनार्णवं ७५ य इदं श्रद्धया युक्तो मद्गीतं भगवत्स्तवं ॥ अधीयानो दुराराध्यं
हरिमाराधयत्यसौ ७६ विंदते पुरुषोऽमुष्माद्यद्यदिच्छत्यसत्वरं ॥ मद्गीतगीतात्सुप्रीताच्छ्रेयसामेक
वल्लभात् ॥ ७७ इदं यः कल्य उत्थाय प्रांजलिः श्रद्धयान्वितः ॥ शृणुयाच्छ्रावयेन्मर्त्यो मुच्यते कर्मबंधनैः
७८ गीतं मयेदं नरदेवनंदनाः परस्य पुंसः परमात्मनस्तवं ॥ जपंत एकाग्रधियस्तपो महच्चरध्वमंते तत
आप्स्यथेप्सितं ॥ ७९ ॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे रुद्रगीतं चतुर्विंशोऽध्यायः ॥ २४ ॥

उवसि ॥ ७८ ॥ तपश्चरत अंते तपसोऽन्ते ईप्सितं प्राप्स्यथ ॥ ७९ ॥ इति चतुर्थे चतुर्विंशः ॥ २४ ॥ प्रचेतसस्तु तपस्यत्सु
तत्पित्रे नारदोऽदृष्टे ॥ प्राचीनबर्हिषे ध्यात्मं परोक्षेणाह पंचभिः ॥ राम राम राम राम राम राम राम राम

भा०चं०
६०

हिमवतोदक्षिणेषुसानुषु कर्मक्षेत्रे भारतवर्षे पुरंमनुष्यशरीरं मनुष्यशरीरंलक्षितानिदृष्टानिसर्वाणि
लक्षणानियस्यां अंधंयंतुत्वादिदोषरहितमित्यर्थः १३ तामनुवर्णयतित्रिभिः अत्रकिंचित्किंचित्सादृश्यम
वलंब्यकथासौंदर्यायप्राकारादीनिवर्ण्यंते परिखैरिति पुंस्त्वमार्षं अत्राणिगवाक्षालयादयः शरीरावयवाः
प्राकारादिपुरावयवत्वेननिरूप्यंते स्वर्णादिशिखरैर्युक्तायेगृहास्तैःसंकुलामिति आधारादिचक्राणिगृहाःस्व

सएकदाहिमवतोदक्षिणेष्वथसानुषु ददर्शनवभिर्द्वार्भिःपुरंलक्षितलक्षणं१३ प्राकारोपवना
ट्टालपरिखैरक्षतोरणैः स्वर्णरौप्यायसैःशृंगैःसंकुलांसर्वतोगृहैः १४ नीलस्फटिकवैडूर्यमु
क ३ क्तामरकतारुणैः क्लृप्तहर्म्यस्थलींदीप्तांश्रियाभोगवतीमिव १५ सभाचत्वररथ्याभिराक्रीडायतनाप
णैः चैत्यध्वजपताकाभिर्युक्तांविद्रुमवेदिभिः १६ णाणि तत्रराजसादिस्वभावाविवक्षिताः १४ नीलादि
भिः क्लृप्ताहर्म्यस्थलीयस्यां अरुणंमाणिक्यंस्थलीहृदयं नाड्योनीलादिभावेनरूप्यंते तद्विषयवासनाभोगवती
नामानंपुरीमिव १५ सभासमाजस्थानंचत्वरंचतुष्पथं रथ्याराजमार्गः आक्रीडायतनं द्यूतादिस्थानं आप
णाहट्टास्तैः चैत्यंजनानांस्थानं ध्वजेषुपताकास्ताभिश्चयुक्तां अत्रचविषयनिष्ठःबुद्धियोगेनजीवस्यदेहसंबं
धइतिविवक्षयाविषयवर्गंबाह्योपवनत्वेननिरूपयति तद्विशेषान्स्रक्चंदनादीन्विद्रुमलतादिभावेनप्रो

६०

एतेत्वांसंपरेतंमृतंसंप्रणीतंतेवैशसंत्वत्कृतांपीडांस्मरंतः ततस्त्वायःकूटैःलोहयंत्रमयैःशृंगैश्छिंदंतिछेत्स्यंति ८ अत्रत्रस्मिन्संकटेनिस्तारकममुमितिहासंकथयिष्यामि ९ अत्रजीवस्यविषयाशक्त्यासंसारःसचेश्वरा
नुग्रहेणनिवर्ततेनत्वितिवक्तुंविपर्ययग्रहीतस्यसाक्षाद्बोधयितुमशक्तेःराजवृत्तांतमाह आसीदितिपुरं
पंच ४ जनादीनस्वयमेवेतः[illegible]मेध्यायेव्याख्यास्यति तथापिसुखग्रहणाययथोपयोगंकिंचित्किंचिद्व्याख्यास्या

टी १ एतेत्वांसंप्रतीक्षंतेस्मरंतोवैशसंतव संपरेतमयःकूटैश्छिंदंत्युत्थितमन्यवः ८ अत्रतेकथयि
ष्येमुमितिहासंपुरातनं पुरंजनस्यचरितंनिबोधगदतोमम ९ आसीत्पुरंजनोनामराजाराज
न्बृहच्छ्रवाः तस्याविज्ञातनामासीत्सखाविज्ञातचेष्टितः १० सोन्वेषमाणःशरणंबभ्रामपृथि
वींप्रभुः नानुरूपंयदाविंददभूत्सविमनाइव ११ नसाधुमेनेताःसर्वाभूतलेयावतीःपुरः कामान्का
मयमानोसौतस्यतस्योपपत्तये १२
मः तत्रस्वकर्मभिःपुरंजनयतीतिपुरंजनोजीवः नविज्ञातंनामयस्यनवविज्ञातंचेष्टितंयस्यईश्वरस्तस्यसखा श्रीमद्भागवत ४९
यद्वाविज्ञातंचेष्टितंजीवप्रेरणादिलक्षणंयस्यजीवपारतंत्र्यस्यानुभवसिद्धत्वात् १० शरणंभोगायतनं
देहं ११ यावत्यःपुरस्तास्तस्यकामस्योपपत्तयेप्राप्त्यैसाधुनमेनेगवादिदेहानामैहिकपारलौकिकभोग
भोग्यत्वाभावात् तथाचश्रुतिः ताभ्योगामानयन्ताअब्रुवन्नवैनोयमलमितिताभ्योऽश्वमानयन्ता अब्रुवन्न

भा० चं० ५१ अन्यमयं हि सौम्य मन इति यत्कसंततदलस्यात्यादिश्रुत्यनुसारेणश्यामामित्युक्तं नूपुरैः क्वणद्भिः नूपुरे
णपदं गुलीयकानामथ उपलक्षणमिदं कङ्कणवचनं २३ व्यञ्जितं कैशोरं यवनोपक्रमोयाभ्यां समौ चवृत्तौ च २४
तामाहेति तयोः संवादोक्तिः संवंधदार्ढ्याय अपांग एव पुंखो मूलप्रांतो यस्य कटाक्षस्य वाणस्य तेन स्पृष्टः

पिशंगिनीं वीसुश्रोणीं श्यामां कनकमेखलां पद्भ्यां क्वणद्भ्यां चलंतीं नूपुरैर्देवतामिव २३ स्तनौ
३२ व्यंजितकैशोरौ समवृत्तौ निरंतरौ वस्त्रांतेन निगूहंती व्रीडया गजगामिनी २४ तामाह ललितं वी
रः सव्रीडस्मितशोभनां स्निग्धेनापांगपुंखेन स्पृष्टः प्रेमोद्भ्रमद्भ्रुवा २५ का त्वं कंजपलाशा
क्षि कस्यासीह कुतः सति इमामुपपुरीं भीरु किं चिकीर्षसि शंस मे २६ कथ्यतेनुपघायेत
एकादशमहाभटाः एतावाल्ललनाः सुभ्रु कोऽयं तेहि पुरःसरः २७
विष्टः प्रेम्णा उद्भ्रमंती भ्रूः धनुःस्थानीया यस्मिन्नुतेन २५ कुतः स्थानादिहागतासि हे सति पु
र्याः समीपस्थामुपपुरीं हतामालक्ष्य किं कर्तुमिच्छसीत्यर्थः २६ नव एनुपधाः अनुवर्तिन एते के
एकादश महाभटा वृहद्बलत्वेन वर्त्यमाणाये षुदशास्तु तेषु बुद्धेर्मनसः एषमउपादानं वुद्धिपरिचार

केन्द्रियसहायतया तत्परिचारकत्वविवक्षया २७

५१

६३

वाह्योपवने प्रमदां ददर्शेति चतुर्थेनान्वयः नदन्तो विहंगालिकुलानां कोलाहला येषु ते जलाशया यस्मिन् १७ हिमनि
र्झरारंभविप्रुषो विंदवः तद्वता कुसुमाकरसंबंधिना वायुना चलंतः प्रवालाविटपाः शाखाश्रयेषां ते ह्रदैः नलिनी
नां सरसीनां तटेषु संपत्समृद्धिर्यस्मिन् अनाबाधे तत्कृतबाधारहिते मुनिवृत्तैर हिंस्रैः आत्मानं कृतं मन्यंते यत्र १९

पुष्पोस्तु वाह्योपवने दिव्यद्रुमलताकुले नदद्विहंगालिकुलकोलाहलजलाशये १७ हिमनिर्झरविप्रु
षत्कुसुमाकरवायुना चलत्प्रवालविटपनलिनीतटसंपदि १८ नानारण्यमृगव्रातैरनाबाधे मुनि
व्रतैः आकृतं मन्यते पांथा यत्र कोकिलकूजितैः १९ यदृच्छयागतां तत्र ददर्श प्रमदोत्तमां मर्त्यैर्दश
भिरायान्तीमेकैकशतनायकैः २० पंचशीर्षाहिना गुप्तां प्रतीहारेण सर्वतः अन्वेषमाणां मृषभ
मप्रौढां कामरूपिणीं २१ सुनासां सुदतीं बालां सुकपोलां वराननां समविन्यस्तकर्णाभ्यां बिभ्रतीं कुंडल
श्रियं २२

तत्र प्रमोत्तमां विवेकवतीं बुद्धिं ददर्श यदृच्छयागतां मिलितयोः संबंधस्य दुर्निरूपत्वं दर्शयति तामनुवर्णय
ति सार्द्धैस्त्रिभिः दशभिः ज्ञानकर्मेंद्रियैः एकैकं प्रत्येकं शतं अनंता वृत्तयः तासां नायकैः पतिभिः सह
पार्श्वांतरे नायकस्त्रियो येषां तैः २० पंचशीर्षाणि वृत्तयो यस्य तेन अहिना प्राणेन प्रतिहारेण पालकेन गुप्तां
२१ गंधज्ञानादिभिः बुद्ध्यवयवैः सुनासत्वादिनिरूप्यते समं विन्यस्तौ कर्णौ ताभ्यां कुंडलशोभां दधती २२

भा० चे० हेवीर स्वापितं दृष्ट्वा मोदिता सती तमाह ३२ यत्पृष्टं कस्यासीत्यनेन कस्य पुत्री गोत्रजेति का त्वमिति च किं नामासीति
६२ तत्राह आत्मनो मम परस्य तवापि कर्त्तारं सम्यङ्न विद्मः गोत्रं नाम च यत्कृतं भवति तं च न विद्मः ३३ आत्मनो मम
शरणमियं पुरी येन निर्मिता तं च न विद्मः ३४ (आत्मनो मम शरणमिति य) यत्पृष्टं कस्ते ऽनुपश्याइ तित्रत्राह एत
त्स्यं पुरंजनं नारी याचमानमधीरवत् अभ्यनंदत्तं वीरं हसंती वीर मोहिता ३२ न विदाम वयं सम्य
क्कर्त्तारं पुरुषर्षभ आत्मनश्च परस्यापि गोत्रं नाम च यत्कृतं ३३ इहाद्य संतमात्मानं विदाम न ततः प
रं येनेयं निर्मिता वीर पुरी शरणमात्मनः ३४ एते सखायः सख्यो मे नरा नार्यश्च मानद सुप्तायां म
यि जागर्त्ति नागोयं पालयन्पुरीं ३५ दिष्ट्यागतोसि भद्रं ते ग्राम्यान्कामानभीप्ससे उद्वहिष्यामि तां
स्तेहं स्वबंधुभिररिंदम ३६ इमां त्वमधितिष्ठस्व पुरीं नवमुखीं विभो मयोपनीतान्गृह्णानः का

मभोगान्शतं समाः ३७

इति ३५ आस्तां नाम गोत्रादि यदत्रागतोऽसि एतद्दिष्ट्या भद्रं तावत् ग्राम्यान् इंद्रियग्रामार्हान् उद्व
हिष्यामि संपादयिष्यामि स्वबंधुभिः सखीभिश्च ३६ समाः संवत्सरान् मनुष्यदेहमत्र छत्तेमित्युक्तं
३७ ६२

त्वंङ्गीः किं पतिं विचिन्वती अथवा भवानी शिवं पतिं विचिन्वती किं किंवा वाक्सरस्वती ब्रह्माणं पतिं मा वा पतिं
विस्तं मुनिरिव संयतासती कथंभूतं पतिं त्वदंङ्घ्रिकामेनैव त्वल्लुकनया त्वदंङ्घ्रिकामनैव प्राप्ताः समस्ताः कामाये
नतं २८ हे वरोरु आसां मध्ये त्वं मन्ये तमापिनभवसि यतो भुविस्पृक् नहि देवता भुवस्पृशंति वीरवरेण म
यापरं वेकुंठं २९ यद्यस्मात्तवापांगेन विखंडितमिंद्रियं मनोयस्य तं मां मनोभवो बाधसे अथ तस्मादनुग्रहा

त्वंङ्गीर्भवान्यस्यथवा रमापतिं विचिन्वती किं मुनिवद्रहो वने त्वदंङ्घ्रिकामाप्तसमस्तकामं क
पद्मकोशः पतितः करागात् २८ नासां वरोर्वन्यतमा भुविस्पृक् पुरीमिमां वीरवरेण साकं अर्हस्यलंक
र्तुमदभ्रकर्मणा लोकं परं श्रीरिव यज्ञपुंसा २९ यदेष तेपांगविखंडितेंद्रियं सव्रीडभावस्मितविभ्रमभ
द्भुवा त्वयोपसृष्टो भगवन्मनोभवः प्रबाधते मानुगृहाण शोभने ३० त्वमाननं सुभ्रु सुतारलोचनं व्या
लंबनीलालकवृंदसंवृतं उन्नीय मे दर्शय वल्गुवाचकं यद्व्रीडया नाभिमुखं शुचिस्मिते ३१

ण सव्रीडं यद्भुविन्प्रेम्णा स्मितं तेन विभ्रमंती या भ्रूः तया उपसृष्टः प्रेरितः ३० यद्व्रीडयात्वसन्मुखं न भव
ति तदाननमुन्नीय मे दर्शय शोभने भ्रुवौ यस्मिन् सुतारे शोभनकनीनिके लोचने यस्मिन् व्यालंवि
नो दीर्घा ये अलकास्तेषां वृंदेन संवृतं वल्गून्निवाक्यानि यस्मिन् ३१

तत्र जाग्रदवस्थां संक्षेपेणाह उपगीयमान इति सुषुप्तावस्थामाह हृदिनी हृदयाकाशं स्वापस्थानं सुप्तौ निद्रये
४४ इदानीं नवद्वारप्रदर्शनपूर्वकं जाग्रदवस्थां प्रदर्शयति स प्रैतीति यावदध्यायसमाप्तिः तस्याः पुरउपरिहि
ताः द्वारः सप्तवृत्ताः इति पाठे संवृत्ताः नेत्रे नासिके मुखं चेति सप्त अधो द्वे द्वारे गुदलिंगे यः कश्चनेति आत्मनः
सम्यग्विज्ञानादिनियतत्वाच्च ४५ तास्तु सप्तसु पंचद्वारः पौरस्त्याः पूर्वे दिग्भवाः ४६ खद्योतवदल्पप्रकाशा

उपगीयमानो ललितं तत्र तत्र च गायकैः क्रीडन् परिवृतः स्त्रीभिर्हृदिनीमाविशच्छुचौ ४४ स
प्तोपरिकृता द्वारः पुरस्तस्यास्तु द्वे अधः पृथग्विषयगत्यर्थं तस्यां यः कश्चनेश्वरः ४५ पंच द्वारस्तु
पौरस्त्या दक्षिणैका तथोत्तरा पश्चिमे द्वे अमूषां ते नामानि नृप वर्णये ४६ खद्योताविर्मुखी च प्रा
ग्द्वारावेकत्र निर्मिते विभ्राजितं जनपदं याति ताभ्यां द्युमत्सखः ४७ नलिनी नालिनी च प्राग्द्वारावेक
त्र निर्मिते अवधूतसखस्ताभ्यां विषयं याति सौरभं ४८

वामनेत्ररूपा आविः प्रकटं मुखं यस्याः सा वक्तृप्रका
शाद्दक्षिणनेत्रलक्षणा तस्माद्दक्षिणोऽर्ध्वं आत्मनो वीर्यं वर्तत इति श्रुतेः स्वानुभवाच्चात्र प्रकाराधिक्यं एकत्र म
स्तके विभ्राजितं रूपं द्युमत्सखश्चक्षुः सहितः ४७ नलनालशब्दौ छिद्रवचनौ तद्वन्तौ नलिनी नालिनी च वामद
क्षिणनासिके अत्रापि संज्ञाभेदादेव कार्यो न्यूनाधिकं पूर्ववत् ज्ञेयं अवधूतो वायुः धिष्ठितो घ्राणः सौरभं गं

प्रवृत्तस्वभावत्वात्त्रिवृत्तिनिंदापूर्वकं तत्संगमभिनंदति पंचभिः त्वत्तोन्यं कंनुरमये अरति संनैष्ठिकं अकोवि
दं अनिषिद्धसुखत्यागिनं संपरायो मृत्युस्तदभिमुखं परलोकचिंताशून्यं अस्वस्तनवित् स्वः इदं कर्त्तव्यमिति इह
लोकचिंताशून्यं पशुतुल्यं ३८ अत्र गार्हस्थ्ये प्रज्ञानंदः पुत्रसुखं अन्यजनमोहितः केवलिनो यतयः ३९ गृहाश्रम

कंनुत्वदन्यं रमये ह्यरतिज्ञमकोविदं असंपरायाभिमुखमश्वस्तनविदं पशुं ३८ धर्मो ह्यत्रार्थका
मो च प्रजानंदोमृतं यशः लोका विशोका विरजा यान्न केवलिनो विदुः ३९ पितृदेवर्षिमर्त्यानां भू
तानामात्मनश्च ह क्षेमं विदंति शरणं भवेस्मिन् यद् गृहाश्रमः ४० का नाम वीर विख्यातं वदान्यं प्रि
यदर्शनं न वृणीत पतिं प्राप्तं मादृशी त्वादृशं स्वयं ४१ कस्या मनस्ते भुजगेंद्रभोगयोः स्त्रियो न स
ज्जेद्भुजयोर्महाभुज येनाथवर्गाधिमलं घ्नलोद्धृतस्मितावलोकेन चरत्यपोहितं ४२ नारद
उवाच इति तौ दंपती तत्र समुद्य समयं मिथः तां प्रविश्य पुरीं राजन्नमुमुदाते शतं समाः ४३

इतियत् तत् क्षेमा हे शरणमाश्रयं वदंति ४० ४१ भोगिभोगयोः सर्पदेहाकारयोः तव भुजयोर्न सज्जेत ए
वंभूतं कस्याः स्त्रिया मनः स्यात् न कस्यापि यो भवान् अनाथवर्गादीनस्तोमास्तेषामाधिं अलमत्यर्थं अपो
हितुं सर्वत्र चरति केनापोहितुं घृणयोद्धृतः अतिशायिनो यः स्मितपूर्वोवलोकस्तेन ४२ समुद्य समुदीर्य

समासंवत्सराज ६३

भा०च० ९४

निरृतिर्नामगुदः मृत्युद्वारत्वात् वैशसं मरणं विसर्गं लुब्धकेन पायुनात्ते नोक्तं तस्य दुःखप्राप्तेर्लुब्धकसाम्यम्
५१ अमीषां निर्वाक्करः पेशस्कृत् हस्तः तावुभावंधौ छिद्राभावात् स्वतो ज्ञानक्रियाशक्त्यभावाच्च अक्ष्ण्वतां
इंद्रियवतां देहाभिमानिनामधिपतिः पुरंजनः त्वगिंद्रियस्यानुक्तिः सर्वेषु तत्संभवात् ५२ अन्तःपुरं हृद

निरृतिर्नामपश्चाद्द्वास्तया याति पुरंजनः वैशसं नाम विषयं लुब्धकेन समन्वितः ५१ अंधाव
मीषां पौराणां निर्वाक्पेशस्कृतावुभौ अक्षण्वतामधिपतिस्ताभ्यां याति करोति च ५२ स यर्ह्यंतःपु
रगतो विषूचीनसमन्वितः मोहं प्रसादं हर्षं वा याति जायात्मजोद्भवं ५३ एवं कर्मसु संसक्तः का
मात्मा वंचितोऽबुधः महिषी यद्यदीहेत तत्तदेवान्ववर्तत ५४ क्वचित्पिबंत्यां पिबति मदिरां मदविह्व
लः अश्नंत्यां क्वचिदश्नाति जक्षंत्यां सह जक्षति ५५ क्वचिद्धावति धावंत्यां तिष्ठंत्यामनुतिष्ठति अ
नुशेते शयानायामन्वास्ते क्वचिदासतीं ५६ क्वचिद्गायति गायंत्यां रुदंत्यां रोदति क्वचित् क्वचि
द्धसंत्यां हसति जल्पंत्यामनुजल्पति ५७ क्वचिच्छृणोति शृण्वंत्यां पश्यंत्यामनुपश्यति क्वचि
ज्जिघ्रति जिघ्रंत्यां स्पृशंत्यां स्पृशति क्वचित् ६०

यंगतः विषूचीनं सर्वतोमुखं मनः मोहप्रसादहर्षास्तमः सत्वरजःकार्याणि जायाबुद्धिः आत्मजा इंद्रियपरि
णामास्तदुद्भवं ५५ ५६ जक्षंत्यां भक्षयंत्यां ५७ आसतीं आसीनां ५८ ५९ ६० ॥ ॥ ऽऽ॥ ९४

मुख्याप्रधानाआस्यं आपणोभाषणं वह्वन्नमिश्रमन्नं वह्वोदनइत्यनुक्तिः परोक्षवादत्वात् रसज्ञंरसेंद्रि
यं विपणोवागिंद्रियंताभ्यामन्वितः ४९ दक्षिणेनेतिनतुतृतीया किंतुदक्षिणस्यांदिशीति अस्मिन्नर्थेतुष्ठिता
ऽयमेनप्प्रत्ययोऽव्ययसंज्ञः एवमुत्तरेणेति अयमर्थः पंचानांविषयाणामन्यतोनवच्छिन्नानांप्रकाशनात्पांचालमितिपं
चालंशास्त्रंतस्यश्रवणकालेचवलाधिक्याद्दक्षिणकर्णःप्रथमंवर्त्तते शास्त्रेचप्रथमंश्रोतव्यंकर्मकांडमित्येता

मुख्यानामपुरस्ताद्द्वास्तयापणवहूदनौ विषयौयातिपुरराड्रसज्ञविपणान्वितः ४९ पितृहूर्नृप

न२ पुर्य्याद्वार्दक्षिणेनपुरंजनः राष्ट्रंदक्षिणपंचालंयातिश्रुतधरान्वितः ५० देवहूर्नामपुर्य्याद्वा उत्तरे
णपुरंजनः राष्ट्रमुत्तरपंचालंयातिश्रुतधरान्वितः ५१ आसुरीनामपश्चाद्द्वास्तयायातिपुरंज
नः ग्रामकंनामविषयंदुर्मदेनसमन्वितः ५२

वतासाम्येनप्रवृत्तसंज्ञस्यकर्मकांडस्यदक्षिणकर्णेनश्रवणमिष्यते ततस्तदर्थमनुष्ठायपितृभिराहूतः पितृ
लोकप्रापकंयानंप्रपद्यते तदनेनप्रकारेणाभ्यागमनेनभवतीतिपितृहूर्दक्षिणःकर्णः ५० एवंत
द्वैपरीत्येनोत्तरःकर्णोदेवहूः तथाचव्याख्यास्यति पितृहूर्दक्षिणःकर्णउत्तरोदेवहूःस्मृतः प्रवृत्तंचनिवृत्तं
चशास्त्रंपंचालसंज्ञकं पितृयानंदेवयानंश्रोत्राच्छ्रुतधराद्व्रजेदिति ५१ असुराइंद्रियारामाः तेषामिय
मासुरीशिश्नद्वाराग्रामकंग्रामस्थाजनानांकंसुखंव्यवायंदुर्मदेनगुह्येंद्रियेण ५२

भा० च०
६५

हेमोपस्करं सौवर्णाभरणं स्वर्णवर्मा वर्मकवचं रजोगुणावृतः अक्षयेषुधिः इषुधिर्निषंगः अनंतवासनाहं
कारोपाधिः एकादशमनोरूपस्थमूनाथः सेनापतिर्यस्य वासनामयस्य मनसः प्रग्रहत्वात् संकल्पविकल्पा
त्मकस्य वृहद्दलत्वेन वक्ष्यमाणस्य चमूनाथत्वमिति विभागः पंचशब्दादयो विषयाः प्रस्थाः सान्वयो यस्मि
न्नतद्धनं भजनीयदेशमगात् ३ आत्तागृहीता इषवो रागादिरूपाः कार्मुकं च भोगाद्यभिनिवेशरूपं येन जायांवि
वेकचेतनीं बुद्धिं विहाय अतदर्हां त्यागानर्हां त्यागेहेतुः मृगयेत इति मृगा विषयाः तेषु व्यसनं भोगासक्तिः तेन

हेमोपस्करमारुह्य स्वर्णवर्माक्षयेषुधिः एकादशचमूनाथः पंचप्रस्थमगाद्वनं ३ चचार मृगयां तत्र
दृप्त आत्तेषुकार्मुकः विहाय जायामतदर्हां मृगव्यसनलालसः ४ आसुरीं वृत्तिमाश्रित्य घोरात्मानि
रनुग्रहः न्यहनन्निशितैर्बाणैर्वनेषु वनगोचरान् ५ तीर्थेषु प्रतिदृष्टेषु राजा मेध्यपशून्वने यावद
र्थमलं लुब्धो हन्यादिति नियम्यते ६

लालसा अतिस्पृहा यस्य ४ वाणै रागादिभिः वनेषु भजनीयदेशेषु वनचरान् भजनीयविषयान् न्यहनत् आत्मे
सात्कृतवान् कथापक्षे स्पष्टमेव ५ नन्वासुरीं वृत्तिमाश्रित्येति किमिति मृगया निंद्यते तावद्रागविहितैव सा अ
ध्यात्मपक्षेपि जीवस्य विषयभोगो विहित एवेत्याशंक्याह तीर्थेष्विति त्रिभिः अयं भावः नहि मृगया विधीयं
ते रागप्राप्तत्वात् किंतु नियम्यते प्रवृत्तिः संकोच्यते नियममेव षड्भिर्दर्शयति यद्यलमत्यर्थं लुब्धो रागी स न हन्यात्
तर्हि तीर्थेषु श्राद्धादिष्वेव तत्रापि प्रतिदृष्टेषु प्रख्यातेष्वेव न नित्यश्राद्धादिषु तत्रापि राजैव मेध्यानेव वन एव यावद

पयोगमेवेति एवं जीवस्य विषयसेवापि यावदुपयोगे
न यथेष्टमिति नियम एवेत्यर्थः ६

६५

हि॰ । सर्वेऽप्यसंगत्वादिलक्षणस्वभावो वंचितो यस्य सर्वया प्रकृत्या वंचितः इति वा नेच्छन्न अनिच्छन् लैक्यात्यारवश्यात्
हि॰ ॥ इति चतुर्थे पंचविंशः ॥२५॥ षड्विंशे मृगयाव्याजात्स्वप्नजागरणोक्तितः स दुःखित्यागयोगाभ्यां संसृतिः सा प्रपं-
च्यते तु देवमात्मन उपाधिकृतां सुषुप्त्यवस्थां जाग्रदवस्थां चोक्त्वेदानीं स्वप्नावस्थामाह । स एकदेति दशभिः । महे-
ष्वासो धनुः । कर्तृत्वभोक्तृत्वाद्यभिनिवेशलक्षणं यस्य स रथमारुह्य पंचप्रस्थं वनमगादिति तृतीयेनान्वयः २

क्वचिच्च शोचंतीं जायामनुशोचति दीनवत् ॥ अनु हृष्यति हृष्यंत्यां मुदितामनुमोदते ॥६१॥ विप्रलब्धो म-
हिष्यैवं सर्वप्रकृतिवंचितः ॥ नेच्छन्ननुकरोत्यज्ञः क्लैब्यात्क्रीडामृगो यथा ॥६२॥ इति श्रीमद्भागवते महापु-
२ चतुर्थस्कंधे पं राणे पुरंजनोपाख्याने पंचविंशोऽध्यायः ॥२५॥ श्रीनारद उवाच ॥ स एकदा महेष्वासो रथं पंचाश्वमाशुगं ॥ द्विषं द्वि-
चक्रमेकाक्षं त्रिवेणुं पंचबंधुरं १ एकरश्म्येकदमनमेकनीडं द्विकूबरं । पंचप्रहरणं सप्तवरूथं पंचविक्र-
मं २

यं तदानीमेवविधं तं स्वप्ने देहं जाग्रद्देहस्य शतसंवत्सरोपभोग्यपुरत्वेनोक्तत्वात् पंचज्ञानेंद्रियाणि अश्वा यस्य आशु-
गं शीघ्रगतिं देहं तामभत्ते ईषे दंडिके यस्य द्वे पुण्यपापे चक्रे यस्य एकं प्रधानं अक्षो यस्य त्रयो गुणा वेणवो ध्वजा
यस्य पंच प्राणा बंधुराणि बंधनानि यस्य १ एको मनोरश्म्यः प्रग्रहो यस्य एका बुद्धिर्मनः सहितायस्यांते चेतं च एकं हृद-
यं नीडं रथिन उपवेशस्थानं यस्मिन् द्वौ शोकमोहौ कूबरौ युगबंधनस्थानं यस्य पंच शब्दादयो विषयाः प्रक्षियंते प्रक्षिप्यंते
यस्मिन् अस्यवाणं भविष्यति पंचेंद्रियार्थप्रक्षेपरतिः सप्तधातवो वरूथा रक्षार्थं चर्माः यावरणानि यस्य पंच

[illegible]

गृहमेधिनींसात्वकींवुद्धिंराजस्यांवुद्ध्यांवर्त्तमानोनापश्यत् १३ वेदिहेप्राचीनवर्हिः अंतःपुरस्त्रियः तत्सखीः सेश्व
रीणां स्वामिनीसहितानांयथापुरेत्यादि पृथग्वाक्यं १४ व्यंगे चक्रादिहीने १५ १६ निर्वस्तारे अस्तारणरहिते १७
अवधूतां त्यक्तदेहदशांतत्संगेनोन्मथितंव्याकुलंज्ञानंयस्य १८ प्रेमसंरंभः प्रणयकोपस्तल्लिंगंकुटिलदृष्ट्या

तृप्तोहृष्टः सुदृप्तश्चकंदर्पाकृष्टमानसः नव्यचष्टवरारोहांगृहिणींगृहमेधिनीं १३ अंतःपुरस्त्रि
योपृच्छद्विमनाइववेदिषत् अपिवः कुशलंरामाः सेश्वरीणांयथापुरा १४ नतथैतर्हिरोचंतेगृहेषुगृह
संपदः यदिनस्याद्गृहेमातापत्नीवापतिदेवता व्यंगेरथइवप्राज्ञः कोनामासीतदीनवत् १५ क्ववर्त्त
तेसाललनामज्जंतंव्यसनार्णवे यामामुद्धरतेप्रज्ञांदीपयंतीपदेपदे ॥१६॥ रामाऊचुः ॥ नरनाथन
जानीमस्त्वत्प्रियायद्व्यवस्यति भूतलेनिरवस्तारेशयानांपश्यशत्रुहन् १७ पुरंजनः स्वमहिषींनि
रीक्ष्यावधुतांभुवि तत्संगोन्मथितज्ञानोवैक्लव्यंपरमंययौ १८ सांत्वयन्श्लक्ष्णयावाचाहृदयेनविदूय
ता प्रेयस्याः स्नेहसंरंभलिंगमात्मनिनाभ्यगात् १९ अनुनिन्येऽथशनकैर्वीरोऽनुनयकोविदः पस्पर्शपाद
युगलमाहचोत्संगलालितां २० नूनंत्वकृतपुण्यास्तेभृत्यायेष्वीश्वराः शुभे कृतागस्स्वात्मसात्कृत्वाशिक्षादंडंन
युंजते २१

दिस्वस्मिन्नलब्धवान् १९ उत्संगमारोप्यलालिता २० कृतमागोऽपराधोयैस्तेषु आत्मसात्कृत्वा अस्मदधीनोयमि
तिमत्वापिशिक्षार्थंदंडंनकुर्वंति तेभृत्यामंदभाग्याः २१

अतोनावश्यकमित्याहयइति एवंनियतंकर्मविद्वान्तेनेत्युपलक्षणं तेनान्योन्यवाकर्मणैवमनुतिष्ठतेनयत्त्वाने
नहेतुनासोऽनुष्ठातानलिप्यते ७ अन्यथानियमोल्लंघनेनत्वंतःकरणशुद्ध्यभावात् कर्तृत्वाभिमानमारूढःकर्मभिर्
नुवध्यते ततश्चगुणप्रवाहेपतितेऽधोव्रजति ८ प्रासंगिकंपरिसमाप्यपुनर्मृगयामेवानुवर्णयति चित्रैर्वाजैःपत्रैर्य

यएवंकर्मनियतंविद्वान्कुर्वीतमानवः कर्मणातेनराजेन्द्रज्ञानेननसलिप्यते ७ अन्यथाकर्मकुर्वाणोमाना
रूढोनिवध्यते गुणप्रवाहपतितोनष्टप्रज्ञोव्रजत्यधः ८ तत्रनिर्भिन्नगात्राणांचित्रवाजैःशिलीमुखैः विप्ल
वोभूद्दुःखितानांदुःसहःकरुणात्मनां ९ शशान्वराहान्महिषान्गवयान्रुरुशल्लकान् मेध्यान
न्यांश्चविविधान्विनिघ्नन्श्रममध्यगात् १० ततःक्षुत्तृट्परिश्रान्तोनिवृत्तोगृहमेयिवान् कृतस्नानोचिता
हारःसंविवेशगतक्लमः ११ आत्मानमर्पयांचक्रेधूपालेपस्रगादिभिः साध्वलंकृतसर्वांगोमहिष्यामा
दधेमनः १२

णैः विप्लवोनाशः करुणात्मनां कृपालूनांदुःसहः ९ तदेवंस्वप्नाव
स्थायांदर्शितापि इदानीं पुनरपिविवेकवत्याबुद्ध्यारममाणस्यपुत्रादिसंततिंप्रपंचयिष्यन् कथासौंदर्यायतस्याःप्रणय
कुपितायाःअनुनयंप्रस्तावसंक्षिप्तमाह ततइत्यारभ्ययावदध्यायसमाप्तिः एयिवान्आगतः कृतंस्नानमुचितआ
हारश्चयेनससंविवेशशय्यामाश्रितः ११ १२

भा० चं०
९७

तत्तस्मात्कृतं किल्बिषमपराधेन तस्य किल्बिषमेवाह स्वैरं स्वातंत्र्येणत्वामपृष्ट्वा मृगयां गतस्य देवो देवनं क्रीडितां रातिदेव
रः कान्तः तं कामवेगेन विस्रस्तगात्रं यो स्तपौरुषधैर्यस्यान्तं उशती कामयमाना कृत्ये कुर्हेयोग्ये ऽर्थे कान भजेत॥२६॥ इति चतु
र्थे षड्विंशः॥२६॥ सप्तविंशे प्रियापुत्राद्याशक्त्या विस्मृतात्मनः कालकन्याद्युपाख्याने जरारोगादुर्दीर्य्यते तदेव जीवस्यानु
नयादिकथासौन्दर्येणात्यन्तं उपाधिवश्यत्वमुक्तानन्निमित्तो संसारपरंपरां विरूपयितुमोह इत्यमिति ॥ अथ च प्रति
पदं कथंचिदध्यात्मपक्षेपि योजयितुं शक्यमेव श्रीनारदेन तु जीवस्य स्त्रीपुरुषवासनादार्ढ्येणाविचित्रासंसृतिर्भव

तन्मे प्रसीद सुहृदः कृतकिल्बिषस्य स्वैरं गतस्य मृगयां व्यसनातुरस्य का देवरं वशगतं कुसुमास्त्रवे
स्त २
गविस्रस्तपौंस्नमुशती न भजेत कृत्ये ॥२६॥ इति श्रीभागवते महापुराणे चतुर्थस्कन्धे पुरंजनोपाख्याने षड्विंशो
ध्यायः॥२६॥ नारद उवाच ॥ इत्थं पुरंजनं सध्र्यग्वशमानीय विभ्रमैः पुरंजनी महाराज रेमे रमयती पतिं १
स राज्ञी महिषी राजन्सुस्नाता रुचिरानना कृतस्वस्त्ययना तृप्तामभ्यनन्ददुपागतां २

कचिच्चस्त्री कचिन्नोभयमन्धधीः देवो मनुष्यस्तिर्यग्वा यथाकर्मगुणं भव इति
तीत्येतावदेव कथातात्पर्यं दर्शितं ततस्त्वेकेनाध्यायेन स्त्रीत्वेन संसृतिं प्रदर्श्य स्वरूपमेव लब्धज्ञानेनन
वदता तत्रादौ पुंस्त्वेन संसृतिश्चाध्यायत्रयेणोक्ता
मोक्षस्त्वुक्तः ततस्तदेव यथोपयोगं व्याख्यातमिति पंचाध्यायारंभः प्रतीयते प्रतिपदं त्वध्यात्मयोजनात्तु दुर्घटानि
प्रियोजनाचेति स्वप्रौढिप्रख्यापनमनादृत्य यथोपयोगमेव व्याख्यास्यामः सध्र्यक् विभ्रमैर्विलासैः १ कृतस्वस्त्ययनं

भावार्थदीपिकायां स्कं० ४
९७

लि२

यतः परमोऽनुग्रहो दंडः यस्त्वं दंडितो विषीदसि सोऽज्ञ इत्याह बालइति बंधुकृत्यं शिक्षाकरणं अमर्षणः क्रोधी २२ हेसु
इति हे सुभ्रु हे मनस्विनि सा त्वमस्माकं स्वामिनि अतः स्वानो मुखं प्रदर्शय कीदृशं अनुरागभारेण व्रीडया यो विलंबः मंथर
ता तेन विलसत् हसितावलोको यस्मिन् नीला अलका एव अलयस्तैरुपस्कृतं विभूषितं उच्चैनासिकं वल्गुवाक्यं यस्मिन्
तत् २३ हे वीरपत्नी वीरस्य मम पत्नी भार्ये यस्मै कृतापराधः तस्मिन्निदं ब्राह्मणकुलादन्यत्र अन्यस्मिन् मुररिपुदासादि

परमोऽनुग्रहो दंडो भृत्येषु प्रभुणार्पितः बालेन वेदितत्वं च बंधुकृत्यममर्षणः २२ साब्वं मुखं सुदतिसुभ्रु
नुरागभार व्रीडाविलंबविलसद्धसितावलोकं नीलालकालिरुपस्कृतमुन्नसं नः स्वानां प्रदर्शय मनस्विनि
वल्गुवाक्यं २३ तस्मिन्दधे दममहं तव वीरपत्नी योऽन्यत्र भूसुरकुलात्कृतकिल्बिषस्ते पश्ये न वीतभय
मुन्मुदितं त्रिलोक्यामन्यत्र वै मुररिपोरितरत्र दासात् २४ वक्त्रं न ते वितिलकं मलिनं विहर्षसंरंभभी
ममविमृष्टमपेतरागं पश्ये स्तनावपि शुचोपहतौ सुजातौ बिंबाधरं विगतकुंकुमपंकरागम् २५

तत्र च दंडं दधे दंडं करोमि किं तु त्वं विगतभयं उच्चै मुदितं त्रिलोक्यामन्यत्र वै लोकत्रयादृते हरिरपि न पश्यामि मद्दयादे
वा सो मरिष्यतीत्यर्थः २६ ते वक्त्रमितः पूर्वं कदाचिदपि वितिलकं न पश्यामि संरंभेण कोपावेशेन भीमं भयंकरं अवि
मृष्टं अनुज्ज्वलं अपगतरागं स्नेहशून्यं तथा ते सुजातौ शोभनौ स्तनावपि शोकाश्रुभिरुपहतौ न पश्यामि तथा बिंबवत्फ
लाकारमधरं विगतः कुंकुमपंकतुल्यतांबूलरागो यस्मात् तादृशं न पश्यामि इदानींकृतमेवं जातमिति शेषः पाठांतरे एवं दे

भा०च० पुत्राणांपुत्राः पंचालेषुशरद्विषयेषु ९ तेषुपुत्रादिषुतेषामपिरिक्थहाराःपुत्रास्तेषुच १० ११ युक्तेषुआत्मदत्तेषु
९८ कर्मस्वनवहितस्यसर्वकालःजरासमयः १२ चंडवेगःसंवत्सरआवर्तमानेनोपलक्षितः गंधर्वाःदिवसाः १३

पुत्राणांचाभवन्पुत्राएकैकस्यशतंशतं यैर्वैपौरंजनोवंशःपंचालेषुसमेधितः ९ तेषुतद्रिक्थहारेषुग
हकोशानुजीविषु निरूढेनममत्वेनविषयेष्वन्वबध्यत १० ईजेचक्रतुभिर्घोरैर्दीक्षितःपशुमार
कैः देवान्पितॄन्भूतपतीन्नानाकामोयथाभवान् ११ युक्तेष्वेवंप्रमत्तस्यकुटुंबासक्तचेतसः आससाद
सवैकालोयोऽप्रियःप्रिययोषितां १२ चंडवेगइतिख्यातोगंधर्वाधिपतिर्नृप गंधर्वास्तस्यबलिनःष
ष्ट्युत्तरशतत्रयं १३ गंधर्व्यस्तादृशीरस्यमैथुन्यश्चसितासिताः परिवृत्त्याविलुंपंतिसर्वकामविनिर्मि
तां १४ तेचंडवेगानुचराःपुरंजनपुरंयदा हर्तुमारेभिरेतत्रप्रत्यषेधत्प्रजागरः १५ ससप्तभिःशतैरेको
विंशत्याचशतंसमाः पुरंजनपुराध्यक्षोगंधर्वैर्युयुधेबली १६ क्षीयमाणेस्वसंबंधएकस्मिन्बहुभि
र्युधि चिंतांपरांजगामार्तःसराष्ट्रपुरबांधवः १७

गंधर्व्यस्त्रयः तादृशीस्तादृश्यः मैथुन्यःदिवसेमिथुनीभूताःसिताश्चासिताश्चशुक्लकृष्णपक्षीयाः परिवृत्त्या
क्रमेणसर्वैःकामैःसहविनिर्मितांपुरींप्रहरंति १४ प्रजागरःप्राणः १५ विंशत्याचसहस्रप्रशतैः १६ स्वसं ९७
बंधिनिप्राणे १७

उपगूढः परिरब्धाकंधरा उतस्यायेन रहस्कांते अनुमंत्रैः अनुकूलैः गुह्यभाषणैः अपकृष्टा चेतना विवेको यस्य का
लरंहः आयुर्व्ययं प्रमदैव परिग्रहो न ज्ञानसाधनं यस्य ३ महार्हतल्पे उत्कृष्टशय्यायां महिष्या भुज उपधि उपधा
नमुच्छीर्षकं यस्य अविसर्गपार्श्वशयनक्रियाविशेषणं तां महिषीमेव परं पुरुषार्थममन्यत न तु यन्निजं रूपं ब्रह्म तत् तम

तयोपगूढः परिरब्धकंधरो रहोनुमंत्रैरपकृष्टचेतनः नकालरंहो बुबुधे दुरत्ययं दिवानिशेति प्रमदा शेति १
म२ परिग्रहः ३ शयान उन्नद्धमदो महामना महार्हतल्पे महिषीभुजोपधिः तामेव वीरां मनुते परं
यतस्तमोभिभूतो न निजं परं यत् ४ तयैवं रममाणस्य कामकश्मलचेतसः क्षणार्द्धमिव राजेंद्र व्य
तिक्रांतं नवं वयः ५ तस्यामजनयत्पुत्रान्पुरंजन्यां पुरंजनः शतान्येकादश विराडायुषोर्द्धमथात्य
गात् ६ दुहितृर्दशोत्तरशतं पितृमातृयशस्करीः शीलौदार्य्यगुणोपेताः पौरंजन्यः प्रजापते ७ स
त१ पंचालपतिः पुत्रान्पितृवंशविवर्द्धनान् दारैः संयोजयामास दुहितॄः सदृशैर्वरैः ८ ५

सा अत्रज्ञानेनाभिभूतो यतः ४ ५ पुत्रान् इंद्रियपरिणामान् दुहितॄः तदनंतरं बुद्धिवृत्तीः पुत्रसंख्या च वाक्चत्वमा
त्रविवक्षया दुहितृसंख्या तु पुत्रेभ्यो न्यूनत्वेन गार्हस्थ्यसौंदर्य्यार्थं विराट् सम्राट् आयुषोऽर्द्धमित्यादि पिकथा सौं
दर्य्यार्थमेव ६ पुरंजनकन्यात्वात् पौरंजन्यः हे प्रजापते ७ दारैः परिणामानंतरं हितान्हितचिंताभिः वरैः उचितवि

किंचित् प ४

भा० च०
९८

लोकत्तीवेदनश्च यद्देयत्वेनच उपनतं प्राप्तं तयाच्यमानं योनददाति यश्च दीयमानंनेच्छति ग्रस्तात्विमोकर्मभ्र
नावनुशोचंति २४ पुरुषेणकर्त्तव्योधर्मः पौरुषः २६ दैवगुह्यंमरणं नधिप्राणिनांवैराग्यानुद्यायदेवैर्गोप्यते २३
तुभ्यंतवआत्मसमाधिनाज्ञान दृष्ट्वायाच्यमानोऽप्यंलोकस्त्वांनेच्छति २८ अतोऽव्यक्तगतिः कुतः प्राप्नुत्यत्तदितरा
ह्यविमावनुशोचंति बाल्लावसदवग्रहौ॥ यल्लोकशास्त्रोपनतंनरातिनतदिच्छति २२ अथोभजस्व
मांभद्रभजंतीमेदयांकुरु एतावान्पौरुषोधर्मोयदार्त्तानुकंपते २३ कालकन्योदितवचोनिशम्यय
वनेश्वरः चिकीर्षुर्दैवगुह्यंसः सस्मितंतामभाषत २४ मयानिरूपितस्तुभ्यंपतिरात्मसमाधिना ना
भिनंदतिलोकोयंत्वामभद्रामसंमताम् २५ त्वमव्यक्तगतिर्भुंक्ष्व लोकंकर्मविनिर्मितं याहिमेपृतना
युक्ताप्रजानाशंप्रणेष्यसि २६ प्रज्वारोयंममभ्राता त्वंचमेभगिनीभव चराम्युभाभ्यांलोकेस्मिन्नव्य
क्तोभीमसैनिकः॥२७॥इतिश्रीमद्भागवते महापुराणे चतुर्थस्कंधे पुरंजनोपाख्याने सप्तविंशोध्यायः॥२७॥

तिः सतीलोकमाक्रम्य भुंक्ष्व एवंसर्वोपिलोकस्तव पतिः स्यादित्यर्थः नचैवंत्वयाशंकनीयं मांप्रतिकूलावलोकोहं
निष्पत्तीतियस्मात्त्वमेव प्रजानांनाशंकरिष्यसीत्याह याहीति यामदीयवनपृतनात्तयायुक्ता २६ प्रज्वार इ
तिमारकोवैसवोज्वरः माहेश्वरस्य व्यध्वंतः पातित्वाज्जीमाः घोराः सैनिकायस्य॥२७॥ इतिचतुर्थेसप्तविंशः॥२७॥ ९८

सस्त्रं मधुभुक् रुद्रसुखभोक्ता स्वपार्षदैः इंद्रियैः नाविदत् नालोचितवान् १८ कालस्य दुहिता जरा अस्ति तां न प्रत्यनं
दत्त नैच्छत् हे वर्हिष्मन् हे प्राचीनवर्हि १९ पूर्वे ययातिपुत्राय तेन दत्ता सती वरमदात् ययातिः शुक्रशापाज्जरां प्रा
प्य पुत्रानुवाच इमां गृह्णीतेति तां ज्येष्ठाश्चत्वारो न जगृहुः पुरुस्तु जग्राह तत्तोपयातिः तस्मै राज्यं ददौ वितिजरैव

सस्त्रपुर्य्यां मधुभुक् पंचालेषु स्वपार्षदैः उपनीतवलिं गृह्णन्स्त्रीजितो नाविदद्भयं १८ कालस्य दुहि
ता काचित्त्रिलोकीं वरमिच्छती पर्य्यटंती न वर्हिष्मन् प्रत्यनंदत्त कश्चन १९ दौर्भाग्येनात्मनो लोके
विश्रुता दुर्भगेति सा या तुष्टा राजर्षये तु वृतादात्पूरवे वरं २० कदाचिदटमाना सा ब्रह्मलोकान्महीं ग
तं वव्रे वृहद्व्रतं मां तु जानती काममोहिता २१ मयि संरभ्य विपुलमदाच्छापं सुदुःसह स्थातुमर्हसि
नैकत्र मद्याच्ञाविमुखो मुने २२ ततो विहतसंकल्पा कन्यका यवनेश्वरं मयोपदिष्टमासाद्य वव्रे
नाम्ना भयं पतिं २३ ऋषभं यवनानां त्वां वृणे वीरेप्सितं पतिं संकल्पस्त्वयि भूतानां कृतः किल न रि
ष्यति २४
दादित्युक्तं २० २१ प्रत्याख्यातवति मयि संरभ्य क्रोधं कृत्वा नैकत्र स्थातुमर्हसीति शापमदात् २२ त्रीधयो
व्याधयश्च यवनास्तेषामीश्वरं भयनामानं वव्रे २३ हे वीर त्वामीप्सितं पतिं वृणे न रिष्यति न नश्यति २४ राम

प्रत्याख्याता मपा सा तु कालकन्या विशां पते

ता१

भा०टी० ९६

कौकन्यया हेतुभूतया या तया मानन्निःसारानपि कामानभिलषन् विगताश्चात्मनो गतिः पारलौकिकी ऐहिकः
पुत्रादिस्नेहश्च यस्य स्नेहादिति पादः ९ स राजा पुरंजनो ह्यहं तु प्रचक्रमे उपक्रांतवानिति द्वयोरन्वयः अतः कामतः
अनिच्छयापि १० ११ सपरिच्छदः भृत्यवर्गसहितः कुटुंबेन दीव्यतीति कौटुंबिकः कुटुंबिन्यासंधिनात्र विवक्षितः

कामानभिलषन्दीनो यातयामांश्च कन्यया विगतात्मगतिस्नेहः पुत्रदारांश्च लालयन् ९ गंधर्वय
वनाक्रांतो कालकन्योपमर्दितः हंतुं प्रचक्रमे राजा तां पुरीमनिकामतः १० भयनाम्नोऽग्रजो भ्राता प्र
ज्वारः प्रत्युपस्थितः ददाह तां पुरीं कृत्स्नां भ्रातुः प्रियचिकीर्षया ११ तस्यां संदह्यमानायां सपौरः सप
रिच्छदः कौटुंबिकः कुटुंबिन्या उपातप्यत सान्वयः १२ यवनोपरुद्धायतनो ग्रस्तायां कालकन्यया
पुर्यां प्रज्वारसंसृष्टः पुरपालोन्वतप्यत १३ न शेके सोऽवितुं तत्र पुरुकृच्छ्रोरुवेपथुः गंतुमैच्छत्त
तो वृक्षकोटरादिव सानलात् १४ शिथिलावयवो यर्हि गंधर्वैर्हृतपौरुषः यवनैररिभी राजन्नुपरु
द्धो रुरोद ह १५ दुहितॄः पुत्रपौत्रांश्च जामिजामातृपार्षदान् स्वत्वावशिष्टं यत्किंचिद्गृहकोशपरि
च्छदम १६

सान्वयः पुत्रादिसहितः १२ यवनैरुद्धानि आयतनानि यस्य सः पुरपालः १३ पुरुच कृच्छ्रं तेन उ
रुर्वेपथुर्यस्य वृक्षकोटरादिव सर्पः १४ कंठे उपरुद्धो रुरोद घुरुघुरुध्वनिं चकार १५ दुहित्रादीन् दध्यावित्युत्त

रेणान्वयः जामयोऽत्र स्नुषाः स्वत्वमात्रेणावशिष्टम
भोगस्तु प्रागेव क्षीणः १६

अथ शाविंशे तु वेदृश्योख्यानेनस्त्रीविचिंतया स्त्रीत्वं प्राप्तस्यादैवेन कदाचिन्मुक्तिरुच्यते इदानीं तु पुरंजनस्य पुं
देहप्रकारपूर्वकं स्त्रीत्वप्रकारमाह सैनिका इत्यादि राजसिंहस्य वेश्मनीत्यंते नग्रंथेन दृष्टं दैवं कुर्वती तित्तथा
मृत्योरुद्देशकारिण इतिवा १ जरत्यर्णगेनजीर्णप्रायेण पालितां २ ३ द्वाभिश्च दक्षिणादिरोगरूपेण प्रविश्य क

नारद उवाच॥ सैनिका भयनाम्नो ये बर्हिष्मन् दिष्टकारिणः प्रज्वारकालकन्याभ्यां विचेरुरवनीमि
मां १ त एकदा तु रभसा पुरंजनपुरं नृप रुरुधुर्भौमभोगाढ्यं जरत्पन्नगपालितं २ कालकन्यापि बु
भुजे पुरंजनपुरं बलात् ययाभिभूतः पुरुषः सद्यो निःसारतामियात् ३ तयोपभुज्यमानां वै यवनाः स
र्वतो दिशं द्वार्भिः प्रविश्य सुभृशं प्रार्दयन्सकलां पुरीं ४ तस्यां प्रपीड्यमानायामभिमानी पुरंजनः अ
वापोरुविधांस्तापान्कुटुंबी ममताकुलः ५ कन्योपगूढो नष्टश्रीः कृपणो विषयात्मकः नष्टप्र
ज्ञो हृतैश्वर्यो गंधर्वयवनैर्बलात् ६ विशीर्णां स्वपुरीं वीक्ष्य प्रतिकूलाननादृतान् पुत्रान्पौत्रानुगामा
त्याञ्जायां च गतसौहृदाम् ७ आत्मानं कन्यया ग्रस्तं पंचालानरिदूषितान् दुरंतचिंतामापन्नो न लेभे
तत्प्रतिक्रियां ८

न्ययोपगूढः सन् तत्प्रतिक्रियां न लेभे इतित्रितीयेनान्वयः हृतैश्वर्यः उत्याना
दिशक्तिः ६ प्रतिकूलान् अनपेक्षितविषयप्रापणात् अनादृतान् आवरणमकुर्वाणान् स्वाधीनत्वाभावा

त् अनुगा इंद्रियाणि अमात्या इंद्रियदेवाः गतसौहृ
दं अध्यवसायाभावात् ७ अरिभिर्विद्भादिभिर्दू
षितान् ८

२६ शाश्वतीः समाः आर्त्तिमनुभूय २७ अंतकाले तां भार्यामेव मनसा गृह्णन्ननुस्मरन् अनंतरं विदर्भस्य वेश्मनि प्रमदो
त्तमा बभूव अतः परस्मिन्प्रकरणे एतावद्देवप्रकृतोपयोगि विवक्षितं स्त्रीध्यानेन स्त्रीत्वप्राप्तावपि पतिव्रताध्यानेन
पूर्वादृष्टेन च धार्मिकाद्विदर्भाज्जन्माभूत्तद्धार्मिकसंगेन च विशुद्धस्य भागवतेन मलयध्वजेन संगोभूत्ततो विष्णु
भक्तिः ततो वैराग्यं ततस्तमेव महर्षिरूपं गुरुं पातिव्रत्यधर्मेण भजंती भगवत्प्रसादलब्धज्ञानेन मोक्ष इति अन्य

तं यज्ञपशवो येन संज्ञप्ताये दयालुना कुठारैश्चिच्छिदुः क्रुद्धाः स्मरंतोऽमीवमस्य तत् २६
अनंतपारे तमसि मग्नो नष्टस्मृतिः समाः शाश्वतीरनुभूयार्त्तिं प्रमदासंगदूषितः २७ ता
मेव मनसा गृह्णन् बभूव प्रमदोत्तमा अनंतरं विदर्भस्य राजसिंहस्य वेश्मनि २८ उ
पयेमे वीर्यपणां वैदर्भीं मलयध्वजः युधि निर्जित्य राजन्यान् पांड्यः परपुरंजयः २९ ॥

त्तु कथालंकारमात्रं तथापि किंचिच्छ्रुतिसामान्येनेह योजयिष्यामः विदर्भस्य विशिष्टदर्भोपलक्षितस्य क
र्मिष्ठस्य राजसिंहस्य धर्मेण हि प्रजापालनेन यज्ञादिना च क्षत्रिया राजंते तेषु श्रेष्ठस्य वेश्मनि २८ मलयो
पलक्षितो दक्षिणदेशो ध्वज इव दर्शनीयः स हि श्रीविष्णुभक्तिप्रधानो देशः तत्र मुख्यः महाभागवत इत्यर्थः पं
जो निश्चयबुद्धिः तामर्हतीति पांड्यः स उपयेमे पुरंजनो भागवतसंगं प्राप्त इत्यर्थः २९

२१ १८ ध्यानमेवाह अनाशिते अभोजिते भर्त्सिते भर्त्सनेकृते यतवाग्भवति १९ अविज्ञं अविवेकिनं मां व्युषिते दे
शांतरंगते गरहमेधीयं वर्त्मगृहधर्मे अपि किं नेष्यति अनुवर्त्तिष्यति युक्तमेतत् यतो वीरसूः पुत्रमती किंवा मद्विरह
मसहमाना मरिष्यत्येवेत्यर्थः २० विद्यतेपरमथनमाश्रयो येषां ते अपरायणाः पुत्राः कन्याश्च यद्वा पराश्रयाः कन्याः

अहंममेति स्वीकृत्य गृहे पुत्रकुमतिर्गृही दध्यौ प्रमदयादीनो विप्रयोग उपस्थिते १७ लोकांतरं गतवति म
य्यनाथा कुटुंबिनी वर्त्तिष्यते कथं त्वेषा वा स्तकाननुशोचती १८ न मय्यनाशिते भुंक्ते नास्नाते स्नाति मत्
परा मयि रुष्टे सुसंत्रस्ता भर्त्सिते यतवाग्भयात् १९ प्रबोधयति माविज्ञं व्युषिते शोककर्षिता वर्त्मैतत्
गृहमेधीयं वीरसूरपि नेष्यति २० कथंनु दारका दीना दारकी वीपरायणाः वर्त्तिष्यंते मयि गते भिन्नना व
इवोदधौ २१ एवं कृपणया बुद्ध्या मशोचंत मदेहरणं गृहीतं कृतधीरेनं भयनाभ्यपद्यत २२ पशु
वद्ध्वनैरेषनीयमानं स्वकंत्वयं अन्वद्रवन्ननुपथाः शोचंतो भृशमातुराः २३ पुरीं विहायोपगतेउपरु
द्धो विहंगमः यदा तमेवानुपुरी विशीर्णा प्रकृतिंगता २४ विकृष्यमाणः प्रसभं यवनेन वलीयसा नाविं
दत्तमसाविष्टः सखायं सुहृदं पुरः २५
भिन्ना नौर्येषां २१ अतदर्हणं वस्तु तस्य व्रह्ममानः तदा अनुपथाः प्राणा इंद्रियाणि च तथा च श्रुतिः तमनुक्रामंतं
प्राणो अनुक्रामं तं सर्वे प्राणा अनुक्रामंतीति २३ प्रकृतिं महाभूतात्मतां २४ नाविंदन्न सस्मार पुरः पूर्वस
वायसंततमीक्षाः अत्यदेहिता कास्यकस्मंदंडेयसंगतपाः
द्दताः ऋमीवेषाप कौर्षिता २५
शि३

त्मां विभज्य वर्णादिभक्तिभेदं व्यवस्थाप्य ३३ इदानीं पुरंजनस्य स्त्रीभावं प्राप्तस्य सर्वतो विरक्तस्य पतिरेव गुरुः स्त्रीणामि
ति वचनात् पतिसेवया गुरुशुश्रूषया प्रकारं दर्शयितुमाह हित्वेत्यादिना मनोरथ इत्यंतेन ग्रंथेन मरयतीतिमदिरं इ
क्षणं यस्याः ३४ तत्र चंद्रवसाद्यानद्यः तासां पुण्यैः सलिलैः उभयत्र अंतर्बहिः आत्मनोमलं क्षालयन् तपः आस्थि

विभज्य तनयेभ्यो क्ष्मां राजर्षिर्मलयध्वजः आरिराधयिषुः कृष्णं स जगाम कुलाचलं ३३ हित्वा
गृहान् सुतान् भोगान् वैदर्भी मदिरेक्षणा अन्वधावत पाण्ड्येशं ज्योत्स्नेव रजनीकरं ३४ तत्र चंद्र
वसा नाम ताम्रपर्णी वटोदका तत्पुण्यसलिलैर्नित्यमुभयत्रात्मनो मृजन् ३५ कंदाष्टिभिर्मूलफ
लैः पुष्पपर्णैस्तृणोदकैः वर्तमानः शनैर्गात्रकर्षणं तप आस्थितः ३६ शीतोष्णवातवर्षाणि क्षुत्पि
पासे प्रियाप्रिये सुखदुःखे इति द्वंद्वान्यजयत्समदर्शनः ३७ तपसा विद्यया पक्वकषायो नियमैर्यमैः
युयुजे ब्रह्मण्यात्मानं विजिताक्षानिलाशयः ३८ आस्ते स्थाणुरिवैकत्र दिव्यं वर्षशतं स्थिरः वासुदे
वे भगवति नान्यद्वेदोद्वहन् रतिम् ३९

तइत्युत्तरेणान्वयः ३५ अस्यते भ्रंमो क्षिप्यंत इत्यष्टिर्बीजं ३६ ३७ विद्यया उपासनया ऽपक्वकषायः दग्धकर्मादि
वासनः युयुजे आत्मानं ब्रह्मतां भावयामास अक्षाणींद्रियाणि अनिलः प्राणः आशयश्चित्तं विजिता अत्ता
द्येयेन ३८ आस्ते स्म वर्षशतमिति ज्ञानस्य दुःसाधनतां दर्शयति अत एव भक्तिं हृतवानित्याह वासुदेवे रतिमु

श्रात्मजां श्रीकृष्णसेवारुचिं तत्संगतभगवद्धर्मैर् हृचिरभूदित्यर्थः असितस्य श्रीकृष्णस्येक्षणं यया तां यवीय
सः सप्त सुतान् श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनं अर्चनं वंदनं दास्यमिति भक्तिप्रकारान् सख्यात्मनिवे
दनयोस्तत्त्वपदार्थज्ञानोत्तरकालत्वात्तस्य च भगवत्तैवोत्तत्रोपदेक्ष्यमाणत्वादिदानीमनुपत्तेः सप्तैत्युक्तं भग
वद्धर्मरूप्यातत्वश्रवणकीर्त्तनादिकं जातमित्यर्थः द्रविडभूमिपालकान् द्रविडभूमिर्हि श्रवणादिकीर्त्तिभि
रवसुरक्षितास्तीति प्रसिद्धं ३० अर्बुदमिति श्रवणादीनां प्रत्येकमनेकप्रकारा अभवन्नित्यर्थः तदुक्तं भक्तियोगो बहु

तस्यां सं जनयां चक्रे आत्मजामसितेक्षणां यवीयसः सप्त सुतान् सप्त द्रविडभूभृतः ३० एकैकस्याभ
वत्तेषां राजन्नर्बुदमर्बुदं भोक्ष्यते यद्वंशधरैर्मही मन्वंतरं परं ३१ अगस्त्यः प्राग्दुहितरमुपयेमे धृत
व्रतां यस्यां दृढच्युतो जात इध्मवाहात्मजो मुनिः ३२ विधोमार्गैर्भोमिनिभाव्यत इति येषां वंशधरैः च्युतः प्रद

त्तैः संप्रदायभेदैः कृत्स्नां महीं मन्वंतरतः परं च भोक्ष्यते अविद्याकर्मभ्योपि रक्षिष्यति ३१ अगस्त्यः अगानि निः क्रियालि
प्सायाति संघातयतीत्यगस्त्यो मनः स प्राक् प्रथमो ज्ञातः दुहितरं कृष्णसेवारुचिं उपयेमे तस्याः मनः कृष्णे हठादारतिं वंधयेत्
र्थः धृतानि शमदमादीनि व्रतानि यया तां रतिं दृढेभ्यः सत्यलोकादि भोगेभ्योपि च्युतस्तद्रहितः कृष्णरत्या विहामुत्रभोग
विरागो जात इत्यर्थः स एवोपसमात्मकत्वान्मुनिः कथंभूतः इध्मवाह आत्मजो यस्य सः तद्विज्ञानार्थं स गुरुमेवाभिगच्छे
त्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं इत्यादि श्रुतिप्रसिद्धा समिद्वहनोपलक्षिता गुरूपसत्तिर्वैराग्यादभूदित्यर्थः नह्यविरक्तास्य

गुरुपसमाजितं समिद्वति कथायां पेयं यथा मुनेव ३२

भा० चं० उपपत्तिं पत्युः समीपे यद्वा पत्युः किंचिन्मात्रेणाप्यजातसमानसत्तीव भावित्यर्थः उपोऽधिके चेति प्रवचनीयः त
१०२ द्योगे च द्वितीया प्रागते मांसारादवस्थमनत्वमुपशान्तामुद्वाऽज्वाला यथाभवतिन्तद्वत् ४४ तदानीमपि सुस्थि
रसासनेयस्य अत एवाजानती यदा तदायथापूर्वमसेवत् ४५ पत्युरंघ्रिमर्षयन्तीयदा तस्मिनश्व घ्राके

चीरवासा व्रतक्षामा वेणीभूतशिरोरुहा वभावुपपतिं शान्ता शिखा शान्तमिवानलं ४४ अजानती प्रियतमं यदा परतमं गता सुस्थिरासनमासाद्य यथापूर्वमुपाचरत् ४५ यदा नोपलभेतांघ्रि
कृपाणं पत्युरर्चती आसीत्संविग्नहृदया यूथभ्रष्टा मृगी यथा ४६ आत्मानं शोचती दीनम
बंधुर्विक्लवा अश्रुभिः स्तनावासिच्य विपिने सुस्वरं प्ररुरोद सा ४७ इति क्षोणीष्ट राजर्षे द्रुमामु
दधिमेखला दस्युभ्यः सत्रबंधुभ्यो बिभ्यती पातुमर्हसि ४८ एवं विलपती बाला विपिनेनुग
तां पतिं पतिता पादयोर्भर्तुरुदंत्यश्रूण्यवर्तयत् ४९ चितां दारुमयीं चित्वा तस्यां पत्युः कले
वरं आदीप्य चानुमरणे विलपंती मनो दधे ५० तत्र पूर्वं तरः कश्चित्सखा ब्राह्मण आत्मवान्
सांत्वयन्वल्गुना साम्ना तामाह रुदती प्रभो ५१
क्षाणनापश्यत् ४६ अबंधुं पतिरहितं अश्रुभिरासिंच्य ४७ सत्रबंधुभ्यः अधार्मिकक्षत्रियेभ्योऽपि ४८ रघु
अवर्त्तयत् प्रवर्त्तयामास ४९ पूर्वं तरः अनादिरीश्वरः सखा द्वा सुपर्णाविति श्रुतेः साम्ना प्रियवाक्येन संबोध
१०२

स एवं वर्त्तमानः आत्मन्यात्मानं विद्वान् अन्यस्मादुपरराम कथं विद्वान् व्यति
रिक्तत्वेन कुतः व्यापकतया देहादिप्रकाशत्वेन ननु देहाद्याकारे विमर्शे न तत्प्रकाशयति ननु निराकारा मत्या
अत आह आमर्शस्यापि साक्षिणं अयं भावः विमर्शो नाम अंतःकरणवृत्तिः सा च जडत्वादात्मप्रकाश्यैवेति य
था स्वप्ने मम इदं शिरः छिन्नमित्यादिप्रतीतौ तद्व्यतिरिक्तमात्मानं वेत्ति तद्वत् ४० केन विद्वान् तत्राह साक्षाद्ध

स व्यापकतयात्मानं व्यतिरिक्ततयात्मनि विद्वान्स्वप्न इवामर्शसाक्षिणं विरराम ह ४० साक्षाद्भ
गवतोक्तेन गुरुणा हरिणा नृप विशुद्धज्ञानदीपेन स्फुरता विश्वतोमुखं ४१ परे ब्रह्मणि चात्मानं
परं ब्रह्म तथात्मनि ईक्षमाणो विहायेक्षाम् अस्मादुपरराम ह ४२ पतिं परमधर्मज्ञं वैदर्भी मलयध्व
जं प्रेम्णा पर्यचरद्धित्वा भोगान्सा पतिदेवता ४३

रिरेव गुरुस्तेनोक्तेन सर्वतोमुखं यथा तथा स्फुरता अ
नवच्छिन्नेन ज्ञानेन ४१ तदेवाह पर इति ब्रह्मैवाहं न सा इति ब्रह्मण्यात्मन ईक्षणेन शोकादिनिवृत्तिः अह
मेव ब्रह्मेत्यात्मनि ब्रह्म ईक्षणेन ब्रह्म परोक्षत्वनिवृत्तिः अतो व्यतिहारेण ईक्षमाणः अस्मात्संसारात् उपरराम
ननु चैवमपि जीवस्य कुतो ब्रह्मत्वापत्तिः ईक्षणस्यैव व्यवधायकत्वादित्याशंक्याह ईक्षां विहाय दग्धेंधना
नलवत् तस्याः स्वयमेवोपशान्तेरिति भावः ४२ ४३

भा०च० स्वयमेवेमं श्लोकं व्याचष्टे पंचेंद्रियार्था इति षट्कुलमिति षट्त्वं च एकपालमिति च स्पष्टत्वान्न व्याख्यातं ५७
१०२ भूतान्येवाव्यया प्रकृतिः उपादानं यस्य स्त्रीधवमित्यस्य व्याख्यानं शक्तिरधीशा यस्य तद्दृशः सन्नित्यर्थः ५८
स्पष्टः अभिभूतः अतो न विद्यते श्रुते महत्त्वे स्मृतिर्यस्य ५९ तत्त्वमुपदिशामि तत्त्वमिति च हेतुभिः सुहृत्पतिः
पंचेंद्रियार्था आरामा द्वारः प्राणा नव प्रभो तेजोवन्नानि कोष्ठानि कुलमिंद्रियसंग्रहः ५७ विपणस्तु
क्रियाशक्तिर्भूतप्रकृतिरव्यया शक्त्यधीशः पुमानत्र प्रविष्टो नावबुध्यते ५८ तस्मिंस्त्वं रामया स्पृ
ष्टो रममाणोऽश्रुतस्मृतिः तत्संगादीदृशीं प्राप्तो दशां पापीयसीं विभो ५९ न त्वं विदर्भदुहिता ना
यं वीरः सुहृत्तव न पतिस्त्वं पुरंजन्या रुद्धो नवमुखे यया ६० माया ह्येषा मया सृष्टा यत्पुमांसं स्त्रियं स
तीं मन्यसे नोभयं यद्वै हंसौ पश्यावयोर्गतिं ६१ अहं भवान्न चान्यस्त्वं त्वमेवाहं विचक्ष्व भोः न नौ पश्य
न्ति कवयश्छिद्रं जातु मनागपि ६२
नवद्वारे पुरे यया रुद्धोऽसि तस्याः ६० पुमांसं पूर्वजन्मनि पदमन्यथाः इदानीं च सतीं श्रेष्ठां स्त्रियं यन्मन्यसे
एषा माया यत उभयमपि वस्तुतो नास्ति यस्मादावां हंसौ शुद्धौ नौ आवयोः वक्ष्यमाणं गतिं स्वरूपं पश्य
६१ तत्त्वंपदार्थयोरभेदं दर्शयन्नैक्यमाह अहमेव भवान् उपचारं वारयति न चान्य इति व्यवहारोपदेशः उ
भिप्रायः छिद्रमंतरम् ६२

यस्य यं शोचसि अग्रे सृष्टेः पूर्वं विचचर्थ मयि स्थितत्वेन सख्यसुखं अनुभूतवानसि ५२ यद्यपि मां जानासि तथा
त्वया आत्मानं त्वामविज्ञातसखं अविज्ञातः कश्चिन्मे सखा आसीदित्येव किं स्मरसि सखेति पुंस्त्वनिर्दिष्टः प्राक्तन
पुंस्त्वस्मरणाय सख्यं स्मारयन् स्ववियोगकृतमनर्थमाह हित्वेति सार्द्धैः षड्भिः पदं स्थानं ५३ हंसौ शुद्धौ मानसं हृ
दयमयनं ययोः कयापदेशेन मानससरसि स्थितौ पक्षिणौ वभूतां जातौ ओको गृहं अंतरा विनैव वाबूहू ए

चत्वं २ कात्वं कस्यासि को वायं शयानं यस्य शोचसि जानासि किं सखायं मां येनाग्रे विचचर्थह ५२ अपि स्म
रसि चात्मानमविज्ञातसखं सखे हित्वा मां पदमन्विच्छन् भौमभोगरतो गतः ५३ हंसावहं च त्वार्य
सखायौ मानसायनौ अभूतामंतरा वौकः सहस्रपरिवत्सरान् ५४ स त्वं विहाय मां बंधो गतो
ग्राम्यमतिर्महीं विचरन् पदमद्राक्षीः कयाचिन्निर्मितं स्त्रिया ५५ पंचारामं नवद्वारमेकपालं
त्रिकोष्ठकं षट्कुलं पंचविपणं पंचप्रकृति स्त्रीधवं ५६ वार्षि सहस्रं परिवत्सरान् महप्रलयोया

वत् ५४ हे बंधो ग्राम्येषु सुखेषु मतिर्यस्य स्त्रिया मायया ५५ पंचारामा उपवनानि यस्मिन् नवद्वाराणि छि
द्राणि यस्मिन् एकः प्राणः पालो यस्मिन् त्रीणि पृथिव्यप्तेजांसि कोष्ठानि प्रकारा यस्मिन् षट्कुलानि स्त्री
नेंद्रियमनांसि अभीष्टविषयसमर्पकाः वणिजो यस्मिन् पंचविपणाः हट्टाः कर्मेंद्रियाणि यस्मिन् पंचभू
तानि प्रकृतिः उपादानकारणं यस्य स्त्री बुद्धिरेव धवः पतिः स्वामिनी यस्मिन् ५६

भा० च० तत्र तेषु पुरेषु मध्ये ४ अक्षभिरिंद्रियैः ५ पंचवृत्तित्वात्पंचशिराः सर्प इव प्राणः ६ एकादशमहाभट इत्यनेनैकादशो
१० ४ महाभटो नायक इति उक्तं संदर्शयति बृहद्बलं यस्य तन्मनः नवखानि द्वाराणि यस्य ७ द्युमत्खद्योतादेर्थः संक्षेपेण
यस्तदिंद्रियसंयुतः स आत्मा नाभिर्वा बहिर्याताीति ८ पुरः पूर्वभागकृताः ९ नेत्रे इति रूपमिति च द्रष्टव्यमिति खद्योतादीनां व्याख्या

यदा जिघृक्षन्पुरुषः कार्त्स्न्येन प्रकृतेर्गुणान् नवद्वारं द्विहस्तांघ्रि तत्रामनुत साध्विति ६ बुद्धिं तु प्रमदां
विद्यान्ममाहमिति यत्कृतं यामधिष्ठाय देहेस्मिन्पुमान्भुंक्तेक्षभिर्गुणान् ५ सखाय इंद्रियगणा
ज्ञानं कर्म च यत्कृतं [illegible] सख्यस्तद्वृत्तयः प्राणः पंचवृत्तिर्यथोरगः ६ बृहद्बलं म
नो विद्यादुभयेंद्रियनायकं पंचालाः पंचविषया यन्मध्ये नवखं पुरं ७ अक्षिणी नासिके कर्णौ मुखं
शिश्नगुदाविति द्वे द्वे द्वारौ बहिर्याति यस्तदिंद्रियसंयुतः ८ अक्षिणी नासिके आस्यमिति पंच पुरः कृ
ताः दक्षिणा दक्षिणः कर्ण उत्तरा चोत्तरः स्मृतः ९ पश्चिमे इत्यधो द्वारौ गुदं शिश्नमिहोच्यते खद्योता
२ श्री विर्मुखी चात्र नेत्रे एकत्र निर्मिते रूपं विभ्राजितं ताभ्यां विचष्टे चक्षुषेश्वरः १० नलिनी नालिनी नासे गंधः
सौरभ उच्यते घ्राणोऽवधूतो मुख्यास्यं विपणो वाग्रसविद्रसः ११
नेत्रयोः अनुवादः ईश्वरः पुरंजनः १० नासे इति व्याख्या अवधुनोति अवधूतो वायुः तदात्मिके नौ श्वासेन सह के स्या
नत्वात् घ्राणोऽवधूतः आस्यमिति व्याख्या रसज्ञो विपणान्वित इत्यत्र रसज्ञ [illegible] शब्द निर्दिष्ट स्य रस विदिप्रान्व
वादः रस इति व्याख्या रसनेंद्रियमित्यर्थः विपणो वाग्रसविद्रसः इत्येव पाठः श्री कर्षितान्वयदोषः ११ १०४

तर्हि कथमावयोरज्ञत्वसर्वज्ञत्वादिधर्महेतुस्तत्राह यथेति ॥ आत्मानं देहमादर्शे निर्मलं महान्तं स्थिरं चावेक्ष
ते परस्य च लक्ष्यं ॥ तद्विपरीतं विद्याविद्योपाधिकृतो धर्मभेद इत्यर्थः ॥ ६३ ॥ नत्वव्यभिचारेणद्रष्टुरवियोगेन ॥ द्वि
कथामात्रमिति बुद्धिं वारयति ॥ वर्हिष्मन्नेतत्परोक्षेण राजकथामिषेणात्र हेतुः ॥ यद्यस्मात् ॥ ६४ ॥ इति च॰ ॥

यथा पुरुष आत्मानमेकमादर्शचक्षुषोः ॥ द्विधाभूतमवेक्षेत तथैवांतरमावयोः ॥ ६३ ॥ एवं स मानसो हंसो
हंसेन प्रतिबोधितः ॥ स्वस्थस्तद्व्यभिचारेण नष्टामाप पुनः स्मृतिं ॥ ६४ ॥ वर्हिष्मन्नेतदध्यात्मं पारो
क्ष्येण प्रदर्शितं ॥ यत्परोक्षप्रियो देवो भगवान्विश्वभावनः ॥ ६५ ॥ इति श्रीमद्भागवते महापुराणे च
तुर्थस्कंधे अष्टाविंशोध्यायः ॥ २८ ॥ प्राचीनवर्हिरुवाच ॥ भगवंस्ते वचोऽस्माभिर्न सम्यगवगम्यते
कवयस्तद्विजानंति न वयं कर्ममोहिताः ॥ १ ॥ नारद उवाच ॥ पुरुषं पुरंजनं विद्याद्यद्व्यनक्त्यात्मनः पुरं
एकद्वित्रिचतुष्पादं वहुपादमपादकं ॥ २ ॥ योऽविज्ञाताहृतस्तस्य पुरुषस्य सखेश्वरः ॥ यन्न विज्ञायते पुंभिर्नाम
भिर्वा क्रियागुणैः ॥ ३ ॥

र्थः ॥ श विंशः ॥ २९ ॥ ऊनत्रिंशे परोक्षार्थव्याख्यानेनोपसंहृतिः ॥ स्त्रीसंगतो भवस्त्वीशसंगान्मुक्तिरितिस्फुटं ॥ कवयः आ
ध्यात्मविदः ॥ १ ॥ व्यनक्ति लिंगयति ॥ चेतनीकरोतीत्यर्थः ॥ यद्वा ॥ व्यनक्ति प्रकटयति ॥ ततश्च स्वकर्मणा पुरं जनयतीति पुरं
जनपदं व्याख्यातं भवति एकद्व्यादयः पादा यस्य ॥ २ ॥ अविज्ञातशब्देनाह तोच्यातः ॥ उक्तो यः ईश्वरः ॥ अविज्ञातनामभि

टी॰ च॰ ... ॥ ४

पंचप्रहरणमित्येतद्व्याचष्टे पंचेंद्रियार्थप्रक्षेप इति १९ पंचेंद्रियैः स्वनाविनोदमिवान्यायेन विषयसेवां करो
तीति पंचस्वनाविनोदकृत् अनेन च चारमृगयां तत्रेत्यादि व्याख्यातं २० परिक्रांत्या परिक्रमणेन २१ भगनीत्य
नेन जगृहे लोकानां क्षयाय २२ चराः संचारिणः भूतानामुपसर्गो पीडा यया आशु शीघ्रं मृत्युहेतुः रयो वेगो

मनोरस्थिरबुद्धिस्ततो हन्नीडो हंद्वकूवरं पंचेंद्रियार्थप्रक्षेपः संप्रधावतु वरूपकः १९ आकूतिविक्र
मो वाह्यो मृगतृष्णां प्रधावति एकादशेंद्रियचमूः पंचस्वनाविनोदकृत् संवत्सरश्चंडवेगः का
लो येनोपलक्षितः २० तस्याहानीह गंधर्वा गंधर्व्यो रात्रयः स्मृताः हरंत्यायुः परिक्रांत्या षष्ट्युत्त
रशतत्रयं २१ कालकन्याराजसाक्षाल्लोकस्तां नाभिवंदति स्वसारं जगृहे मृत्युः क्षयाय यवने
श्वरः २२ आधयो व्याधयस्तस्य सैनिका यवनेश्वराः भूतोपसर्गाशुरयः प्रज्वारो द्विविधो ज्वरः
२३ एवं बहुविधैर्दुःखैर्दैवभूतात्मसंभवैः क्लिश्यमानः शतं वर्षं देहे देही तमोवृतः २४

ऽस्य प्रज्वारस्येति प्रशब्दव्याख्या पाठांतरे भूतकृतास्त्वरयः अनेन च अरिभिरुपरुद्ध इत्यादि पदं व्याख्यातं द्विविधः
शीतोष्णरूपेण प्रवेशनिर्गमभेदाद्वा २३ एवं परोक्षत्वेनोक्तमर्थं व्याख्याय सर्वकथातात्पर्यमाह एवमित्यादि विरम
क्रमेणान्वयेन आधिदैविकादिदुःखैः क्लिश्यमानो ममाहमिति देहे शतवर्षाणि प्रवर्तत इति द्वयोरन्वयः २४

अंधः अन्नं १२ १३ ग्राम्यकमित्यस्यानुवादः ग्रामिणांरतिस्तस्यव्याख्याव्यवायइति १४ १५ विषूचीनपदार्थोनुवादो
विषूचिरितितद्गुणैर्मनोगुणैस्तमःसत्वरजोभिः १६ महिषीयद्यदीहेतेत्यादेरर्थसंग्रहमाह यथायथाबुद्धिःस्वप्नेवि
क्रियतेजाग्रतिविकरोतिवाइंद्रियाणिपरिणमयति तस्यागुणैरक्तोलिंगआत्मातथातस्याःवृत्तीःदर्शनाद्यःकेवलमु
पद्रष्टैवसन्वलादनुकार्यते १७
आपणोव्यवहारोत्रचित्रमंधोबहूदनं पितृहूर्दक्षिणःकर्णउत्तरोदेवहूःस्मृतः १२ प्रवृत्तंचनिवृत्तंचशा
स्त्रंपंचालसंज्ञितं पितृयानंदेवयानंश्रोत्राच्छ्रुतधराद्व्रजेत् १३ आसुरीमेढ्रमर्वाग्व्यवायोग्रामि
णांरतिः उपस्थोदुर्मदःप्रोक्तोनिर्ऋतिर्गुदउच्यते १४ वैशसंनरकंपायुर्लुब्धकोंधौतमेशृणु हस्त
पादौपुमान्ताभ्यांयुक्तोयातिकरोतिच १५ अंतःपुरंचहृदयंविषूचिर्मनउच्यते तत्रमोहंप्रसादंवा
हर्षंप्राप्नोतितद्गुणैः १६ यथाबुद्धिर्विक्रियतेगुणाक्ताविकरोतिच तथातथोपद्रष्टात्मातद्वृत्तीरनुकार्य
ते १७ देहोरथस्त्विंद्रियाश्वःसंवत्सररयोगतिः द्विकर्मचक्रस्त्रिगुणध्वजःपंचासुबंधुरः १८
आशुगमित्येतद्व्याचष्टे संवत्सरस्यैवाप्रतिहतोरयोवेगःप्रतीतोयस्यससंवत्सररयःवस्तुतस्तुअगतिः स्वप्नशरीरा
देर्बुद्धाविवविहितत्वेनदेशांतरगत्याभावात् पाठांतरेसंवत्सरश्चतत्कृतंवयश्चताभ्यांगतिर्यस्येतिदोषमित्येतद्
व्याख्यानारदेनकृता द्विचक्रमित्यस्यव्याख्याद्विकर्मचक्रइति त्रिवेणुपदव्याख्या १८

भा० चं०
१०६

कामव्याप्त आशयो यस्य ३१ ननु तर्हि सुखस्य संभवात् दुःखस्य च प्रतीकारसंभवान्नैकांततो हेयत्वं तत्रा
ह द्वयोरिति दुःखस्य प्रतीकारस्तावन्नास्ति स्याच्चेत्तस्य प्रतिक्रिया तथापि त्रिविधेषु दुःखेषु मध्ये एकतरेणापि
दुःखेन व्यवच्छेदो वियोगो नास्ति ३२ प्रतिक्रियाणामपि दुःखरूपत्वादिति सदृष्टांतमाह यथाहीति ३३ दुः
खस्य मूलभूतानि कर्माणि प्रतिक्रियादिकर्मभिर्नैव निवर्तंत इत्याह नैकांततः अत्यंतं सुखास्तन

तथा कामाशयो जीव उच्चावचं च यथा भ्रमन् उपर्यधो वा मध्ये वा याति दिष्टं प्रियाप्रियं ३१ दुःखे
ष्वेकतरेणापि दैवभूतात्महेतुषु जीवस्य न व्यवच्छेदः स्याच्चेत्तत्प्रतिक्रियाः ३२ नैकांततः प्रती
कारः कर्मणां कर्म केवलं द्वयं ह्यविद्योपसृतं स्वप्ने स्वप्न इवानघ ३३ अर्थे ह्यविद्यमानेऽपि सं
सृतिर्न निवर्तते मनसा लिंगरूपेण स्वप्ने विचरतो यथा ३४ अथात्मनोऽर्थभूतस्य यतोऽन
र्थपरंपरा संसृतिस्तद्व्यवच्छेदो भक्त्या परमया गुरौ ३५

केवलं ज्ञानरहितं अविद्यया उपसृतं प्राप्तं अतो विरोधान्न निवर्तकत्वमिति भावः अत्र दृष्टांतः स्वप्ने दृष्टः स्व
प्रप्रबोधं विना यथा तं स्वप्नमन्यं तेन प्रतिकरोतीत्यर्थः ३४ ननु तर्हि अज्ञानविलसितत्वेन संसृतिर्हेतोर्दे
हादेरप्यसत्वात्किं तन्निवर्तनप्रयासेन तत्राह अर्थे हीति लिंगरूपेण उपाधिभूतेन ३५ तदेवं संसृतिप्रको
रमुक्त्वा तन्निवृत्तिप्रकारमाह अथेति तस्मात्पुरुषार्थभूतस्यैवात्मनः यतोऽज्ञानात्मनसो वानर्थपरंपरारूपा संस

तितस्य वा व्यवच्छेदो गुरुरूपे वासुदेवे भक्त्यैव ३६

१०६

अशनापिपाशादीन्प्राणधर्मान् अंधत्वादीनिंद्रियधर्मान् कामादीन्मनोधर्मांश्च निर्गुणोऽप्यात्मन्यध्यस्य कामल
वान् विषयसुखलेशान् ध्यायन् कर्मकृत् २५ ततः किमत आह यदेति द्वाभ्यां स्वदृक् स्वप्रकाशस्वभावोपि २६
शुक्लं सात्विकं कृष्णं तामसं लोहितं राजसं यथाकर्म तथा जायते २७ तदेवाह शुक्लादिति द्वाभ्यां प्रकाशो भू

प्राणेंद्रियमनोधर्मानात्मन्यध्यस्य निर्गुणः शेते कामलवान् ध्यायन् ममाहमिति कर्मकृत् २५
यदात्मानमविज्ञाय भगवंतं परं गुरुं पुरुषस्तु विषज्जेत गुणेषु प्रकृतेः स्वदृक् २६ गुणाभिमा
नी स तदा कर्माणि कुरुतेऽवशः शुक्लं कृष्णं लोहितं वा यथाकर्माभिजायते २७ शुक्लात्प्रकाश
भूयिष्ठांल्लोकानाप्नोति कर्हिचित् दुःखोदर्कान्क्रियायासांस्तमःशोकोत्कटान्क्वचित् २८ क्व
चित्पुमान्क्वचिच्च स्त्री क्वचिन्नोभयमंधधीः देवो मनुष्यस्तिर्यग्वा यथाकर्मगुणं भवः २९ क्षुत्प
रीतो यथा दीनः सारमेयो गृहं गृहं चरन्विंदति यद्दिष्टं दंडमोदनमेव वा ३०

यिष्ठो येषु दुःखमुदर्कमुत्तरफलं येषु क्रियया आयासो येषु तान् लोहितान् तमःशोकौ उत्कटौ येषु तान्
कृष्णादिति ज्ञेयं २८ नोभयं नपुंसकं यथाकर्मणां कर्मगुणमनतिक्रम्य २९ तेषु दैववशेन सुखदुःखे
प्राप्नोतीति सदृष्टांतमाह द्वाभ्यां क्षुधा परीतो व्याप्तः सारमेयः श्वा दंडं दंडेन ताडनं ३०

भगवदनुग्रहमंतरेणतुनकस्यापिज्ञानसंभवइतिकैमुत्यन्यायेनाह चतुर्भिः प्रजापतिर्ब्रह्मा ४२ ४३ मदंताअहंना
रदांतोयेषांतेवाचांपतयोपितपोविद्यासमाधिरूपैः पश्यंतोविचिन्वंतोऽपिपश्यंतंसर्वसाक्षिणंनपश्यंति ४४ कुत
इत्यत्राह शब्दब्रह्मणिवेदेउरुविस्तारेयस्य अर्थतोपिपारस्तन्नेपितस्मिन्वर्त्तमानाः मंत्राणांलिंगैर्वज्रहस्त
त्वादिगुणयुक्तैर्विविधैर्देवताभिधानसामर्थ्यैःपरिच्छिन्नमेवेन्द्रादिरूपंतत्तत्कर्मग्रहेणभजंतःपरमेश्वरंन

प्रजापतिपतिःसाक्षाद्भगवान्गिरिशोमनुः दक्षादयःप्रजाध्यक्षानैष्ठिकाःसनकादयः ४२ मरीचिरत्र्यं
गिरसौपुलस्त्यःपुलहःक्रतुः भृगुर्वशिष्ठइत्येतेमदंताब्रह्मवादिनः ४३ अद्यापिवाचस्पतयस्तपोविद्यासमादि
भिः पश्यंतोपिनपश्यंतिपश्यंतंपरमेश्वरम् ४४ शब्दब्रह्मणिदुःपारेचरंतउरुविस्तरे मंत्रलिंगैर्व्यवच्छि
न्नंभजंतोनविदुःपरं ४५ यदायस्यानुगृह्णातिभगवानात्मभावितः सजहातिमतिंलोकेवेदेचपरि
निष्ठितां ४६ तस्मात्कर्मसुबर्हिष्मन्नज्ञानादर्थकाशिषु मार्थदृष्टिंकृथाःश्रोत्रस्पर्शिष्वस्पृष्टवस्तुषु ४७

विदुः ४५ तर्हि अन्यः कोनामकर्माद्याग्रहं हित्वापरमेश्वरमेवभजेदतआह यदायमनुगृह्णाति अनुग्रहेहेतुः
आत्मनिभावितःसन्सतदालौकिकेलोकव्यवहारेवेदेचकर्ममार्गेपरिनिष्ठितांमतिंत्यजति ४६ अर्थकाशिषुप
रमार्थत्वेनप्रकाशमानेषुपुरुषार्थबुद्धिंमाकृथाः प्ररोचनाकेवलंश्रोत्रप्रियेषुनस्पृष्टंवस्तुयैः ४७ ॥ ॥

ननु संसृतिनिवृत्तिर्वैराग्यपूर्वकात् ज्ञानादेव न तु भक्तिमात्रात् तरति शोकमात्मविदित्यादिश्रुतेस्तत्राह वासुदेव इति सध्रीची
नेन प्रकारेण ३७ न चासौ महाफलो भक्तियोगः कथं स्यादत आह स तत्र अच्युतस्य कथामाश्रित्य वर्त्तमानो चिरात्स्यात् कस्य
स्यादत आह शृण्वतः श्रद्धधानस्य ३८ कुत्र स्यादत आह यत्रेति भगवतो गुणानुकथने श्रवणे च व्यग्रं सत्वरं चेतो येषां ते ३९
ननु साधुसंगं स्वयमेव हरिचिंतनादिना भक्तिर्वर्द्धतामित्याशंक्याह द्वाभ्यां तस्मिन् स्थाने महद्भिर्मुखरिताः मधुभिदश्चरि

वासुदेवे भगवति भक्तियोगः समाहितः सध्रीचीनेन वैराग्यं ज्ञानं च जनयिष्यति ३७ सोऽचिरादेव राजर्षे स्या
दच्युतकथाश्रयः शृण्वतः श्रद्दधानस्य नित्यदा स्यादधीयत ३८ अत्र भागवता राजन्साधवो विशदाशयाः
भगवद्गुणानुकथनश्रवणव्यग्रचेतसः ३९ तस्मिन्महन्मुखरिता मधुभिच्चरित्रपीयूषशेषसरितः परितः स्र
वंति ता ये पिबंत्यवितृषो नृप गाढकर्णैस्तान्न स्पृशंत्यशनतृड्भयशोकमोहाः ४० एतैरुपद्रुतो नित्यं जीव
लोकः स्वभावजैः न करोति हरेर्नूनं कथामृतनिधौ रतिं ४१ त्रमेव पीयूषं तदेव शिष्यत इति शेषा यासु अ सारां
श एव रहितं श्रुतामृतवाहिन्य इत्यर्थः अवितृषः अलंबुद्धिशून्याः सतः गाढैः साधनैः कर्णैर्ये ताः सरितः पिबंति
सेवंते अशनशब्देन तदुपलक्ष्यते अशनादयस्तान्न स्पृशंति भक्तिरसिकान्न बाधंत इत्यर्थः ४० सत्संगमंतरेण स्व
यमेव कथाचिंतनादावालस्यादिना समावेशाभावाच्च क्षुत्पिपासाद्यभिभूतस्य भक्तिर्न संभवतीत्याह एतैरिति ४१

भा० चं०
१०४

उक्तमुपसंहरति एवंभवतःप्रश्नःसंछिन्नःपरिहृतः तदेवमात्मनोबंधमोक्षप्रकारेण कथारूपेण कथितेपिनातिनिर्वि
र्लचित्तपुत्रागमनंप्रतीक्षमाणंसंतं तेनतत्क्षणमेवमहाभयप्रकंपितसकलगात्रंगृहान्निर्वासयितुं हरिणरूपकमाह
अत्रैतिवदतोमेववचःश्रृणु॥५२॥ क्षुद्रमल्पंचरतीतितथातं॥ अलुक्सुमनसां पुष्पाणांशरणेआश्रमेवाटिकायां

नारद उवाच॥ प्रश्नएवंहिसंछिन्नोभवतःपुरुषर्षभ अत्रमेवदतोगुह्यंनिशामयसुनिश्चितं ५२ क्षुद्रंचरंसुम
नसांशरणेमिथित्वारक्तंषडंघ्रिगणसामसुलुब्धकर्णं अग्रेवृकानसुतृपोविगणय्ययांतं पृष्ठेमृगंमृगयलुब्धक
बाणभिन्नं ५३ सुमनसःसधर्मीणांस्त्रीणांशरणआश्रमे पुष्पमधुगंधवत्क्षुद्रतमंकाम्यकर्मविपाकजंका
मसुखलवंजैह्व्यौपस्थ्यादिविचिन्वंतंमिथुनीभूयतदभिनिवेशितमनसंषडंघ्रिगणसामगीतवदतिमनोह
रवनितादिजनालापेष्वतितरामतिलोभितकर्णमग्रेवृकयूथवदात्मनआयुर्हरतोऽहोरात्रातान्कालविशेषान
विगणय्यगेहेषुविहरंतंपृष्ठतएवप्रवृत्तोलुब्धकःकृतांतोऽंतःशरेणयमिहपराविध्यतितमिममात्मानम
होराजन्भिन्नहृदयंद्रष्टुमर्हसीति ५४

मिथित्वामिथःपरस्परंस्त्रियासहमिलित्वा तत्रैववरक्तमासक्तंषडंघ्रयोभ्रमरास्तेषांसामसंगीतेषुलुब्धंकर्णोयस्यतंप
रेषामसुभिर्हितैःस्वीयानसून्तर्पयंतीत्यसुतृपःतानविगणय्यअगणयित्वालुब्धकस्यबाणेनभिन्नंमृगंमृगयअन्वेष
य ५३ श्लोकंप्रस्तुतंयोजयन्व्याचष्टे सुमनोभिःसमानोधर्मःपरिणामविरसत्वंयासांस्त्रीणांमिथित्वेत्यस्यव्याख्या मि
थुनीभूयस्त्रीभिःसहेतिशेषः रक्तमित्यस्यव्याख्या तास्वभिनिवेशितंमनोयेन असुतृपइत्यस्यव्याख्या आयुर्हर

ननु वेदेन स्वर्गादिसाधनत्वेनोक्तानि कर्माणीति वेदवादिनो वदंति कथमस्पष्टवस्तुषित्युच्यते तत्राह ये धूम्रधियो म
लिनबुद्धयः सकर्मकं कर्मपरं वेदमाहुस्तेऽतद्विदः अवेदज्ञाः यतस्ते स्वस्वरूपभूतं लोकमात्मतत्त्वं वेदतात्पर्यगोचरं
रं न विदुः ॥४८॥ त्वं तु महामूर्खः इत्याह आस्तीर्येति बृहद्वधात् पशुवधात् मानी महायज्वाहमित्यहंकारी अ
स्तब्धः अ विनीतः सन् कर्म नावैषि परं विद्यास्वरूपं तच्च न वेत्सि ॥४९॥ नारदः स्वयं कृपया तद्द्वयं निरूपयति हरि

स्वलोकं न विदुस्ते वै यत्र देवो जनार्दनः आहुर्धूम्रधियो वेदं सकर्मकमतद्विदः ॥४८॥ आस्तीर्य दर्भैः प्राग
ग्रैः कार्त्स्न्येन क्षितिमंडलं स्तब्धो बृहद्वधान्मानी कर्म नावैषि यत्परं तत्कर्म हरितोषं यत्सा विद्या तन्मतिर्य
या ॥४९॥ हरिर्देहभृतामात्मा स्वयं प्रकृतिरीश्वरः ॥ तत्पादमूलं शरणं यतः क्षेमो नृणामिह ॥५०॥ स वै प्रि
यतमश्चात्मा यतो न भयमण्वपि ॥ इति वेद स वै विद्वान् यो विद्वान् स गुरुर्हरिः ॥५१॥ ॥ रामराम

तोषयतीति हरितोषं यत् तदेव कर्म यत् तस्मिन् हरौ मतिर्भवति सैव विद्या महाफलत्वात् ॥४९॥ कुत इत्यपेक्षायां
हरेः परमफलत्वं दर्शयन्नाह द्वाभ्यां हरिर्देहभृतामात्मा ईश्वरश्च तत्र हेतुः स्वयं स्वातंत्र्येण प्रकृतिः कारणं अ
तस्तेषां तत्पादमूलमेव शरणं आश्रयः यतस्तस्मिन् ॥५०॥ न च तद्भजने अन्यभजन इव दुःखं भयं चेत्याह स
इति यो वेद स एव विद्वान् स गुरुः स एव हरिश्च ॥५१॥

इतिवादश्रुतये प्राप्यपुण्यकृतांलोकानिति शारीरजैः कर्मदोषैः याति स्थावरतां नरः इति त्वयाचोक्तं साक्ष्याती
स्वभूयात्तिभिति एतच्च कर्तृभोक्तृदेहेन कृतमानसाकृताभ्यागमसंगान्नसंगच्छत इति भावः संशयांतरमाह
प्रोक्तं वेदोक्तम कर्म क्रियते ज्ञैः तच्च निरंतरत्वेनैव परोक्षं अदृश्यं सन्न प्रकाशते अतः कर्मस्थानं घृत्वान्ते ज्ञो
पितृधीदृ इति भावः पूर्व प्रथमस्यैवोत्तरं येनैवेति अव्यवधानेन कर्मभोक्तृदेहविच्छेदं विना स्थूलदेहनाशे
ऽपि मनः प्रधानस्य लिंगशरीरस्य देहस्यानाशो भोक्तृदोषप्रसंग इत्यर्थः ६० लिंगदेहविशिष्टस्य भोक्तृत्वं स्व

इति वेदविदां वादः श्रूयते तत्र तत्र ह कर्म यत्क्रियते प्रोक्तं परोक्षं न प्रकाशते ॥ पूर्व ॥ नारद उवाच ॥ ये नै
वारभन्ते कर्माणि नैवामुत्र न तत् पुमान् भुंक्ते ह्यव्यवधानेन लिंगेन मनसा स्वयं ६० शयानमिममुत्सृज्य
श्वसंतं पुरुषो यथा कर्मात्मन्याहितं भुंक्ते तादृशेनेतरेण वा ६१ ममैतन्मनसा यद्यत् सावहमिति
ब्रुवन् गृह्णीयात्तत् पुमान् राद्धं कर्म येन पुनर्भवः ६२ अत्र दृष्टांतेन स्पष्टयति शयानमिमं जाग्रद्देहं श्व
संतं जीवंतं उत्सृज्य तदभिमानं त्यक्त्वा आत्मनि मनसि संस्काररूपेणाहितं कर्म यथा भुंक्ते तादृशेन शयानदेहवि
शिष्टस्यैव दृश्यते न तु देहेनान्येन वा पश्वादिदेहेन तथा लोकांतरेऽपीति भावः ६१ ननु एवं तर्हि नाम लिंगस्य विशि
ष्टस्यानेन दृष्टांतेन भोक्तृत्वं कर्तृत्वं तु दानप्रतिग्रहादिषु स्थूलदेहविशिष्टस्यैव दृश्यते तत्राह ममैतत्पुत्रादयः
स अहं ब्राह्मण इति ब्रुवन् मनसा यद्यद्देहं गृह्णीयात् ततो देहाद्राद्धं सिद्धं कर्म पुमान् गृह्णीयात् येनक

पा २

उपदेशसारमाह ॥ सत्वमितिविचक्ष्वविचार्यश्रुतंहृदिचित्तेकर्णयोर्धुनींनदीमिवबहिर्वृत्तिंचित्तेनियच्छ ॥ एतच्चवैंद्रि
योपलक्षणार्थंगृहाश्रमंचजहि ॥ कीदृशं ॥ असत्तमानांअतिकामुकानांयानियूथानितेषांगाथावार्तायस्मिन्जीवा
नांशरणंईश्वरंएवंक्रमेणसर्वतोविरम ॥ ५५ ॥ अर्थांतरंप्रष्टुंपूर्वोक्तमनुवदतिश्रुतमितिश्रुतमन्वीक्षितंविचारि
तंब्रह्मन्नारदएतत्त्वदुक्तमात्मतत्त्वं ॥ उपाध्यायाःयेमेममकर्मोपदेष्टारः ॥ आचार्यास्तेनजानंति ॥ ५६ ॥ श्रुत

सत्वंविचक्ष्वमृगचेष्टितमात्मनोऽन्तश्चित्तंनियच्छहृदिकर्णधुनींचचित्ते ॥ जह्यंगनाश्रममसत्तमयू
थगाथांप्रीणीहिहंसशरणंविरमक्रमेण ॥ ५५ ॥ राजोवाच ॥ श्रुतमन्वीक्षितंब्रह्मन्भगवान्यदभाषत ॥
नैतज्ज्ञानंत्युपाध्यायाःकिंनब्रूयुर्विदुर्यदि ॥ ५६ ॥ संशयोत्रतुमेविप्रसंछिन्नस्तत्कृतोमहान् ॥ ऋषयो
पिहिमुह्यंतियत्रनेंद्रियवृत्तयः ॥ ५७ ॥ कर्माण्यारभतेयेनपुमानिहविहायतं ॥ अमुत्रान्येनदेहेनजुष्टान्य
सयदश्नुते ॥ ५८ ॥

ततस्तत्कृतःउपाध्यायकृतः ॥ तद्वाक्यविरोधेनात्मतत्त्वेसंभावनरूपोमहान्संशयः ॥ संछिन्नस्त्वयाअत्र
तुकश्चित्संशयोवर्त्तते ॥ यत्रेंद्रियवृत्तीनांप्रवृत्तेर्मुह्यंति ॥ ५७ ॥ संशयमाहद्वाभ्यांकर्माणियेनदेहेनकरो
तितमत्रैवविहायअमुत्रैकांतरेकर्मापस्थापितेनान्येनदेहेनजुष्टान्युपभुक्तानिजीवोऽश्नुतेप्राप्नोति ॥ ५८ ॥
लो

भा० चं० नतु कश्चिद्दृष्टं नानुभूतमपि स्वप्ने प्रतीयते यथा पर्वताग्रे समुद्रः दिवा नक्षत्राणि स्वशिर इत्यादि तत्राह अदृष्ट
११९ मिति अन्यदेशाश्रयं समुद्रादिकं पर्वताग्रे निशाश्रयं नक्षत्रादिकं दिवा[illegible] अभ्यंगादिक्रियाश्रयं स्वशिरश्छे
दनाश्रयं निद्रादिदोषेण हि प्रतीयत इत्यनुमंतव्यं परस्यापि तदनुपपत्तेस्तुल्यत्वादिति भावः ६६ ननु द
रिद्रः कश्चिदात्मानं महाराजं पश्यति राजा च रंकमात्मानं पश्यति तत्कथमसंभावितं संगच्छेत तत्राह सर्व

अदृष्टमश्रुतं चात्र क्वचिन्मनसि दृश्यते यथा तथानुमंतव्यं देशकालक्रियाश्रयं ६७ स
र्वे क्रमानुरोधेन मनसींद्रियगोचराः आयांति वर्गशो यांति सर्वे समनसो जनाः ६८ स
त्त्वैकनिष्ठे मनसि भगवत्पार्श्ववर्तिनि तमश्चंद्रमसीवेदमुपरज्यावभासते ६९ ॥ ऽऽ

इति आयांति भोग्यत्वेन प्राप्नुवंति च यांति च भोगानंतरं यदि कश्चिदमना भवेत् तस्यैवं न स्यात् न त्वेतदस्तीत्याह
सर्वे समनस इति अतः सर्वेषां समनस्कत्वान्मनसि वस्तुसर्वार्थानां क्रमेण प्रवेशान्नात्यंतादृष्टश्रुतः कस्यापि कश्चिदर्थो
स्तीत्यर्थः ६८ तदेवं सर्वैरपि सर्वार्थाः क्रमेण दृश्यंत इत्युक्तं इदानीं युगपदपि सर्वदर्शनं कदाचिद्भवतीत्याह
सत्त्वैकनिष्ठे भगवत्पार्श्ववर्तिनि भगवद्ध्यानपरे मनसि इदं विश्वं उपसंयोगमिव प्राप्यावभासते प्रतीयते न हि सर्वा
पि कदाचित्प्रतीतो दृष्टांतः चंद्रमसि उपरज्यतमः राहुरिव तेनेदं सुष्ठु मनसि सर्वविषयस्फुरणं योगिप्रत्यक्षे

११९

यदुक्तं कर्मणोनष्टत्वान्नामुत्रभोगइतितत्राह यथेति उभयैर्ज्ञानकर्मरूपैरिंद्रियाएामीहितैः कदाचित्कर्मप्रवृत्ति
भिश्चित्तमनुमीयते सत्यपिसर्वेंद्रियविषयसंबंधे युगपत्ज्ञानानुत्पत्तेः तदुक्तं सूत्रपादेन युगपत्ज्ञानानु
त्पत्तिर्मनोलिंगमिति एवंचित्तवृत्तिभिरपिपूर्वदेहजंकर्मलक्ष्यते तासामपियुगपदनुत्पत्ते ॥३॥ इतोपिकर्म
लक्ष्यते [illegible] इत्याह नानुभूतमितिद्वाभ्यां अनेनवर्त्तमानदेहेन क्वचकुत्रचिदपियन्नानुभूतं अननुभू

यथानुमीयत्तेचित्तमुभयैरिंद्रियेहितैः एवंप्राग्देहजंकर्मलक्ष्यतचित्तवृत्तिभिः ॥३॥ नानुभूतंक्व
चानेनदेहेनादृष्टमश्रुतं कदाचिदुपलभ्येतयद्रूपंयादृगात्मनि ॥४॥ तेनास्यतादृशंराजन्लिंगि
नोदेहसंभवं श्रद्धत्स्वाननुभूतोऽर्थोनमनःस्प्रष्टुमर्हति ॥५॥ मनएवमनुष्यस्यपूर्वरूपाणिशं
सति भविष्यतश्चभद्रंतेतथैवनभविष्यति ॥६॥

तंअनुपयुक्तं अदृष्टंचाश्रुतंच यद्रूपंपदार्थात्मकंयादृक्यत्प्रकारंच यत्कदाचित्स्वप्नमनोरथादिषुआत्मनिम
नसिउपलभ्यते ॥४॥ तेनहेतुनाअस्यलिंगिनोवासनाश्रयस्यजीवस्यतादृशंतद्नुभावादियुक्तं पूर्वदेहसंभ
वंश्रद्धत्स्वनिश्चयेनमन्यस्व नह्यननुभूतोऽर्थोमनःस्प्रष्टुंमनसिस्फुरितुमर्हतीति ॥५॥ किंचमनोवृत्त्यैवपूर्वापृ
राणिमनुष्याणांभिन्नानिशरीराणिज्ञायंत इत्याहमनएवेति भद्रंतइतिसम्बोधनं धानाधीमानस्थिराभिर्न
दृत्तिभविष्यतिउद्भवंप्राप्स्यतःनभविष्यतःनीचत्वंप्राप्स्यतोऽपिभाविनिरूपाणिशंसति मनएवौदार्य्यकार्पण्या

दि वृत्तिभिः पूर्वस्यैवमेवासीत् पश्चादप्येवमेव भविष्यती
ति ज्ञापयतीत्यर्थः ॥६॥

भा० च०
१११

तस्मादहंकारास्पदस्थूलदेहस्याविच्छेदाद्वस्तुभूतार्थाभावेपि संसृतिर्निवृत्तिर्नोस्तीत्याह अर्थेह्येति ।
७३ यावल्लिंगस्थूलदेहाविच्छेदात्संसारान्निवृत्तिरित्येतत्प्रपंचयति एवमिति सार्द्धैस्त्रिभिः पंचविधं पंचतन्मा
त्रात्मकं त्रिवृत्त्रिगुणं षोडशविकारात्मना विस्तृतम् ७४ ७५ नन्वेकं देहं विसृज्य देहांतरप्रवेशात्

अर्थे ह्यविद्यमानेपि संसृतिर्न निवर्तते ध्यायतो विषयानस्य स्वप्नेनर्थागमो यथा ७३ एवं पंचविधं
लिंगं त्रिवृत्षोडशविस्तृतं एष चेतनया युक्तो जीव इत्यभिधीयते ७४ अनेन पुरुषो देहानुपादत्ते वि
मुंचति हर्षं शोकं भयं दुःखं सुखं वानेन विंदति ७५ यथा तृणजलौकेयं नापयात्यपयाति च नत्य
जेन्म्रियमाणोपि प्राग्देहाभिमतिं जनः ७६ यावदन्यं न विंदेत व्यवधानेन कर्मणां मन एव
मनुष्येंद्र भूतानां भवभावनं ७७ यदाक्षैश्चरितान्ध्यायन्कर्माण्याचिनुते सकृत् सतिकर्मण्यवि
द्यायां बंधः कर्मण्यनात्मनः ७८

एवं मदेहत्तास्याद्देवेत्यत आह यथेति नापयाति पूर्वं तृणस्यात्यागादपयाति च तृणांतरधारणात्तद्
तथा न त्यजेत् ७६ अन्यं देहं कर्मणां प्राग्देहारंभकाणां व्यवधानेन विच्छेदेन समाप्त्या प्रकरणाद्धपु
पसंहरति मन एवेति भवनं संसारहेतुः ७७ कथं सतितदाह यदेति चरितानुपसंभुक्तान् यतः कर्मालि

यति मनुसंगस्य कुतः कर्मेत्तत्राह अविद्यायां सत्यां अनात्मनो देहादेः कर्मबंधो भवति ७८

१११

नदेवंस्थूलनाशेपिलिंगदेहस्यानाशादन्यःकर्त्ताऽन्योभोक्तेतिनास्तीत्युक्तं तत्रैवंशंकते ननुलिंगदेहस्यस्थूल
देहद्वारेणैवकर्त्तृत्वंभोक्तृत्वेननतुकेवलस्यतत्रकदाचित्स्थूलदेहाभावेजीवस्यकर्तृत्वाभोक्तृत्वाभावान्मु
क्तिःप्रसक्तेप्रसज्येतनतत्राह अहंममेतिभावःस्थूलदेहसंबंधःपुरुषेजीवेनव्यवधीयतेनविछिन्नोभवति
किंपर्यंतं कुक्ष्यादीनांव्यूहःपरिणामोलिंगंयावदस्ति अनादिमान्अनादिःसन् ७० स्वापादावहंकाराभा
नाहंममेतिभावोयंपुरुषेव्यवधीयते यावद्बुद्धिमनोत्रार्थगुणव्यूहोह्यनादिमान् ७० सुप्तिर्मूर्छो
पपातेषुप्राणायनविघाततः नेहतेहमितिज्ञानंमृत्युप्रज्वारयोरपि ७१ गर्भेबाल्येप्यपोष्कल्यादेका
दशविधंतथा लिंगंनदृश्यतेयूनःकुह्वांचंद्रमसोयथा ७२
वान्नछिद्येदंमाशंक्याह द्वाभ्यां सुप्त्यादिषुउपतापमृत्युवियोगादिदुःखंतेषु अहमितिज्ञानं अहंकारः नेहते
नप्रकाशते प्राणायतनानांइंद्रियाणांविघातात् इंद्रियैरिदंकारणंसोदवस्तुग्रहणेत्वहंकारस्फुरतिनान्यथेत्य
र्थः ७१ अपोष्कल्यात् असंपूर्णत्वात् प्राणायतनानामितिशेषः यूनस्तरुणस्यएकादशविधं एकाद
शेंद्रियैःस्फुरंलिंग महंकारःकारणंतन्नदृश्यतेगर्भादेरितिशेषः सतोप्यनभिव्यक्तौदृष्टांतः कुह्वामभावा
स्यांचंद्रमसोलिंगरूपमिव ७९

प्रसंगात्वंचभिः प्रोक्तं वृत्तं प्राचीनवर्हिषः वर्ण्यते च पुनर्द्वाभ्यां प्रस्तुते च प्रचेतसां तत्र त्रिंशे तपस्तुष्टादी
शाल्लब्धवरास्ततः आगत्य वार्क्षीमुद्वाह्य राज्यं चक्रुरितीर्यते हरिं प्रतोष्य कां सिद्धिं आपुः १ हे वार्हस्पत्य कस्यांचि
द्धियायां वृहस्पतेः मैत्रेये पः शिष्य इति ज्ञातव्यम् ते यदृच्छया गिरिशं प्राप्य तस्यैव कैवल्यनाथप्रियस्य गिरिशस्य
पार्श्ववर्त्तिनस्तदनुगृहीताः संतो नूनं परमोदं प्रापुरेव ततः सर्वं द्वइह अथवा परत्र किं प्रापुः २ रुद्रगीत

विदुर उवाच ॥ ये त्वयाभिहिता ब्रह्मन्सुताः प्राचीनवर्हिषः ते रुद्रगीतेन हरिं सिद्धिमापुः प्रतोष्य
कां १ किं वार्हस्पत्येह परत्र चाथ कैवल्यनाथप्रियपार्श्ववर्त्तिनः आसाद्य देवं गिरिशं यदृच्छया प्रापुः
परं नूनमथ प्रचेतसः ॥ २ श्रीमैत्रेय उवाच ॥ प्रचेतसोंतरुदधौ पितुरादेशकारिणः जपयज्ञेन तपसा
पुरंजनमतोषयन् ३ दशवर्षसहस्रांते पुरुषस्तु सनातनः तेषामाविरभूत्कृच्छ्रं शांतेन शमयन्रु
चा ४ सुपर्णस्कंधमारूढो मेरुशृंगमिवांबुदः पीतवासा मणिग्रीवः कुर्वन्वितिमिरा दिशः ५

जपरूपेण यज्ञेन तपसा च पुरंजनं हरिं ३ तेषां कृच्छ्रं तपः क्लेशं रुचा कांत्या शमयन् शांतेन सत्वेन वपु
षा आविर्भूत् ४ सुपर्णस्कंधमारूढ इत्यादिना वर्हिष्मतः सुतानाहेति तृतीयेनान्वयः ५ एमराम

विश्वस्थित्यादयो यतो हरेर्भवंति ॥ ७९ ॥ हंसयोः ॥ जीवेश्वरयोः ॥ ८० ॥ पुत्रानादिश्येति पुत्राणामादेशं मंत्रिणामग्रे कथ
यित्वा ॥ ८१ ॥ ८२ ॥ ८३ ॥ आत्मशौचं मनःशोधकं पारमेष्ठ्यं सर्वोत्कृष्टफलदं ८४ स्त्रीबुद्धिः तत्सेहितस्याश्रमो हकारः

अतस्तदपवादार्थं भज सर्वात्मना हरिं पश्यंस्तदात्मकं विश्वं स्थित्युत्पत्त्यप्ययाय च ॥ ७९ ॥ मैत्रेय उवा
च ॥ भागवतमुख्यो भगवान्नारदो हंसयोर्गतिं प्रदर्श्य नृपमामंत्र्य सिद्धलोकं ततोऽगमत् ॥ ८० ॥ प्राची
नबर्हि राजर्षिः प्रजासर्गाभिरक्षणे आदिश्य पुत्रानगमत्तपसे कपिलाश्रमं ८१ तत्रैकाग्रमना वी
रो गोविंदचरणांबुजं विमुक्तसंगोऽनुभजन्भक्त्या तत्साम्यतामगात् ८२ एतदध्यात्मपारोक्ष्यं गीतं दे
वर्षिणानघ यः श्रावयेद्यः शृणुयात्स लिंगेन विमुच्यते ८३ एतन्मुकुंदयशसा भुवनं पुनानं दे
वर्षिवर्यमुखनिःसृतमात्मशौचं यः कीर्त्यमानमधिगच्छति पारमेष्ठ्यं नास्मिन्भवे भ्रमति मु
क्तसमस्तबंधः ८४ अध्यात्मपारोक्ष्यमिदं मयाधिगतमद्भुतं एवं स्त्रियाश्रमः पुंसश्छिन्नो मु
त्र च संशयः ८५ ॥ इति श्रीमद्भागवते महापुराणे चतुर्थस्कंधे एकोनत्रिंशोऽध्यायः ॥ २९ ॥ ० ॥

छिन्नो भवति अमुत्र कर्मफलभोगः कथमिति संशयश्छिन्नः ॥ ८५ ॥ इति चतुर्थे एकोनत्रिंशः ॥ २९ ॥

भा० चं० ११२ आत्मनो वीर्येण संतानेन १२ पुत्रार्थमादौ भार्यायां संपादयति कं डुरिति भिन्नयोनी शार्थ्येमिंद्रप्रेषितया
प्रम्लोचया कंडुर्नाम ऋषिर्वंकुकालांतरे मे सोचततः कंडोजीतं गर्भं रिंद्रेषु त्यक्ता जगाम तद्देतदुक्तं अपवि
द्धा त्यक्ता १३ प्रास्थिद्वो वनस्पतीनां राजा सोमः अमृतस्राविणी देशिनी रुदंत्यास्तस्या मुखे न्यदधे अनेनास्य गर्भस

भविता विश्रुतः पुत्रोऽनवमो ब्रह्मणो गुरोः य एतामात्मवीर्येण त्रैलोक्यं प्रथयिष्यति १२ कंडोः प्रम्लो
चया लब्धा कन्या कमललोचना तां चापविद्धां जगृहुर्भूरुहा नृपनंदना १३ इतरं चामायामुखे राजा
सोमः पीयूषवर्षिणीं देशिनीं रोदमानायां निदधे सदयान्वितः १४ प्रजाविसर्ग आदिष्टाः पित्रा मामनु
वर्त्तता तत्र कन्यां वरारोहां तामुद्वहत माचिरं १५ अपृथग्धर्मशीलानां सर्वेषां वः सुमध्यमा अपृथ
ग्धर्मशीलेयं भूयात्पत्न्यर्पिताशया १६ दिव्यवर्षसहस्राणां सहस्रमहतौजसः भौमान्भोगान्पृथ
भोगान्दिव्यांश्चानुग्रहान्मम १७
भवनाम्रता हरेचत्तस्यां लावण्यत्कमस्वेदशोर्गंध्यादि राहित्यं चोक्तं १४ मामनुवर्त्तमानेन पित्रर्पिता युष्माकं संत
त्यप्रजासर्गनिमित्तेनामुद्वहत १५ ननु बहूनां कथमेका भार्या तत्राह अपृथग्धर्मः शीलं च येषां वः पत्नी भू
यात् अर्पितो भवत्सु आशयो यया धर्मशीलयोरैक्यात् महाकाव्येन दृष्टादृष्टविरोध इति भावः १६ अहतौज

कनकवर्णेन विभूषणेन भ्राजमानं कपोलं वदनं यस्य अष्टभिरायुधैः गरुड एव किन्नरः तेन पक्षस्वनैर्गीता कीर्त्तिर्यस्य
६ पीनाश्च आयताश्च अष्टौ भुजास्तेषां मंडले मध्ये स्थितया लक्ष्म्या स्पर्द्धमाना श्रीः शोभा यस्याः तया वनमालया
परिवृत आढ्यः पुरुषः आह पर्जन्यस्य नाद इव रुतं नादो यस्याः तया वाचा सघृणः अवलोको यस्य ७ भूयं मे मत्रोद

काष्ठिस्मुना कनकवर्णविभूषणेन भ्राजत्कपोलवदनो विलसत्किरीटः अष्टायुधैरनुचरैर्मुनिभिः
सुरेंद्रैरासेवितो गरुडकिन्नरगीतकीर्त्तिः ६ पीनायताष्टभुजमंडलमध्यलक्ष्म्या स्पर्द्धच्छ्रिया परिवृतो व
नमालयाद्यः बर्हिष्मतः पुरुष आह सुतान् प्रपन्नान् पर्जन्यनादरुतया सघृणावलोकः ७ श्रीभगवानु
वाच वरं वृणीध्वं भद्रं वो यूयं मे नृपनंदनाः सौहार्देनापृथग्धर्मास्तुष्टोहं सौहृदेन वः ८ योऽनुस्मर
ति संध्यायां युष्माननुदिनं नरः तस्य भ्रातृष्वात्मसाम्यं तथा भूतेषु सौहृदं ९ ये तु मां रुद्रगीतेन सायं प्रा
तः समाहिताः स्तुवंत्यहं कामवरान् दास्ये प्रज्ञां च शोभनां १० यद्यूयं पितुरादेशमग्रहीष्ट मुदान्विताः
अथो व उशती कीर्त्तिर्लोकाननु भविष्यति ११

वृणीध्वं सौहार्देन हेतुना अपृथग्धर्मो येषां संबोधनं वः परस्परं सौहृदेन तुष्टोहं ८ भूतेषु सौहृदं च भविष्यति ९
तेभ्यो दास्ये किं पुनर्युष्मभ्यमिति शेषः अग्रहीष्ट गृहीतवंतः अतो लोकाननु लोकेषु भविष्यति यद्वा लोकाननु

भा० चं०
११५

स्वनिष्ठयास्वरूपस्थित्याशुद्धाय अतःशांतायमनसिनिमित्तेसति अपार्थंव्यर्थमेवविलसद्विस्फुरितंद्वयंरूपंयस्मि
न् गृहीतामायागुणैर्विग्रहाब्रह्मादिमूर्त्तयोयेन २३ स्वतस्तुविशुद्धस्वरूपाय संसारंहरतीतिमेधाज्ञानंयस्यतस्मै
२४ २५ अयुक्ष्महिकृतवंतोवयं २६ यदुक्तंवरंवृणीध्वमितितन्मनसिनिधायाहकुःरूपमितिसमस्तानांक्लेशा

शुद्धायशांतायनमःस्वनिष्ठयामनस्यपार्थंविलसद्द्वयाय नमोजगत्स्थानलयोदयेषुगृहीतमायागु
णविग्रहाय २३ नमोविशुद्धसत्वायहरयेहरिमेधसे वासुदेवायकृष्णायप्रभवेसर्वसात्वतां २४ नमः
नमःकमलनाभायनमःकमलमालिने नमःकमलपादायनमस्तेकमलेक्षण २५ नमःकमल
किंजल्कपिशंगामलवाससे सर्वभूतनिवासायनमोयुंक्ष्महिसाक्षिणे २६ रूपंभगवतात्वेतदशेषक्ले
शसंक्षयं आविःकृतंनःक्लिष्टानांकिमन्यदनुकंपितं २७ एतावत्त्वंहिविभुभिर्भाव्यंदीनेषुवत्सलैः य
दनुस्मर्यतेकालेस्वबुद्ध्याभद्ररंधन २८

शसंक्षयोयस्मात् नःआविःकृतंप्रकटितं अतोऽन्यत्किमनुकंपितं अनुकंपाइयमेवास्माकंपरानुकंपेत्य
र्थः २७ कुतइत्यतआह हेअभद्ररंधन अमंगलनाशन त्वप्रत्ययोऽत्रनविवक्षितः एतावदेवदीनेषुव
त्सलैःप्रभुभिर्भाव्यंकार्यंकिंतत् तदाहयदिति अस्मदीयाएतरतिबुद्ध्या उचितेकालेअनुस्मर्यते
इतियत्त्वयानुरूपमपिदर्शितमितिभावः २८ ११५

न३

पक्वगुणो दग्धकामादिमल आशयो येषां अतः लोकद्वयभोगान्निःस्पृहाः प्राप्यान्निर्विद्य मत्स्थानं प्राप्स्यथ १८ न
नु गृहेषु प्रविष्टानां मम कथं तदाशक्त्या बंध एव स्यात् कुतस्तद्भक्तिः निर्वेदो वा तत्राह गृहेष्विति कुशलं मय्यर्पि
तं कर्म येषां मद्वार्तया यातो यामः कालो येषां १९ त्वद्वार्ताश्रोतृणां [illegible] गृहे न बंध इति कुतस्तत्राह
नव्यवदिति यद्यस्मात् कथाश्रवणात् ज्ञः सर्वज्ञोऽहमीश्वरः ब्रह्मादिभिः प्रवक्तृभिर्निमित्तभूतैः श्रोतृणां हृदि

अथ मय्यनपायिन्या भक्त्या पक्वगुणाशयाः उपयास्यथ मद्धाम निर्विद्य निरयादतः १८ गृहेष्वावि
शतां चापि पुंसां कुशलकर्मणां मद्वार्तायातयामानां न बंधाय गृहा मताः १९ नव्यवद्धृदये यज्ज्ञो
ब्रह्मैतद्ब्रह्मवादिभिः न मुह्यंति न शोचंति न हृष्यंति यतो गताः ॥२०॥ मैत्रेय उवाच ॥ एवं ब्रुवाणं पुरुषार्थभा
जनं जनार्दनं प्रांजलयः प्रचेतसः तद्दर्शनध्वस्ततमोरजोमला गिरागृणन् गद्गदया सुहृत्तमं २१ प्रचेत
स ऊचुः नमो नमः क्लेशविनाशनाय निरूपितोदारगुणाह्वयाय मनोवचोवेगपुरोजवाय सर्वाक्षमार्गैरगता
ध्वने नमः २२

इयं नव्यवत् नूतनवत् कथाश्रवणे कथं साक्षात्कारस्तत्राह यौ हं एतदेव ब्रह्म तत्र हेतुः यतो गताः यं प्राप्ताः संतो मो
हशोकहर्षान्न प्राप्नुवंति अतो मत्कथाश्रवणेन नव्यवत् मम हृद्याविर्भावादेव ब्रह्मसाक्षात्कारस्त्वाद्गृहेष्ववसतां म
पि न बंध इत्यर्थः २० पुरुषार्थभाजनयतीति तथा तं २१ वेदैः सकलश्रेयसाधनत्वेन निरूपितान्युदाराणि गुणाः आह्वया

नामानि यस्य मनोवचसोर्वेगादपि पुरो अग्रतो जवो वेगो यस्य
मनोवचसोरगोचरायेत्यर्थः अत एव सर्वेषामक्षाणां मा
र्गैः अगतः अनवगतोऽध्वा पदं यस्य तस्मै नमः २२

भा० चं
११५

श्रुत एतावदेव प्रार्थ्यमस्ति इत्याहुः यावदिति स्पृष्टा व्याप्ताः संतः स भगवति प्रकृष्टः संगो येषां तेषां संगोऽस्मा
कं स्यात् ३३ ननु राज्यभोगात् स्वर्गापवर्गौ विहाय किमिदं प्रार्थ्यते तत्राहुः तुलयामेति भगवत्संगिनां संगस्य
लवेनापि ३४ सत्संगस्य श्रेष्ठ्यं प्रपंचयति यत्रेति त्रिभिः यत्र येषु यतः याभ्यः निर्वैरं वैराभावः ३५ पद्भ्यां पा

यावत्ते मायया स्पृष्टा भ्रमाम इह कर्मभिः तावद्भवत्प्रसंगानां संगः स्यान्नो भवे भवे ३३ तुलयाम ल
वेनापि न स्वर्गं नापुनर्भवं भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः ३४ यत्रेड्यंते कथा मृष्टास्तृष्णा
याः प्रशमो यतः निर्वैरं यत्र भूतेषु नोद्वेगो यत्र कश्चन ३५ यत्र नारायणः साक्षाद्भगवान्न्यासिनां ग
तिः संस्तूयते सत्कथासु मुक्तसंगैः पुनः पुनः ३६ तेषां विचरतां पद्भ्यां तीर्थानां पावनेच्छया भीतस्य
किं न रोचेत तावकानां समागमः ३७ वयं तु साक्षाद्भगवन्भवस्य प्रियस्य सख्युः क्षणसंगमेन सु
दुश्चिकित्स्यस्य भवस्य मृत्योर्भिषक्तमं त्वाद्य गतिं गताः स्म ३८ यन्नः स्वधीतं गुरवः प्रसादिता विप्राश्च वृद्धा
श्च सदानुवृत्त्या आर्या नताः सुहृदो भ्रातरश्च सर्वाणि भूतान्यनसूययैव ३९

वनेच्छया संसाराद्भीतस्य ३६ सत्संगफलमस्माभिरेवानुभूतमित्याहुः वयं त्विति तव यः प्रियः सख्युः त
स्य भवस्य अत्यंतमचिकित्स्यस्य भवस्य जन्ममृत्योश्च भिषक्तमं सद्वैद्यं त्वां गतिं प्राप्ताः ३८ वरांतरं व्रणु

ते यन्न इति द्विभ्यां नताः नमस्कृताः ३९

११५

येनानुस्मरणेन स्मृतानां तेषामुपशांतिसुखं भवति किंच क्षुल्लकानामपि भूतानां अंतर्हृदये ऽंतर्हितः अंतर्यामि
त्वेनावस्थितो भवानीहितामिच्छां तावदुपासकानां नो ऽस्माकमाशिषः कस्माद्धेतोर्न वेद जानातीत्येव २९ तथा
पि वक्तव्यं चेत्तर्हि येषामस्माकं भगवान्प्रसन्नः असावेव वरः भगवत्प्रसाद एवास्माकमीप्सितो वर इत्य
२ प्रदर्शकः र्थः अपवर्गगुरुर्मोक्षमार्गप्रवर्तकः गतिः स्वतन्त्रपुरुषार्थभूतः ३० यद्यप्येवं अथापि हे नाथ त्वत्तश्चन्त्तः वर

येनोपशांतिर्भूतानां क्षुल्लकानामपीहतां अंतर्हितोऽंहृदये कस्मान्नो वेद नाशिषः २९ असावेव
वरोऽस्माकमीप्सितो जगतः पते प्रसन्नो भगवान्येषामपवर्गगुरुर्गतिः ३० वरं वृणीमहेऽथा
तो यद्वि पि नाथ त्वत्परतः परात् न ह्यंतस्त्वद्विभूतीनां सोऽनंत इति गीयसे ३१ पारिजातेंऽजसा लब्धे सारंगोऽन्य
न्न सेवते त्वदंघ्रिमूलमासाद्य साक्षात्किं किं वृणीमहे ३२

मेकं वृणीमहे कथंभूतात् परतः कारणादपि परात् अक्षरात्परतः पर इति श्रुतेः अतो यद्यपि त्वं दातुम
समर्थः न च देयानां त्वद्विभूतीनामंतोऽस्ति यतोऽनंतविभूतित्वादनंत इति गीयसे ३१ तथापि यथा सारंगो
भ्रमरः पारिजाते सुखेन लब्धे सति सुलभमप्यन्यद्वृक्षांतरं न सेवते तथा वयमपि साक्षात्त्वदंघ्रिमूलं प्राप्य किं वृ
णीमहि न किंचिदित्यर्थः यद्वा किं मय्यनतुच्छं किमर्थं वृणीमहे अनंतत्वेन मनोरथानां अनवस्थानादित्यर्थः ३२

भा० च० ११६

नयैर्युक्तिभिः ४६ उग्रतद्भुः समर्प्पयामास ४७ मारिषां वार्क्षीं अजनयोनिः ब्रह्मात स्मात्जातो दक्षः महतः
श्रीमहादेवस्यावज्ञानात् पूर्वमजनयोनिजो ब्रह्मपुत्रोपि सन् क्षत्रयः जातो यस्यामजनजातः ४८ प्राक्
सर्गे पूर्वदेहे कालेन विद्रुते गते दैवेनेश्वरेणचोदितः सन् इष्टाः प्रजाः ससर्ज्ज दक्ष इति प्रसिद्धः ४९ स्वा

भस्मसात्क्रियमाणांस्तान्द्रुमान्वीक्ष्य पितामहः आगतः शमयामास पुत्रान्वर्हिष्मतो नयैः
४६ तत्रावशिष्टा ये वृक्षा भीता दुहितरं तदा उज्जह्रुस्ते प्रचेतोभ्य उपदिष्टाः स्वयंभुवा ४७ ते च
५२ ब्रह्मण आदेशान्मारिषामुपयेमिरे यस्यां महदवज्ञानादजन्यजनयोनिजः ४८ चाक्षुषे त्वन्त
रे प्राप्ते प्राक्सर्गकालविद्रुते यः ससर्ज्ज प्रजा इष्टाः स दक्षो दैवचोदितः ४९ यो जायमानस्स
र्वेषां तेजस्तेजस्विनां रुचा स्वयोपादत्त दाक्ष्यात्कर्मणां दक्षमब्रुवन् ५० तं प्रजासर्गरक्षाया
मनादिरभिषिच्य च युयोज युयुजेन्यांश्च सर्वे सर्वप्रजापतीन् ॥ ५१ ॥ इति श्रीमद्भागवते महापु
राणे चतुर्थस्कंधे प्रचेतसउपाख्याने त्रिंशोध्यायः ॥ ३० ॥

यारुचा प्रभया तेज उपादत्त ॥ आच्छादितवान् पंचदाक्ष्यात् दक्षमब्रुवन् ५० तमभिषिच्य अनादि
र्ब्रह्मा प्रजासर्गरक्षायां युयोज स च दक्षोऽन्यान् मरीच्यादीन् तद्व्यापारे प्रुनियुक्तवान् ५१ इति च

११६

निरंधसां निरन्नानां अदभ्रं बहुकालं ते परितोषणाय भवत्विति वृणीमहे ४० अज्ञानामप्यस्माकं त्वत्स्तुतिर्नायुक्तेत्याह मनुरिति यस्य तव महिम्नो न दृष्टपारैर्यैः तेपि त्वा आत्मसमं स्वशक्त्यनुरूपं यथा स्तुवंति अथो अतः वयमपि वृणीमः ४१ सत्वमूर्त्तये वासुदेवाय ४२ यानं स्वप्रयाणं अनिछतामपि सतां स्वधाम ययौ अनपवर्गवीर्यः अ

यन्नः सुतप्तं तप एतदीश निरंधसां कालमदभ्रमप्सु सर्वं तदेतत्पुरुषस्य भूम्नो वृणीमहे ते परितोषणाय ४० मनुः स्वयंभूर्भगवान्भवश्च येऽन्ये तपोज्ञानविशुद्धसत्वाः अदृष्टपारा अपि यन्महिम्नः स्तुवंत्यथो त्वात्मसमं गृणीम ४१ नमः समाय शुद्धाय पुरुषाय पराय च वासुदेवाय सत्वाय तुभ्यं भगवते नमः ४२ मैत्रेय उवाच इति प्रचेतोभिरभिष्टुतो हरिः प्रीतस्तथेत्याह शरण्यवत्सलः अनिछतां यानमतृप्तचक्षुषां ययौ स्वधामानपवर्गवीर्यः ४३ अथ निर्याय सलिलात्प्रचेतस उदन्वतः वीक्ष्याकुप्यन्द्रुमैश्छन्नां गां गां रोद्धुमिवोछ्रितैः ४४ ततोऽग्निमारुतौ राजन्नमुंचन्मुखतो रुषा महीं निर्वीरुधं कर्तुं संवर्तक इवात्यये ४५

कुंठितप्रभावः ४३ उदन्वतः सिंधोः सलिलान्निर्याय निर्गत्य गां स्वर्गं रोद्धुमिव उछ्रितैर्द्रुमैः गां महीं छन्नां वीक्ष्य द्रुमेभ्योऽकुप्यन् तदा हि प्राचीनबर्हिषः प्रव्रजितत्वादराजके कर्षणाद्यभावात् द्रुमैर्भूमिश्छन्ना अभूत् ४४ निरस्ता वीरुधोपि यस्याः तथाभूतां कर्त्तुं संवर्त

भा० स्कं० ४

भा० च० ७ इतिप्रचेतोभिःपृष्टः ८ अतोगृहशक्याहरिसेवांविनासर्वेजन्मकर्मादिकंव्यर्थंहतमितिनारदःशोच
११७ न्नाह तज्जन्मेतिचतुर्भिः यतोजन्मादिहरिसेवैवफलं अतस्तद्धीनंसर्वंव्यर्थमित्यर्थः ९ शुक्लंसंवेधिज
न्मविशुद्धमातापितृभ्यामुत्पत्तिः सावित्रमुपनयनेन याज्ञिकंदीक्षयाविबुधानामिवदीर्घायुषापि १० वचो

तन्नःप्रष्टोतयाध्यात्मज्ञानंतत्त्वार्थदर्शनं येनांजसातरिष्यामोदुस्तरंभवसागरं ॥८॥ मैत्रेयउवाच
इतिप्रचेतसापृष्टोभगवान्नारदोमुनिः भगवत्युत्तमश्लोकेआविष्टात्माब्रवीन्नृपान् ॥८॥ नारदउ
वाच ॥ तज्जन्मतानिकर्माणितदायुस्तन्मनोवचः नृणांयेनेहविश्वात्मासेव्यतेहरिरीश्वरः ॥९॥ किं
जन्मभिस्त्रिभिर्वेहशौक्लसावित्र्ययाज्ञिकैः कर्मभिर्वात्रयीप्रोक्तैः पुंसोपिविबुधायुषा ॥१०॥ श्रुतेन
तपसावाकिंवचोभिश्चित्तवृत्तिभिः बुद्ध्यावाकिंनिपुणयाबलेनेंद्रियराधसा ॥११॥ किंवायो
गेनसांख्येनन्यासस्वाध्याययोरपि किंवाश्रेयोभिरन्यैश्चनयत्रात्मप्रदोहरिः ॥१२॥

भिः वाग्विलासैः चित्तवृत्तिभिः नानावधाधानसामर्थ्यैः इंद्रियाणांराधसापाटवेन ॥११॥ योगेनप्रा
णायामादिना सांख्येन देहादिव्यतिरिक्तआत्मज्ञानमात्रेण सन्यासवेदाध्ययनाभ्यामपि अनेरपिव्रत
वैराग्यादिभिः श्रेयःसाधनैः १२ रामरामरामरामरामरामराम ॥ ऽऽ ऽऽ रामराम ॥॥ ११७

एकविंशे स्तुते दृष्टो धुरंधरस्य च तेसतां नादीकेन मार्गेण मुक्तिरुक्ता प्रचेतसां ततः दिव्यवर्षसहस्राणां सहस्र
स्यांते उत्पन्नविवेकज्ञाना स्ते उपायास्य थमहंभ्रम निर्विद्य निरयाद्दत्तः इत्यधोक्षजभाषितं स्मरंतः आम्युप्राव्र
जन् १ ब्रह्मसत्रेण आत्मविमर्शिन दीक्षितः कृतसंकल्पा बभूवुः सर्वे घात्मेति मेधाज्ञानं २ निर्जिताः प्राण

मैत्रेय उवाच ॥ ततउत्पन्नविज्ञाना आम्ब्यधोक्षजभाषितं स्मरंत आत्मजे भार्य्यो विसृज्य प्राव्रजन्गृ
हात्तथ दीक्षिता ब्रह्मसत्रेण सर्वभूतात्ममेधसा प्रतीच्यां दिशि वेलायां सिद्धोभूद्यत्र जाजलिः २ तान्नि
ज्र२ र्जितप्राणमनोवचोदृशोजितासनान् शांतसमानविग्रहान् परेमले ब्रह्मणि योजितात्मनः सुरासु
रेड्यो ददर्श स नारदः ३ तमागतं तउत्थाय प्रणिपत्याभिनंद्य च पूजयित्वा यथादेशं सुखासीन
मथाब्रुवन् ४ प्रचेतस ऊचुः स्वागतं ते सुरर्षे द्य दिष्ट्या नो दर्शनं गतः तव चंक्रमणं ब्रह्मन्नभवा
यय थारवेः ५ यदादिष्टं भगवता शिवेनाधोक्षजेन च तद्गृहेषु प्रसक्तानां प्रायशः क्षपितं प्रभो ६

मनोवचोदृशो येस्तान् शांतात उपरताः समानाम् मूलाधारादारभ्य स्वःजवोविग्रहा येषां ब्रह्मणि योजित आ
त्मायैः सुरासुरैरीड्यो दृष्टवान् ३ उत्थाय तं प्रणिपत्य यथादेशं यथाविधिं पूजयित्वा ४ । ५ आदिष्टमु
पदिष्टं यदात्मतत्त्वं क्षपितं विस्मृतम ६

भा०चं०
२१८ कुतः सर्वमूलत्वात् इदि सदृष्टांतांतरमाह यथैव वारः जलानि वर्षाकाले सूर्यादुद्भवंति ग्रीष्मे तस्मिन्ने
व प्रविशंति अस्याप्रसिद्धत्वेन दृष्टांतांतरमाह यथा भूतानि भूमावित्ति गुणप्रवाहः चेतनचेतनात्मकः
प्रपंचः १५ ननु हरावेव गुणप्रवाह इत्युक्ते तदाधारत्वेन सोपाधिकत्वं हरेः स्यादित्याशंक्याह एतदिति
एतद्विश्वं विलीनोस्तत्सर्वशास्त्रप्रसिद्धं परंपदं सर्वोपाधिरहितं तदुत्पन्नत्वान्नततः पृथक् इत्यर्थः तर्हि

यथैव सूर्यात्प्रभवंति वारः पुनश्च तस्मिन्प्रविशंति काले भूतानि भूमौ स्थिरजंगमानि
तथा हरावेव गुणप्रवाहः १५ एतत्पदं तज्जगतात्मनः परं सकृद्विभातं सवितुर्यथा प्रभा
यथासवो जाग्रति सुप्तशक्तयो द्रव्यक्रियाज्ञानभिदाभ्रमात्ययः १६ रामरामरामरा ॥

कथमन्यथाभावित्तत्राह सकृत्कदाचिद्विभातं स्फुरितं गंधर्वनगरवत् यथा सवितुः प्रभा न ततो
भिन्ना यथा च जाग्रति अपि च सर्वइंद्रियाणि स्फुरंति सुषुप्तौ तु सुप्तशक्तयो भवंतीत्यर्थः कथंभूतोऽसौ ह
कार्यी रिः द्रव्यादीनां त्रिविधाहंकाराणां तत्कृतभिन्नस्य भेदभ्रमस्य चात्ययो यस्मात् सः शुद्धा अजाग्रति सुषु
सुप्ताश्च सवः शक्तयो येषां ते भवंति द्रव्यादेरथात्ययो भवति सवितुःप्रभेत्युक्तो दृष्टांत इति १६ ॥ ११८

ननेषां नानाफलसाधनानां हरिसेवाऽभावमात्रेण कुतो वैयर्थ्यं तत्राह श्रेयसां फलानामात्मैव अवधिः पराका
ष्ठा अर्थतः परमार्थतः आत्मार्थत्वेनैवान्येषां प्रियत्वादित्यर्थः भवत्वात्मा अवधिः हरेः किमायातं तत्राह सर्वेषामपी
ति आत्मदः अविद्यानिरासेन स्वरूपाभिव्यंजकः ऐश्वरेणापि रूपेण बलिप्रभृतिभ्य इवात्मप्रदः प्रियश्च परमा
नंदरूपत्वात् १३ किंच नानाकर्मभिस्तत्तद्देवताप्रीतिनिमित्तान्यपि फलानि हरिप्रीत्या भवंति केवलं

श्रेयसामपि सर्वेषामात्मा ह्यवधिरर्थतः सर्वेषामपि भूतानां हरिरात्मात्मदः प्रि
यः १३ यथा तरोर्मूलनिषेचनेन तृप्यंति तत्स्कंधभुजोपशाखाः प्राणोपहा
राच्च यथेंद्रियाणां तथैव सर्वार्हणमच्युतेज्या १४

तद्देवताराधनेन तु न किंचिदिति सदृष्टांतमाह यथेति मूलात्प्रथमविभागाः स्कंधाः तद्विभागा भुजाः ते
षामपि उपशाखाः उपलक्षणं पत्रपुष्पादयोपि तृप्यंति ननु मूलमेकं विना स्वस्वनिषेचनेन प्राणस्योपहा
रो भोजनं तस्मादिंद्रियाणां तृप्तिः न तु तत्तदिंद्रियेषु पृथगन्नलेपनेन तथा अच्युताराधनमेव सर्वदेवताराधनं
न पृथगित्यर्थः १४

सतामेवं वश्योऽसौ असतां तु दुःखजामपि न गृह्णाति नेति कुमनीषिणां कुत्सितमतीनां अधनाश्चते आत्मधना
भगवद्धनाः ते प्रिया यस्य रसज्ञः भक्तिसुखज्ञः के कुमनीषिणस्तानाह श्रुतादिनिमित्तैर्मदैर्ये सत्सु पापं ति
रस्कारं कुर्वंति २१ भक्ताधीनत्वं प्रपंचयन्नाह अनुवर्तमानामपि श्रियं तदर्थिनः सकामान् द्विपदपती

न भजति कुमनीषिणां स इज्यां हरिरधनात्मधनप्रियो रसज्ञः श्रुतधनकुलकर्मणां मदै
र्ये विदधति पापमकिंचनेषु सत्सु २१ श्रीयमनुचरंतीं तदर्थिनश्च द्विपदपतीन् विबुधांश्च
यः स्वपूर्णः न भजति निजभृत्यवर्गतंत्रः कथममुमुद्विसृजेत् पुमान् कृतज्ञः २२ श्री त्रे उ
च इति प्रचेतसो राजन्नन्याश्च भगवत्कथाः श्रावयित्वा ब्रह्मलोकं ययौ स्वायंभुवो मुनिः २३
तेऽपि तन्मुखनिर्यातं यशो लोकमलापहं हरेर्निशम्य तत्पादं ध्यायंतस्तद्गतिं ययुः २४ ए
तत्ते भिहितं क्षत्तर्यन्मां त्वं परिपृष्टवान् प्रचेतसां नारदस्य संवादं हरिकीर्तनं २५

नरेंद्रान् विबुधान् देवानपि यो नानुवर्तते यतः स्वेनैव पूर्णः अतः स्वभृत्यवर्गानुरक्तः एवंभूतममुं [illegible]मोपदपिक
थं परित्यजेत् २२ प्रचेतसः कर्मभूतान् अन्याश्च नूनं त्वेस्तुनीतैरित्यादि ध्रुवचरितोद्याः सत्रेऽगायत् प्रचेतसा
मित्युक्तत्वात् २३ २४ प्रचेतसां नारदस्य च संवादरूपमेतदाख्यानं तेऽभिहितं हरेः कीर्तनं यस्मिन् तत् २५ ११९

नन्वसंगेहहैकधंप्रपंचोत्पत्तिलयौ तत्राह यथेति अदभ्रतमः प्रकाशात् आगमापायनो रजस्तमः सत्वस्यानी
याः हेतुपाः प्रचेतसः अमूः शक्तयः नभवंतिलीयंते इति एवमयंजगत्प्रवाहः १७ तेनेनसर्वकारणत्वेनहेतु
नाकालेनानिमित्तप्रधानमुपादानंपुरुषः कर्ता एतत्त्रितयात्मकत्वात्सर्वकारणंपरमीश्वरं अद्धा साक्षाद्
जध्वं आत्मन एकभावेन अभिन्नत्वेन १८ साधनमाह दयादिभिः शीघ्रंतुष्यति १९ ततोनके

यथा नभस्यभ्रतमः प्रकाशा भवंति भूयो न भवंत्यनुक्रमात् एवं परे ब्रह्मणि शक्तयस्त्व
मू रजस्तमः सत्वमितिप्रभावः १७ तेनैकमात्मानमशेषदेहिनां कालं प्रधानं पुरुषं परेशं ॥
स्वतेजसा ध्वस्तगुणप्रवाहमात्मैकभावेन भजध्वमद्धा १८ दयया सर्वभूतेषु संतुष्ट्या येन केन
वा सर्वेंद्रियोपशांत्या च तुष्यत्याशु जनार्दनः १९ अपहतसकलैषणामलात्मन्यविरतमेधित
भावनोपहूतः निजजनवशगत्वमात्मनोऽयन्न सरति छिद्रवदक्षरः सतां हि २०

हृच्चिन्त्यत इत्याह अपहता निरस्ताः सकला एषणा कसायाय स्मात् सघासाव मलश्चात्मामनः तस्मिन्
सतां मनसि निरंतरमेधितया भावनयोपहूतः सन्नक्षरो हरिः छिद्रवत् तत्रत्याकाशवत् ततो न सरति नाप
याति किंकुर्वन् आत्मनो निजजनवशगत्वं स्वभक्ताधीनत्वमयन् अवगच्छन् २० ॥ ss ॥ ss ss

भा० च० १२०

यएषः वंशः सोऽनुवर्णितः ॥ २६ ॥ यः प्रियव्रतः ॥ २७ ॥ २८ ॥ स्वानुज्ञातीदिदृक्षुः ॥ ३० ॥ २ ज्ञांचरितमितिशेषः ॥ ३१ ॥ इतिश्री
भावार्थदीपिकायांश्रीधरस्वामिविरचितायांचतुर्थस्कंधसंबंधिन्यांएकत्रिंशतितमोध्यायः ॥ ३१ ॥ भीमस्यापिर

श्रीशुक उवाच ॥ यएषउत्तानपदोमन्वंशस्यानुवर्णितः ॥ वंशःप्रियव्रतस्यापिनिबोधनृपसत्तम ॥
२६ ॥ योनारदादात्मविद्यामधिगम्यपुनर्महीं ॥ भुक्त्वाविभज्यपुत्रेभ्यऐश्वरंसमगात्पदं ॥ २७ ॥ इमां
तुकौशारविणोपवर्णितांक्षत्तानिशम्याजितवादसत्कथां ॥ प्रवृद्धभावोऽश्रुकलाकुलोमुनिर्दधा
रमूर्ध्नाचरणंहृदाहरेः ॥ २८ ॥ विदुरउवाच ॥ सोऽयमद्यमहायोगिन्भवताकरुणात्मना ॥ दर्शितस्त
मसःपारोयत्राकिंचनगोहरिः ॥ २९ ॥ इत्यानम्यतमामंत्र्यविदुरोगजसाह्वयं ॥ स्वानांदिदृक्षुःप्रययौ
ज्ञातीनांनिर्वृताशयः ॥ ३० ॥ एतद्यःशृणुयाद्राजन्राज्ञांहर्यर्पितात्मनां ॥ आयुर्धनंयशःस्वस्तिगति
मैश्वर्यमाप्नुयात् ॥ ३१ ॥ इतिश्रीमद्भागवतेमहापुराणेपारमहंस्यांसंहितायांवैयासिक्यांचतुर्थस्कंधेप्र
चेतसउपाख्यानेएकत्रिंशतितमोध्यायः ॥ ३१ ॥

णेभंगोमुनीनांचमतिभ्रमः यदिशुद्धमशुद्धंवाममदोषंनविद्यते १ शुभमस्तु ॥ रामराम राम

१२०